# Narayaniyam

# નારાયણીયમ્

## Document Information

Text title : naaraayaniiyam

File name : nArAyaNIyam.itx

Category : vishhnu, stotra, vishnu

Location : doc_vishhnu

Author : melpattUr Narayanabhatta

Proofread by : M.K. Krishnaswamy, M.G.Vasudevan, PSA Easwaran, Aparna Sai Ganesh

Description-comments : Includes pArAyaNasankalpam, dhyAnam, concluding anubandham and maNgalam

Acknowledge-Permission: Pandanus, http://iu.ff.cuni.cz/pandanus/electronictexts/

Latest update : December 27, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 27, 2023

*sanskritdocuments.org*

# નારાયણીયમ્

ૐ નમો ભગવતે વાસુદેવાય ।
ૐ નમો નારાયણાય ।

## પારાયણસઙ્કલ્પમ્

શુક્લામ્બરધરં વિષ્ણું શશિવર્ણં ચતુર્ભુજમ્ ।
પ્રસન્નવદનં ધ્યાયેત્સર્વવિઘ્નોપશાન્તયે ॥

નારાયણ નારાયણ નારાયણ નારાયણ ।
નારાયણ નારાયણ નારાયણ નારાયણ ॥

## ધ્યાનમ્

પીતામ્બરં કરવિરાજિતશઙ્ખચક્રકૌમોદકીસરસિજં કરુણાસમુદ્રમ્ ।
રાધાસહાયમતિસુન્દરમન્દહાસં વાતાલયેશમનિશં હૃદિ ભાવયામિ ॥

મૂકં કરોતિ વાચાલં પઙ્ગું લઙ્ઘયતે ગિરિમ્ ।
યત્કૃપા તમહં વન્દે પરમાનન્દમાધવમ્ ॥

વન્દે નન્દવ્રજસ્ત્રીણાં પાદરેણુમભીક્ષ્ણશઃ ।
યાસાં હરિકથોદ્ગીતં પુનાતિ ભુવનત્રયમ્ ॥

કોમળં કૂજયન્ વેણું શ્યામળોઽયં કુમારકઃ ।
વેદવેદ્યં પરં બ્રહ્મ ભાસતાં પુરતો મમ ॥

ધ્યાનશ્લોકાનિ

ૐ નમઃશ્રીગણેશશારદાગુરુભ્યો નમઃ । અવિઘ્નમસ્તુ ।

અગજાનનપદ્માર્કં ગજાનનમહર્નિશમ્ ।

અનેકદન્તં ભક્તાનામેકદન્તમુપાસ્મહે ॥

શ્રીમહાગણપતયે નમઃ ।

ગુરવે સર્વલોકાનાં ભિષજે ભવરોગિણામ્ ।
નિધયો સર્વવિદ્યાનાં શ્રીદક્ષિણામૂર્તયે નમઃ ॥

અસ્મદ્ગુરુચરણારવિન્દાભ્યાં નમઃ ।

જ્ઞાનાનન્દમયં દેવં નિર્મલસ્ફટિકાકૃતિમ્ ।
આધારં સર્વવિદ્યાનાં હયગ્રીવમુપાસ્મહે ॥

શ્રીહયગ્રીવમૂર્તયે નમઃ ।

સરસ્વતિ નમસ્તુભ્યં વરદે કામરૂપિણિ ।
વિદ્યારમ્ભં કરિષ્યામિ સિદ્ધિર્ભવતુ મે સદા ॥

શ્રીમહાસરસ્વત્યૈ નમઃ ।

ઉમાકોમળહસ્તાબ્જસમ્ભાવિતલલાટકમ્ ।
હિરણ્યકુણ્ડલં વન્દે કુમારં પુષ્કલસ્રજમ્ ॥

શક્તિધરશ્રીસુબ્રહ્મણ્યસ્વામિને નમઃ ।

ભૂતનાથ સદાનન્દ સર્વભૂતદયાપર ।
રક્ષ રક્ષ મહાબાહો શાસ્ત્રે તુભ્યં નમો નમઃ ॥

સ્વામિ શ્રીશબરીશશાસ્તારં શરણં ગચ્છામિ ।

કોમળં કૂજયન્ વેણું શ્યામળોઽયં કુમારકઃ ।
વેદવેદ્યં પરં બ્રહ્મ ભાસતાં પુરતો મમ ॥

યં બ્રહ્મા વરુણેન્દ્રરુદ્રમરુતઃ સ્તુન્વન્તિ દિવ્યૈઃ સ્તવૈઃ
    વેદૈસ્સાઙ્ગપદક્રમોપનિષદૈર્ગાયન્તિ યં સામગાઃ ।
ધ્યાનાવસ્થિતતદ્ગતેનમનસા પશ્યન્તિ યં યોગિનો
    યસ્યાન્તં ન વિદુઃ સુરાસુરગણાઃ દેવાય તસ્મૈ નમઃ ॥

કૃષ્ણાય વાસુદેવાય દેવકીનન્દનાય ચ ।
નન્દગોપકુમારાય ગોવિન્દાય નમો નમઃ ॥

સાયઙ્કાલે વનાન્તે કુસુમિતસમયે સૈકતે ચન્દ્રિકાયાં
    ત્રૈલોક્યાકર્ષણાઙ્ગં સુરવરગણિકામોહનાપાઙ્ગમૂર્તિમ્ ।

સેવ્યં શ‍ૃઙ્ગારભાવૈર્નવરસભરિતૈર્ગોપકન્યાસહસ્રૈઃ
    વન્દેઽહં રાસકેળીરતમતિસુભગં વશ્યગોપાલકૃષ્ણમ્ ॥

આનીલશ્લક્ષ્ણકેશં જ્વલિતમકરસત્કુણ્ડલં મન્દહાસ-
    સ્યન્દાર્દ્રં કૌસ્તુભશ્રીપરિગતવનમાલોરુહારાભિરામમ્ ।
શ્રીવત્સાઙ્કં સુબાહું મૃદુલસદુદરં કાઞ્ચનચ્છાયચેલં
    ચારુસ્નિગ્ધોરુમમ્ભોરુહલલિતપદં ભાવયેયં ભવન્તમ્ ॥

શ્રીકૃષ્ણ ગોવિન્દ હરે મુરારે શ્રીનાથ નારાયણ વાસુદેવ ॥ - (ત્રિવારમ્)

સર્વત્ર ગોવિન્દનામસઙ્કીર્તનં - ગોવિન્દ ગોવિન્દ ગોવિન્દ ।

મોક્ષાબ્ધિસારમયભાગવતાખ્યદધ્નો
    નારાયણીયનવનીતમહો ગૃહીત્વા ।
માયામયૌઘપરિતપ્તજનાય યોગાત્
    નારાયણાવનિસુરાય નમોઽસ્તુ તસ્મૈ ॥

ગઙ્ગા ગીતા ચ ગાયત્ર્યપિ ચ તુલસિકા ગોપિકાચન્દનં તત્
    સાલગ્રામાભિપૂજા પરપુરુષ તથૈકાદશી નામવર્ણાઃ ।
એતાન્યષ્ટાપ્યયત્નાન્યયિ કલિસમયે ત્વત્પ્રસાદપ્રવૃદ્ધ્યા
    ક્ષિપ્રં મુક્તિપ્રદાનીત્યભિદધુરૃષયસ્તેષુ માં સજ્જયેથાઃ ॥

સર્વત્ર ગોવિન્દનામસઙ્કીર્તનં - ગોવિન્દ ગોવિન્દ ગોવિન્દ ।

After this intial prayer, chant Narayanakavacham from Shrimad Bhagavatam (6th Skandha - Chapter 8) and then Narayaneeya Arati as given at the end of the book, before starting the NarayaneeyaM Stotram.

# નારાયણીયમ્

## નારાયણીયં સ્તોત્રમ્

મેલ્પત્તૂર્ નારાયણભટ્ટતિરિવર્યવિરચિતં
શ્રીમન્નારાયણીયં સ્તોત્રમ્

### પ્રથમદશકમ્ (૧)

ભગવતઃ સ્વરૂપં તથા માહાત્મ્યમ્ ।
1 Form and Glory of the Lord

સાન્દ્રાનન્દાવબોધાત્મકમનુપમિતં કાલદેશાવધિભ્યાં
નિર્મુક્તં નિત્યમુક્તં નિગમશતસહસ્રેણ નિર્ભાસ્યમાનમ્ ।
અસ્પષ્ટં દૃષ્ટમાત્રે પુનરુરુપુરુષાર્થાત્મકં બ્રહ્મતત્ત્વં
તત્તાવદ્ભાતિ સાક્ષાદ્ગુરુપવનપુરે હન્ત ભાગ્યં જનાનામ્ ॥ ૧-૧॥

એવં દુર્લભ્યવસ્તુન્યપિ સુલભતયા હસ્તલબ્ધે યદન્યત્
તન્વા વાચા ધિયા વા ભજતિ બત જનઃ ક્ષુદ્રતૈવ સ્ફુટેયમ્ ।
એતે તાવદ્વયં તુ સ્થિરતરમનસા વિશ્વપીડાપહત્યૈ
નિશ્શેષાત્માનમેનં ગુરુપવનપુરાધીશમેવાશ્રયામઃ ॥ ૧-૨॥

સત્ત્વં યત્તત્પરાભ્યામપરિકલનતો નિર્મલં તેન તાવદ્-
ભૂતૈર્ભૂતેન્દ્રિયૈસ્તે વપુરિતિ બહુશઃ શ્રૂયતે વ્યાસવાક્યમ્ ।
તત્સ્વચ્છત્વાદ્યદચ્છાદિતપરસુખચિદ્ગર્ભનિર્ભાસરૂપં
તસ્મિન્ ધન્યા રમન્તે શ્રુતિમતિમધુરે સુગ્રહે વિગ્રહે તે ॥ ૧-૩॥

નિષ્કમ્પે નિત્યપૂર્ણે નિરવધિ પરમાનન્દપીયૂષરૂપે

નિર્લીનાનેકમુક્તાવલિસુભગતમે નિર્મલબ્રહ્મસિન્ધૌ ।
કલ્લોલોલ્લાસતુલ્યં ખલુ વિમલતરં સત્ત્વમાહુસ્તદાત્મા
કસ્માન્નો નિષ્કલસ્ત્વં સકલ ઇતિ વચસ્ત્વત્કલાસ્વેવ ભૂમન્ ॥ ૧-૪॥

નિર્વ્યાપારોઽપિ નિષ્કારણમજ ભજસે યત્ક્રિયામીક્ષણાખ્યાં
તેનૈવોદેતિ લીના પ્રકૃતિરસતિકલ્પાઽપિ કલ્પાદિકાલે ।
તસ્યાઃ સંશુદ્ધમંશં કમપિ તમતિરોધાયકં સત્ત્વરૂપં
સ ત્વં ધૃત્વા દધાસિ સ્વમહિમવિભવાકુણ્ઠ વૈકુણ્ઠરૂપમ્ ॥ ૧-૫॥

તત્તે પ્રત્યગ્રધારાધરલલિતકલાયાવલીકેલિકારં
લાવણ્યસ્યૈકસારં સુકૃતિજનદૃશાં પૂર્ણપુણ્યાવતારમ્ ।
લક્ષ્મીનિશ્શઙ્કલીલાનિલયનમમૃતસ્યન્દસન્દોહમન્તઃ
સિઞ્ચત્સઞ્ચિન્તકાનાં વપુરનુકલયે મારુતાગારનાથ ॥ ૧-૬॥

કષ્ટા તે સૃષ્ટિચેષ્ટા બહુતરભવખેદાવહા જીવભાજા-
મિત્યેવં પૂર્વમાલોચિતમજિત મયા નૈવમદ્યાભિજાને ।
નો ચેજ્જીવાઃ કથં વા મધુરતરમિદં ત્વદ્વપુશ્ચિદ્રસાર્દ્રં
નેત્રૈઃ શ્રોત્રૈશ્ચ પીત્વા પરમરસસુધામ્ભોધિપૂરે રમેરન્ ॥ ૧-૭॥

નમ્રાણાં સન્નિધત્તે સતતમપિ પુરસ્તૈરનભ્યાર્થિતાન-
પ્યર્થાન્ કામાનજસ્રં વિતરતિ પરમાનન્દસાન્દ્રાં ગતિં ચ ।
ઇત્થં નિશ્શેષલભ્યો નિરવધિકફલઃ પારિજાતો હરે ત્વં
ક્ષુદ્રં તં શક્રવાટીદ્રુમમભિલષતિ વ્યર્થમર્થિવ્રજોઽયમ્ ॥ ૧-૮॥

કારુણ્યાત્કામમન્યં દદતિ ખલુ પરે સ્વાત્મદસ્ત્વં વિશેષા-
દૈશ્વર્યાદીશતેઽન્યે જગતિ પરજને સ્વાત્મનોઽપીશ્વરસ્ત્વમ્ ।
ત્વય્યુચ્ચૈરારમન્તિ પ્રતિપદમધુરે ચેતનાઃ સ્ફીતભાગ્યાસ્-
ત્વં ચાત્મારામ એવેત્યતુલગુણગણાધાર શૌરે નમસ્તે ॥ ૧-૯॥

ઐશ્વર્યં શઙ્કરાદીશ્વરવિનિયમનં વિશ્વતેજોહરાણાં
તેજસ્સંહારિ વીર્યં વિમલમપિ યશો નિસ્પૃહૈશ્ચોપગીતમ્ ।
અઙ્ગાસઙ્ગા સદા શ્રીરખિલવિદસિ ન ક્વાપિ તે સઙ્ગવાર્તા
તદ્વાતાગારવાસિન્ મુરહર ભગવચ્છબ્દમુખ્યાશ્રયોઽસિ ॥ ૧-૧૦॥

ઇતિ પ્રથમદશકં સમાપ્તમ્ ।

# દ્વિતીયદશકમ્ (૨)

ભગવતઃ સ્વરૂપમાધુર્યં તથા ભક્તિમહત્ત્વમ્ ।
2 Form of the Lord And Greatness of Devotion

સૂર્યસ્પર્ધિકિરીટમૂર્ધ્વતિલકપ્રોદ્ભાસિફાલાન્તરં
કારુણ્યાકુલનેત્રમાર્દ્રહસિતોલ્લાસં સુનાસાપુટમ્ ।
ગણ્ડોદ્યન્મકરાભકુણ્ડલયુગં કણ્ઠોજ્જ્વલત્કૌસ્તુભં
ત્વદ્રૂપં વનમાલ્યહારપટલશ્રીવત્સદીપ્રં ભજે ॥ ૨-૧॥

કેયૂરાઙ્ગદકઙ્કણોત્તમમહારત્નાઙ્ગુલીયાઙ્કિત-
શ્રીમદ્બાહુચતુષ્કસઙ્ગતગદાશઙ્ખારિપઙ્કેરુહામ્ ।
કાઞ્ચિત્કાઞ્ચનકાઞ્ચિલાઞ્છિતલસત્પીતામ્બરાલમ્બિની-
માલમ્બે વિમલામ્બુજદ્યુતિપદાં મૂર્તિં તવાર્તિચ્છિદમ્ ॥ ૨-૨॥

યત્ત્રૈલોક્યમહીયસોઽપિ મહિતં સમ્મોહનં મોહનાત્
કાન્તં કાન્તિનિધાનતોઽપિ મધુરં માધુર્યધુર્યાદપિ ।
સૌન્દર્યોત્તરતોઽપિ સુન્દરતરં ત્વદ્રૂપમાશ્ચર્યતોઽ-
પ્યાશ્ચર્યં ભુવને ન કસ્ય કુતુકં પુષ્ણાતિ વિષ્ણો વિભો ॥ ૨-૩॥

તત્તાદૃઙ્મધુરાત્મકં તવ વપુઃ સમ્પ્રાપ્ય સમ્પન્મયી
સા દેવી પરમોત્સુકા ચિરતરં નાઽસ્તે સ્વભક્તેષ્વપિ ।
તેનાસ્યા બત કષ્ટમચ્યુત વિભો ત્વદ્રૂપમાનોજ્ઞક-
પ્રેમસ્થૈર્યમયાદચાપલબલાચ્ચાપલ્યવાર્તોદભૂત્ ॥ ૨-૪॥

લક્ષ્મીસ્તાવકરામણીયકહૃતૈવેયં પરેષ્વસ્થિરે-
ત્યસ્મિન્નન્યદપિ પ્રમાણમધુના વક્ષ્યામિ લક્ષ્મીપતે ।
યે ત્વદ્ધ્યાનગુણાનુકીર્તનરસાસક્તા હિ ભક્તા જના-
સ્તેષ્વેષા વસતિ સ્થિરૈવ દયિતપ્રસ્તાવદત્તાદરા ॥ ૨-૫॥

એવમ્ભૂતમનોજ્ઞતાનવસુધાનિષ્યન્દસન્દોહનં
ત્વદ્રૂપં પરચિદ્રસાયનમયં ચેતોહરં શૃણ્વતામ્ ।
સદ્યઃ પ્રેરયતે મતિં મદયતે રોમાઞ્ચયત્યઙ્ગકં
વ્યાસિઞ્ચત્યપિ શીતબાષ્પવિસરૈરાનન્દમૂર્છોદ્ભવૈઃ ॥ ૨-૬॥

એવમ્ભૂતતયા હિ ભક્ત્યભિહિતો યોગઃ સ યોગદ્વયાત્
કર્મજ્ઞાનમયાદ્ભૃશોત્તમતરો યોગીશ્વરૈર્ગીયતે ।
સૌન્દર્યૈકરસાત્મકે ત્વયિ ખલુ પ્રેમપ્રકર્ષાત્મિકા
ભક્તિર્નિશ્રમમેવ વિશ્વપુરુષૈર્લભ્યા રમાવલ્લભ ॥ ૨-૭॥

નિષ્કામં નિયતસ્વધર્મચરણં યત્કર્મયોગાભિધં
તદ્દૂરેત્યફલં યદૌપનિષદજ્ઞાનોપલભ્યં પુનઃ ।
તત્ત્વવ્યક્તતયા સુદુર્ગમતરં ચિત્તસ્ય તસ્માદ્વિભો
ત્વત્પ્રેમાત્મકભક્તિરેવ સતતં સ્વાદીયસી શ્રેયસી ॥ ૨-૮॥

અત્યાયાસકરાણિ કર્મપટલાન્યાચર્ય નિર્યન્મલાઃ
બોધે ભક્તિપથેઽથવાપ્યુચિતતામાયાન્તિ કિં તાવતા ।
ક્લિષ્ટ્વા તર્કપથે પરં તવ વપુર્બ્રહ્માખ્યમન્યે પુન-
શ્ચિત્તાર્દ્રત્વમૃતે વિચિન્ત્ય બહુભિઃ સિધ્યન્તિ જન્માન્તરૈઃ ॥ ૨-૯॥

ત્વદ્ભક્તિસ્તુ કથારસામૃતઝરીનિર્મજ્જનેન સ્વયં
સિદ્ધ્યન્તી વિમલપ્રબોધપદવીમક્લેશતસ્તન્વતી ।
સદ્યઃ સિદ્ધિકરી જયત્યયિ વિભો સૈવાસ્તુ મે ત્વત્પદ-
પ્રેમપ્રૌઢિરસાર્દ્રતા દ્રુતતરં વાતાલયાધીશ્વર ॥ ૨-૧૦॥

ઇતિ દ્વિતીયદશકં સમાપ્તમ્ ।

## તૃતીયદશકમ્ (૩)

### ઉત્તમભક્તસ્ય ગુણાઃ ।
### 3 The Qualities of the Perfect Devotee

પઠન્તો નામાનિ પ્રમદભરસિન્ધૌ નિપતિતાઃ
સ્મરન્તો રૂપં તે વરદ કથયન્તો ગુણકથાઃ ।
ચરન્તો યે ભક્તાસ્ત્વયિ ખલુ રમન્તે પરમમૂ-
નહં ધન્યાન્મન્યે સમધિગતસર્વાભિલષિતાન્ ॥ ૩-૧॥

ગદક્લિષ્ટં કષ્ટં તવ ચરણસેવારસભરેઽ-
પ્યનાસક્તં ચિત્તં ભવતિ બત વિષ્ણો કુરુ દયામ્ ।
ભવત્પાદામ્ભોજસ્મરણરસિકો નામનિવહા-
નહં ગાયં ગાયં કુહચન વિવત્સ્યામિ વિજને ॥ ૩-૨॥

કૃપા તે જાતા ચેત્કિમિવ ન હિ લભ્યં તનુભૃતાં
મદીયક્લેશૌઘપ્રશમનદશા નામ કિયતી ।
ન કે કે લોકેઽસ્મિન્નનિશમયિ શોકાભિરહિતા
ભવદ્ભક્તા મુક્તાઃ સુખગતિમસક્તા વિદધતે ॥ ૩-૩॥

મુનિપ્રૌઢા રૂઢા જગતિ ખલુ ગૂઢાત્મગતયો
ભવત્પાદામ્ભોજસ્મરણવિરુજો નારદમુખાઃ ।
ચરન્તીશ સ્વૈરં સતતપરિનિર્ભાતપરચિત્-
સદાનન્દાદ્વૈતપ્રસરપરિમગ્નાઃ કિમપરમ્ ॥ ૩-૪॥

ભવદ્ભક્તિઃ સ્ફીતા ભવતુ મમ સૈવ પ્રશમયે-
દશેષક્લેશૌઘં ન ખલુ હૃદિ સન્દેહકણિકા ।
ન ચેદ્વ્યાસસ્યોક્તિસ્તવ ચ વચનં નૈગમવચો
ભવેન્મિથ્યા રથ્યાપુરુષવચનપ્રાયમખિલમ્ ॥ ૩-૫॥

ભવદ્ભક્તિસ્તાવત્પ્રમુખમધુરા ત્વદ્ગુણરસાત્
કિમપ્યારૂઢા ચેદખિલપરિતાપપ્રશમની ।
પુનશ્ચાન્તે સ્વાન્તે વિમલપરિબોધોદયમિલ-
ન્મહાનન્દાદ્વૈતં દિશતિ કિમતઃ પ્રાર્થ્યમપરમ્ ॥ ૩-૬॥

વિધૂય ક્લેશાન્મે કુરુ ચરણયુગ્મં ધૃતરસં
ભવત્ક્ષેત્રપ્રાપ્તૌ કરમપિ ચ તે પૂજનવિધૌ ।
ભવન્મૂર્ત્યાલોકે નયનમથ તે પાદતુલસી-
પરિઘ્રાણે ઘ્રાણં શ્રવણમપિ તે ચારુચરિતે ॥ ૩-૭॥

પ્રભૂતાધિવ્યાધિપ્રસભચલિતે મામકહૃદિ
ત્વદીયં તદ્રૂપં પરમસુખચિદ્રૂપમુદિયાત્ ।
ઉદઞ્ચદ્રોમાઞ્ચો ગલિતબહુહર્ષાશ્રુનિવહો
યથા વિસ્મર્યાસં દુરુપશમપીડાપરિભવાન્ ॥ ૩-૮॥

મરુદ્ગેહાધીશ ત્વયિ ખલુ પરાઞ્ચોઽપિ સુખિનો
ભવત્સ્નેહી સોઽહં સુબહુ પરિતપ્યે ચ કિમિદમ્ ।

અકીર્તિસ્તે મા ભૂદ્વરદ ગદભારં પ્રશમયન્
ભવદ્ભક્તોત્તંસં ઝટિતિ કુરુ માં કંસદમન ॥ ૩-૯॥

કિમુક્તૈર્ભૂયોભિસ્તવ હિ કરુણા યાવદુદિયા-
દહં તાવદ્દેવ પ્રહિતવિવિધાર્તપ્રલપિતઃ ।
પુરઃ કૢપ્તે પાદે વરદ તવ નેષ્યામિ દિવસાન્
યથાશક્તિ વ્યક્તં નતિનુતિનિષેવા વિરચયન્ ॥ ૩-૧૦॥

ઇતિ તૃતીયદશકં સમાપ્તમ્ ।

## ચતુર્થદશકમ્ (૪)

યોગાભ્યાસઃ તથા યોગસિદ્ધિઃ ।
4 Yoga And Its Attainment

કલ્યતાં મમ કુરુષ્વ તાવતીં કલ્યતે ભવદુપાસનં યયા ।
સ્પષ્ટમષ્ટવિધયોગચર્યયા પુષ્ટયાઽઽશુ તવ તુષ્ટિમાપ્નુયામ્ ॥ ૪-૧॥

બ્રહ્મચર્યદૃઢતાદિભિર્યમૈરાપ્લવાદિનિયમૈશ્ચ પાવિતાઃ ।
કુર્મહે દૃઢમમી સુખાસનં પઙ્કજાદ્યમપિ વા ભવત્પરાઃ ॥ ૪-૨॥

તારમન્તરનુચિન્ત્ય સન્તતં પ્રાણવાયુમભિયમ્ય નિર્મલાઃ ।
ઇન્દ્રિયાણિ વિષયાદથાપહૃત્યાઽઽસ્મહે ભવદુપાસનોન્મુખાઃ ॥ ૪-૩॥

અસ્ફુટે વપુષિ તે પ્રયત્નતો ધારયેમ ધિષણાં મુહુર્મુહુઃ ।
તેન ભક્તિરસમન્તરાર્દ્રતામુદ્વહેમ ભવદઙ્ઘ્રિચિન્તકાઃ ॥ ૪-૪॥

વિસ્ફુટાવયવભેદસુન્દરં ત્વદ્વપુસ્સુચિરશીલનાવશાત્ ।
અશ્રમં મનસિ ચિન્તયામહે ધ્યાનયોગનિરતાસ્ત્વદાશ્રયાઃ ॥ ૪-૫॥

ધ્યાયતાં સકલમૂર્તિમીદૃશીમુન્મિષન્મધુરતાહૃતાત્મનામ્ ।
સાન્દ્રમોદરસરૂપમાન્તરં બ્રહ્મરૂપમયિ તેઽવભાસતે ॥ ૪-૬॥

તત્સમાસ્વદનરૂપિણીં સ્થિતિં ત્વત્સમાધિમયિ વિશ્વનાયક ।
આશ્રિતાઃ પુનરતઃ પરિચ્યુતાવારભેમહિ ચ ધારણાદિકમ્ ॥ ૪-૭॥ (પરિચ્યુતૌ આરભેમહિ)

ઇત્થમભ્યસનનિર્ભરોલ્લસત્ત્વત્પરાત્મસુખકલ્પિતોત્સવાઃ ।
મુક્તભક્તકુલમૌલિતાં ગતાઃ સઞ્ચરેમ શુકનારદાદિવત્ ॥ ૪-૮॥

ત્વત્સમાધિવિજયે તુ યઃ પુનર્મઙ્ક્ષુ મોક્ષરસિકઃ ક્રમેણ વા ।
યોગવશ્યમનિલં ષડાશ્રયૈરુન્નયત્યજ સુષુમ્નયા શનૈઃ ॥ ૪-૯॥

લિઙ્ગદેહમપિ સન્ત્યજન્નથો લીયતે ત્વયિ પરે નિરાગ્રહઃ ।
ઊર્ધ્વલોકકુતુકી તુ મૂર્ધતસ્સાર્ધમેવ કરણૈર્નિરીયતે ॥ ૪-૧૦॥

અગ્નિવાસરવલર્ક્ષપક્ષગૈરુત્તરાયણજુષા ચ દૈવતૈઃ ।
પ્રાપિતો રવિપદં ભવત્પરો મોદવાન્ ધ્રુવપદાન્તમીયતે ॥ ૪-૧૧॥

આસ્થિતોઽથ મહરાલયે યદા શેષવક્ત્રદહનોષ્મણાર્દ્યતે ।
ઈયતે ભવદુપાશ્રયસ્તદા વેધસઃ પદમતઃ પુરૈવ વા ॥ ૪-૧૨॥

તત્ર વા તવ પદેઽથવા વસન્ પ્રાકૃતપ્રલય એતિ મુક્તતામ્ ।
સ્વેચ્છયા ખલુ પુરા વિમુચ્યતે સંવિભિદ્ય જગદણ્ડમોજસા ॥ ૪-૧૩॥

તસ્ય ચ ક્ષિતિપયોમહોઽનિલદ્યોમહત્પ્રકૃતિસપ્તકાવૃતીઃ ।
તત્તદાત્મકતયા વિશન્ સુખી યાતિ તે પદમનાવૃતં વિભો ॥ ૪-૧૪॥

અર્ચિરાદિગતિમીદૃશીં વ્રજન્ વિચ્યુતિં ન ભજતે જગત્પતે ।
સચ્ચિદાત્મક ભવદ્ગુણોદયાનુચ્ચરન્તમનિલેશ પાહિ મામ્ ॥ ૪-૧૫॥

ઇતિ ચતુર્થદશકં સમાપ્તં

## પઞ્ચમદશકમ્ (૫)

### વિરાટ્-પુરુષોત્પત્તિઃ ।
### 5 Cosmic Evoluion

વ્યક્તાવ્યક્તમિદં ન કિઞ્ચિદભવત્પ્રાક્પ્રાકૃતપ્રક્ષયે
માયાયાં ગુણસામ્યરુદ્ધવિકૃતૌ ત્વય્યાગતાયાં લયમ્ ।
નો મૃત્યુશ્ચ તદામૃતં ચ સમભૂન્નાહ્નો ન રાત્રેઃ સ્થિતિ-
સ્તત્રૈકસ્ત્વમશિષ્યથાઃ કિલ પરાનન્દપ્રકાશાત્મના ॥ ૫-૧॥

કાલઃ કર્મગુણાશ્ચ જીવનિવહા વિશ્વં ચ કાર્યં વિભો
ચિલ્લીલારતિમેયુષિ ત્વયિ તદા નિર્લીનતામાયયુઃ ।
તેષાં નૈવ વદન્ત્યસત્વમયિ ભોઃ શક્ત્યાત્મના તિષ્ઠતાં
નો ચેત્ કિં ગગનપ્રસૂનસદૃશાં ભૂયો ભવેત્સમ્ભવઃ ॥ ૫-૨॥

એવં ચ દ્વિપરાર્ધકાલવિગતાવીક્ષાં સિસૃક્ષાત્મિકાં
બિભ્રાણે ત્વયિ ચુક્ષુભે ત્રિભુવનીભાવાય માયા સ્વયમ્ ।
માયાતઃ ખલુ કાલશક્તિરખિલાદૃષ્ટં સ્વભાવોઽપિ ચ
પ્રાદુર્ભૂય ગુણાન્વિકાસ્ય વિદધુસ્તસ્યાસ્સહાયક્રિયામ્ ॥ ૫-૩॥

માયાસન્નિહિતોઽપ્રવિષ્ટવપુષા સાક્ષીતિ ગીતો ભવાન્
ભેદૈસ્તાં પ્રતિબિમ્બતો વિવિશિવાન્ જીવોઽપિ નૈવાપરઃ ।
કાલાદિપ્રતિબોધિતાઽથ ભવતા સઞ્ચોદિતા ચ સ્વયં
માયા સા ખલુ બુદ્ધિતત્ત્વમસૃજદ્યોઽસૌ મહાનુચ્યતે ॥ ૫-૪॥

તત્રાસૌ ત્રિગુણાત્મકોઽપિ ચ મહાન્ સત્ત્વપ્રધાનઃ સ્વયં
જીવેઽસ્મિન્ ખલુ નિર્વિકલ્પમહમિત્યુદ્બોધનિષ્પાદકઃ ।
ચક્રેઽસ્મિન્ સવિકલ્પબોધકમહન્તત્ત્વં મહાન્ ખલ્વસૌ
સમ્પુષ્ટં ત્રિગુણૈસ્તમોઽતિબહુલં વિષ્ણો ભવત્પ્રેરણાત્ ॥ ૫-૫॥

સોઽહં ચ ત્રિગુણક્રમાત્ત્રિવિધતામાસાદ્ય વૈકારિકો
ભૂયસ્તૈજસતામસાવિતિ ભવન્નાદ્યેન સત્ત્વાત્મના ।
દેવાનિન્દ્રિયમાનિનોઽકૃત દિશાવાતાર્કપાશ્યશ્વિનો
વહ્નીન્દ્રાચ્યુતમિત્રકાન્ વિધુવિધિશ્રીરુદ્રશારીરકાન્ ॥ ૫-૬॥

ભૂમન્માનસબુદ્ધ્યહઙ્કૃતિમિલચ્ચિત્તાખ્યવૃત્ત્યન્વિતં
તચ્ચાન્તઃકરણં વિભો તવ બલાત્સત્ત્વાંશ એવાસૃજત્ ।
જાતસ્તૈજસતો દશેન્દ્રિયગણસ્તત્તામસાંશાત્પુન-
સ્તન્માત્રં નભસો મરુત્પુરપતે શબ્દોઽજનિ ત્વદ્બલાત્ ॥ ૫-૭॥

શબ્દાદ્વ્યોમ તતઃ સસર્જિથ વિભો સ્પર્શં તતો મારુતં
તસ્માદ્રૂપમતો મહોઽથ ચ રસં તોયં ચ ગન્ધં મહીમ્ ।
એવં માધવ પૂર્વપૂર્વકલનાદાદ્યાદ્યધર્માન્વિતં
ભૂતગ્રામમિમં ત્વમેવ ભગવન્ પ્રાકાશયસ્તામસાત્ ॥ ૫-૮॥

એતે ભૂતગણાસ્તથેન્દ્રિયગણા દેવાશ્ચ જાતા પૃથઙ્-
નો શેકુર્ભુવનાણ્ડનિર્મિતિવિધૌ દેવૈરમીભિસ્તદા ।

ત્વં નાનાવિધસૂક્તિભિર્નુતગુણસ્તત્ત્વાન્યમૂન્યાવિશં-
શ્ચેષ્ટાશક્તિમુદીર્ય તાનિ ઘટયન્ હૈરણ્યમણ્ડં વ્યધાઃ ॥ ૫-૯॥

અણ્ડં તત્ખલુ પૂર્વસૃષ્ટસલિલેઽતિષ્ઠત્સહસ્રં સમાઃ
નિર્ભિન્દન્નકૃથાશ્ચતુર્દશજગદ્રૂપં વિરાડાહ્વયમ્ ।
સાહસ્રૈઃ કરપાદમૂર્ધનિવહૈર્નિશ્શેષજીવાત્મકો
નિર્ભાતોઽસિ મરુત્પુરાધિપ સ માં ત્રાયસ્વ સર્વામયાત્ ॥ ૫-૧૦॥

ઇતિ પઞ્ચમદશકં સમાપ્તમ્ ।

## ષષ્ઠદશકમ્ (૬)

### વિરાટ્-સ્વરૂપવર્ણનમ્ ।
### 6 The Cosmos as the Form of the Lord

એવં ચતુર્દશજગન્મયતાં ગતસ્ય પાતાલમીશ તવ પાદતલં વદન્તિ ।
પાદોર્ધ્વદેશમપિ દેવ રસાતલં તે ગુલ્ફદ્વયં ખલુ મહાતલમદ્ભુતાત્મન્ ॥ ૬-૧॥

જઙ્ઘે તલાતલમથો સુતલં ચ જાનૂ કિઞ્ચોરુભાગયુગલં વિતલાતલે દ્વે ।
ક્ષોણીતલં જઘનમમ્બરમઙ્ગ નાભિર્વક્ષશ્ચ શક્રનિલયસ્તવ ચક્રપાણે ॥ ૬-૨॥

ગ્રીવા મહસ્તવ મુખં ચ જનસ્તપસ્તુ ભાલં શિરસ્તવ સમસ્તમયસ્ય સત્યમ્ ।
એવં જગન્મયતનો જગદાશ્રિતૈરપ્યન્યૈર્નિબદ્ધવપુષે ભગવન્નમસ્તે ॥ ૬-૩॥

ત્વદ્બ્રહ્મરન્ધ્રપદમીશ્વર વિશ્વકન્દ છન્દાંસિ કેશવ ઘનાસ્તવ કેશપાશાઃ ।
ઉલ્લાસિચિલ્લિયુગલં દ્રુહિણસ્ય ગેહં પક્ષ્માણિ રાત્રિદિવસૌ સવિતા ચ નેત્રે ॥ ૬-૪॥

નિશ્શેષવિશ્વરચના ચ કટાક્ષમોક્ષઃ કર્ણૌ દિશોઽશ્વિયુગલં તવ નાસિકે દ્વે ।
લોભત્રપે ચ ભગવન્નધરોત્તરોષ્ઠૌ તારાગણશ્ચ દશનાઃ શમનશ્ચ દંષ્ટ્રા ॥ ૬-૫॥

માયા વિલાસહસિતં શ્વસિતં સમીરો જિહ્વા જલં વચનમીશ શકુન્તપઙ્ક્તિઃ ।
સિદ્ધાદયસ્સ્વરગણા મુખરન્ધ્રમગ્નિર્દેવા ભુજાઃ સ્તનયુગં તવ ધર્મદેવઃ ॥ ૬-૬॥

પૃષ્ઠં ત્વધર્મ ઇહ દેવ મનસ્સુધાંશુરવ્યક્તમેવ હૃદયામ્બુજમમ્બુજાક્ષ ।
કુક્ષિસ્સમુદ્રનિવહા વસનં તુ સન્ધ્યે શેફઃ પ્રજાપતિરસૌ વૃષણૌ ચ મિત્રઃ ॥ ૬-૭॥

શ્રોણીસ્થલં મૃગગણાઃ પદયોર્નખાસ્તે હસ્ત્યુષ્ટ્રસૈન્ધવમુખા ગમનં તુ કાલઃ ।
વિપ્રાદિવર્ણભવનં વદનાબ્જબાહુચારૂરુયુગ્મચરણં કરુણામ્બુધે તે ॥ ૬-૮॥

સંસારચક્રમયિ ચક્રધર ક્રિયાસ્તે વીર્યં મહાસુરગણોઽસ્થિકુલાનિ શૈલાઃ ।
નાડ્યસ્સરિત્સમુદયસ્તરવશ્ચ રોમ જીયાદિદં વપુરનિર્વચનીયમીશ ॥ ૬-૯॥

ઈદૃગ્જગન્મયવપુસ્તવ કર્મભાજાં કર્માવસાનસમયે સ્મરણીયમાહુઃ ।
તસ્યાન્તરાત્મવપુષે વિમલાત્મને તે વાતાલયાધિપ નમોઽસ્તુ નિરુન્ધિ રોગાન્ ॥ ૬-૧૦॥

ઇતિ ષષ્ઠદશકં સમાપ્તમ્ ॥

## સપ્તમદશકમ્ (૭)

બ્રહ્મણઃ જન્મ, તપઃ તથા વૈકુણ્ઠદર્શનમ્ ॥

7 Bahma's Origin, Penance And Vision of Vaikuntha

એવં દેવ ચતુર્દશાત્મકજગદ્રૂપેણ જાતઃ પુન-
સ્તસ્યોર્ધ્વં ખલુ સત્યલોકનિલયે જાતોઽસિ ધાતા સ્વયમ્ ।
યં શંસન્તિ હિરણ્યગર્ભમખિલત્રૈલોક્યજીવાત્મકં
યોઽભૂત્ સ્ફીતરજોવિકારવિકસન્નાનાસિસૃક્ષારસઃ ॥ ૭-૧॥

સોઽયં વિશ્વવિસર્ગદત્તહૃદયસ્સમ્પશ્યમાનસ્સ્વયં
બોધં ખલ્વનવાપ્ય વિશ્વવિષયં ચિન્તાકુલસ્તસ્થિવાન્ ।
તાવત્ત્વં જગતામ્પતે તપતપેત્યેવં હિ વૈહાયસીં
વાણીમેનમશિશ્રવઃ શ્રુતિસુખાં કુર્વંસ્તપઃપ્રેરણામ્ ॥ ૭-૨॥

કોઽસૌ મામવદત્પુમાનિતિ જલાપૂર્ણે જગન્મણ્ડલે
દિક્ષૂદ્વીક્ષ્ય કિમપ્યનીક્ષિતવતા વાક્યાર્થમુત્પશ્યતા ।
દિવ્યં વર્ષસહસ્રમાત્તતપસા તેન ત્વમારાધિત-
સ્તસ્મૈ દર્શિતવાનસિ સ્વનિલયં વૈકુણ્ઠમેકાદ્ભુતમ્ ॥ ૭-૩॥

માયા યત્ર કદાપિ નો વિકુરુતે ભાતે જગદ્ભ્યો બહિ-
શ્શોકક્રોધવિમોહસાધ્વસમુખા ભાવાસ્તુ દૂરં ગતાઃ ।
સાન્દ્રાનન્દઝરી ચ યત્ર પરમજ્યોતિઃપ્રકાશાત્મકે

તત્તે ધામ વિભાવિતં વિજયતે વૈકુણ્ઠરૂપં વિભો ॥ ૭-૪॥

યસ્મિન્નામ ચતુર્ભુજા હરિમણિશ્યામાવદાતત્વિષો
નાનાભૂષણરત્નદીપિતદિશો રાજદ્વિમાનાલયાઃ ।
ભક્તિપ્રાપ્તતથાવિધોન્નતપદા દીવ્યન્તિ દિવ્યા જના-
સ્તત્તે ધામ નિરસ્તસર્વશમલં વૈકુણ્ઠરૂપં જયેત્ ॥ ૭-૫॥

નાનાદિવ્યવધૂજનૈરભિવૃતા વિદ્યુલ્લતાતુલ્યયા
વિશ્વોન્માદનહૃદ્યગાત્રલતયા વિદ્યોતિતાશાન્તરા ।
ત્વત્પાદામ્બુજસૌરભૈકકુતુકાલ્લક્ષ્મીઃ સ્વયં લક્ષ્યતે
યસ્મિન્ વિસ્મયનીયદિવ્યવિભવં તત્તે પદં દેહિ મે ॥ ૭-૬॥

તત્રૈવં પ્રતિદર્શિતે નિજપદે રત્નાસનાધ્યાસિતં
ભાસ્વત્કોટિલસત્કિરીટકટકાદ્યાકલ્પદીપ્રાકૃતિ ।
શ્રીવત્સાઙ્કિતમાત્તકૌસ્તુભમણિચ્છાયારુણં કારણં
વિશ્વેષાં તવ રૂપમૈક્ષત વિધિસ્તત્તે વિભો ભાતુ મે ॥ ૭-૭॥

કાલામ્ભોદકલાયકોમલરુચીચક્રેણ ચક્રં દિશા-
માવૃણ્વાનમુદારમન્દહસિતસ્યન્દપ્રસન્નાનનમ્ ।
રાજત્કમ્બુગદારિપઙ્કજધરશ્રીમદ્ભુજામણ્ડલં
સ્રષ્ટુસ્તુષ્ટિકરં વપુસ્તવ વિભો મદ્રોગમુદ્વાસયેત્ ॥ ૭-૮॥

દૃષ્ટ્વા સમ્ભૃતસમ્ભ્રમઃ કમલભૂસ્ત્વત્પાદપાથોરુહે
હર્ષાવેશવશંવદો નિપતિતઃ પ્રીત્યા કૃતાર્થીભવન્ ।
જાનાસ્યેવ મનીષિતં મમ વિભો જ્ઞાનં તદાપાદય
દ્વૈતાદ્વૈતભવત્સ્વરૂપપરમિત્યાચષ્ટ તં ત્વાં ભજે ॥ ૭-૯॥

આતામ્રે ચરણે વિનમ્રમથ તં હસ્તેન હસ્તે સ્પૃશન્
બોધસ્તે ભવિતા ન સર્ગવિધિભિર્બન્ધોઽપિ સઞ્જાયતે ।
ઇત્યાભાષ્ય ગિરં પ્રતોષ્ય નિતરાં તચ્ચિત્તગૂઢઃ સ્વયં
સૃષ્ટૌ તં સમુદૈરયસ્સ ભગવન્નુલ્લાસયોલ્લાઘતામ્ ॥ ૭-૧૦॥

ઇતિ સપ્તમદશકં સમાપ્તમ્ ।

# અષ્ટમદશકમ્ (૮)

## પ્રલયવર્ણનમ્ ।
8 Description of Pralaya

એવં તાવત્પ્રાકૃતપ્રક્ષયાન્તે બ્રાહ્મે કલ્પે હ્યાદિમે લબ્ધજન્મા ।
બ્રહ્મા ભૂયસ્ત્વત્ત એવાપ્ય વેદાન્ સૃષ્ટિં ચક્રે પૂર્વકલ્પોપમાનામ્ ॥ ૮-૧॥

સોઽયં ચતુર્યુગસહસ્રમિતાન્યહાનિ તાવન્મિતાશ્ચ રજનીર્બહુશો નિનાય ।
નિદ્રાત્યસૌ ત્વયિ નિલીય સમં સ્વસૃષ્ટૈર્નૈમિત્તિકપ્રલયમાહુરતોઽસ્ય રાત્રિમ્ ॥ ૮-૨॥

અસ્માદૃશાં પુનરહર્મુખકૃત્યતુલ્યાં સૃષ્ટિં કરોત્યનુદિનં સ ભવત્પ્રસાદાત્ ।
પ્રાગ્બ્રાહ્મકલ્પજનુષાં ચ પરાયુષાં તુ સુપ્તપ્રબોધનસમાઽસ્તિ તદાઽપિ સૃષ્ટિઃ ॥ ૮-૩॥

પઞ્ચાશદબ્દમધુના સ્વવયોઽર્ધરૂપમેકં પરાર્ધમતિવૃત્ય હિ વર્તતેઽસૌ ।
તત્રાન્ત્યરાત્રિજનિતાન્કથયામિ ભૂમન્ પશ્ચાદ્દિનાવતરણે ચ ભવદ્વિલાસાન્ ॥ ૮-૪॥

દિનાવસાનેઽથ સરોજયોનિઃ સુષુપ્તિકામસ્ત્વયિ સન્નિલિલ્યે ।
જગન્તિ ચ ત્વજ્જઠરં સમીયુસ્તદેદમેકાર્ણવમાસ વિશ્વમ્ ॥ ૮-૫॥

તવૈવ વેષે ફણિરાજિ શેષે જલૈકશેષે ભુવને સ્મ શેષે ।
આનન્દસાન્દ્રાનુભવસ્વરૂપઃ સ્વયોગનિદ્રાપરિમુદ્રિતાત્મા ॥ ૮-૬॥

કાલાખ્યશક્તિં પ્રલયાવસાને પ્રબોધયેત્યાદિશતા કિલાદૌ ।
ત્વયા પ્રસુપ્તં પરિસુપ્તશક્તિવ્રજેન તત્રાખિલજીવધામ્ના ॥ ૮-૭॥

ચતુર્યુગાણાં ચ સહસ્રમેવં ત્વયિ પ્રસુપ્તે પુનરદ્વિતીયે ।
કાલાખ્યશક્તિઃ પ્રથમપ્રબુદ્ધા પ્રાબોધયત્ત્વાં કિલ વિશ્વનાથ ॥ ૮-૮॥

વિબુધ્ય ચ ત્વં જલગર્ભશાયિન્ વિલોક્ય લોકાનખિલાન્પ્રલીનાન્ ।
તેષ્વેવ સૂક્ષ્માત્મતયા નિજાન્તઃસ્થિતેષુ વિશ્વેષુ દદાથ દૃષ્ટિમ્ ॥ ૮-૯॥

તતસ્ત્વદીયાદયિ નાભિરન્ધ્રાદુદઞ્ચિતં કિઞ્ચન દિવ્યપદ્મમ્ ।
નિલીનનિશ્શેષપદાર્થમાલાસઙ્ક્ષેપરૂપં મુકુલાયમાનમ્ ॥ ૮-૧૦॥

તદેતદમ્ભોરુહકુડ્મલં તે કલેવરાત્તોયપથે પ્રરૂઢમ્ ।
બહિર્નિરીતં પરિતઃ સ્ફુરદ્ભિઃ સ્વધામભિર્ધ્વાન્તમલં ન્યકૃન્તત્ ॥ ૮-૧૧॥

સમ્ફુલ્લપત્રે નિતરાં વિચિત્રે તસ્મિન્ભવદ્વીર્યધૃતે સરોજે ।

સ પદ્મજન્મા વિધિરાવિરાસીત્ સ્વયમ્પ્રબુદ્ધાખિલવેદરાશિઃ ॥ ૮-૧૨ ॥

અસ્મિન્પરાત્મન્ નનુ પાદ્મકલ્પે ત્વમિત્થમુત્થાપિતપદ્મયોનિઃ ।
અનન્તભૂમા મમ રોગરાશિં નિરુન્ધિ વાતાલયવાસ વિષ્ણો ॥ ૮-૧૩ ॥

ઇતિ અષ્ટમદશકં સમાપ્તમ્ ॥

## નવમદશકમ્ (૯)

બ્રહ્મણઃ તપઃ તથા લોકસૃષ્ટિઃ ।
9 Description of Creation

સ્થિતઃ સ કમલોદ્ભવસ્તવ હિ નાભિપઙ્કેરુહે
કુતઃ સ્વિદિદમમ્બુધાવુદિતમિત્યનાલોકયન્ ।
તદીક્ષણકુતૂહલાત્પ્રતિદિશં વિવૃત્તાનન-
શ્ચતુર્વદનતામગાદ્વિકસદષ્ટદૃષ્ટ્યમ્બુજામ્ ॥ ૯-૧ ॥

મહાર્ણવવિઘૂર્ણિતં કમલમેવ તત્કેવલં
વિલોક્ય તદુપાશ્રયં તવ તનું તુ નાલોકયન્ ।
ક એષ કમલોદરે મહતિ નિસ્સહાયો હ્યહં
કુતઃ સ્વિદિદમમ્બુજં સમજનીતિ ચિન્તામગાત્ ॥ ૯-૨ ॥

અમુષ્ય હિ સરોરુહઃ કિમપિ કારણં સમ્ભવે-
દિતિ સ્મ કૃતનિશ્ચયઃ સ ખલુ નાલરન્ધ્રાધ્વના ।
સ્વયોગબલવિદ્યયા સમવરૂઢવાન્પ્રૌઢધીઃ
ત્વદીયમતિમોહનં ન તુ કલેવરં દૃષ્ટવાન્ ॥ ૯-૩ ॥

તતસ્સકલનાલિકાવિવરમાર્ગગો માર્ગયન્
પ્રયસ્ય શતવત્સરં કિમપિ નૈવ સન્દૃષ્ટવાન્ ।
નિવૃત્ય કમલોદરે સુખનિષણ્ણ એકાગ્રધીઃ
સમાધિબલમાદધે ભવદનુગ્રહૈકાગ્રહી ॥ ૯-૪ ॥

શતેન પરિવત્સરૈર્દૃઢસમાધિબન્ધોલ્લસત્-
પ્રબોધવિશદીકૃતઃ સ ખલુ પદ્મિનીસમ્ભવઃ ।

અદૃષ્ટચરમદ્ભુતં તવ હિ રૂપમન્તર્દૃશા
વ્યચષ્ટ પરિતુષ્ટધીર્ભુજગભોગભાગાશ્રયમ્ ॥ ૯-૫॥

કિરીટમુકુટોલ્લસત્કટકહારકેયૂરયુઙ્-
મણિસ્ફુરિતમેખલં સુપરિવીતપીતામ્બરમ્ ।
કલાયકુસુમપ્રભં ગલતલોલ્લસત્કૌસ્તુભં
વપુસ્તદયિ ભાવયે કમલજન્મને દર્શિતમ્ ॥ ૯-૬॥

શ્રુતિપ્રકરદર્શિતપ્રચુરવૈભવ શ્રીપતે
હરે જય જય પ્રભો પદમુપૈષિ દિષ્ટ્યા દૃશોઃ ।
કુરુષ્વ ધિયમાશુ મે ભુવનનિર્મિતૌ કર્મઠા-
મિતિ દ્રુહિણવર્ણિતસ્વગુણબંહિમા પાહિ મામ્ ॥ ૯-૭॥

લભસ્વ ભુવનત્રયીરચનદક્ષતામક્ષતાં
ગૃહાણ મદનુગ્રહં કુરુ તપશ્ચ ભૂયો વિધે ।
ભવત્વખિલસાધની મયિ ચ ભક્તિરત્યુત્કટે-
ત્યુદીર્ય ગિરમાદધા મુદિતચેતસં વેધસમ્ ॥ ૯-૮॥

શતં કૃતતપાસ્તતઃ સ ખલુ દિવ્યસંવત્સરા-
નવાપ્ય ચ તપોબલં મતિબલં ચ પૂર્વાધિકમ્ ।
ઉદીક્ષ્ય કિલ કમ્પિતં પયસિ પઙ્કજં વાયુના
ભવદ્બલવિજૃમ્ભિતઃ પવનપાથસી પીતવાન્ ॥ ૯-૯॥

તવૈવ કૃપયા પુનઃ સરસિજેન તેનૈવ સઃ
પ્રકલ્પ્ય ભુવનત્રયીં પ્રવવૃતે પ્રજાનિર્મિતૌ ।
તથાવિધકૃપાભરો ગુરુમરુત્પુરાધીશ્વર
ત્વમાશુ પરિપાહિ માં ગુરુદયોક્ષિતૈરીક્ષિતૈઃ ॥ ૯-૧૦॥

ઇતિ નવમદશકં સમાપ્તમ્ ॥

## દશમદશકમ્ (૧૦)

### સૃષ્ટિવૈવિધ્યમ્ ।
10 The Variety of Creation

વૈકુણ્ઠ વર્ધિતબલોઽથ ભવત્પ્રસાદા-
દમ્ભોજયોનિરસૃજત્કિલ જીવદેહાન્ ।
સ્થાસ્નૂનિ ભૂરુહમયાનિ તથા તિરશ્ચાં
જાતીર્મનુષ્યનિવહાનપિ દેવભેદાન્ ॥ ૧૦-૧॥

મિથ્યાગ્રહાસ્મિમતિરાગવિકોપભીતિ-
રજ્ઞાનવૃત્તિમિતિ પઞ્ચવિધાં સ સૃષ્ટ્વા ।
ઉદ્દામતામસપદાર્થવિધાનદૂન-
સ્તેને ત્વદીયચરણસ્મરણં વિશુદ્ધ્યૈ ॥ ૧૦-૨॥

તાવત્સસર્જ મનસા સનકં સનન્દં
ભૂયસ્સનાતનમુનિં ચ સનત્કુમારમ્ ।
તે સૃષ્ટિકર્મણિ તુ તેન નિયુજ્યમાના-
સ્ત્વત્પાદભક્તિરસિકા જગૃહુર્ન વાણીમ્ ॥ ૧૦-૩॥

તાવત્પ્રકોપમુદિતં પ્રતિરુન્ધતોઽસ્ય
ભ્રૂમધ્યતોઽજનિ મૃડો ભવદેકદેશઃ ।
નામાનિ મે કુરુ પદાનિ ચ હા વિરિઞ્ચે-
ત્યાદૌ રુરોદ કિલ તેન સ રુદ્રનામા ॥ ૧૦-૪॥

એકાદશાહ્વયતયા ચ વિભિન્નરૂપં
રુદ્રં વિધાય દયિતા વનિતાશ્ચ દત્ત્વા ।
તાવન્ત્યદત્ત ચ પદાનિ ભવત્પ્રણુન્નઃ
પ્રાહ પ્રજાવિરચનાય ચ સાદરં તમ્ ॥ ૧૦-૫॥

રુદ્રાભિસૃષ્ટભયદાકૃતિરુદ્રસઙ્ઘ-
સમ્પૂર્યમાણાભુવનત્રયભીતચેતાઃ ।
મા મા પ્રજાઃ સૃજ તપશ્ચર મઙ્ગલાયે-
ત્યાચષ્ટ તં કમલભૂર્ભવદીરિતાત્મા ॥ ૧૦-૬॥

તસ્યાથ સર્ગરસિકસ્ય મરીચિરત્રિ-
સ્તત્રાઙ્ગિરાઃ ક્રતુમુનિઃ પુલહઃ પુલસ્ત્યઃ ।
અઙ્ગાદજાયત ભૃગુશ્ચ વસિષ્ઠદક્ષૌ
શ્રીનારદશ્ચ ભગવન્ ભવદઙ્ઘ્રિદાસઃ ॥ ૧૦-૭॥

ધર્માદિકાનભિસૃજન્નથ કર્દમં ચ

વાણીં વિધાય વિધિરઙ્ગજસઙ્કુલોઽભૂત્ ।
ત્વદ્બોધિતૈઃ સનકદક્ષમુખૈસ્તનૂજૈ-
રુદ્બોધિતશ્ચ વિરરામ તમો વિમુઞ્ચન્ ॥ ૧૦-૮॥

વેદાન્પુરાણનિવહાનપિ સર્વવિદ્યાઃ
કુર્વન્નિજાનનગણાચ્ચતુરાનનોઽસૌ ।
પુત્રેષુ તેષુ વિનિધાય સ સર્ગવૃદ્ધિ-
મપ્રાપ્નુવંસ્તવ પદામ્બુજમાશ્રિતોઽભૂત્ ॥ ૧૦-૯॥

જાનન્નુપાયમથ દેહમજો વિભજ્ય
સ્ત્રીપુંસભાવમભજન્મનુતદ્વધૂભ્યામ્ ।
તાભ્યાં ચ માનુષકુલાનિ વિવર્ધયંસ્ત્વં
ગોવિન્દ મારુતપુરેશ નિરુન્ધિ રોગાન્ ॥ ૧૦-૧૦॥

ઇતિ દશમદશકં સમાપ્તમ્ ॥

## એકાદશદશકમ્ (૧૧)

સનકાદીનાં વૈકુણ્ઠદર્શનમ્ । હિરણ્યાક્ષસ્ય તથા હિરણ્યકશિપોઃ જનનમ્ ।
11 - Entry of Sanaka And Others Into Vaikuntha and
Birth of Hiranyaksha And Hiranyakashipu

ક્રમેણ સર્ગે પરિવર્ધમાને કદાપિ દિવ્યાઃ સનકાદયસ્તે ।
ભવદ્વિલોકાય વિકુણ્ઠલોકં પ્રપેદિરે મારુતમન્દિરેશ ॥ ૧૧-૧॥

મનોજ્ઞનૈશ્રેયસકાનનાદ્યૈરનેકવાપીમણિમન્દિરૈશ્ચ ।
અનોપમં તં ભવતો નિકેતં મુનીશ્વરાઃ પ્રાપુરતીતકક્ષ્યાઃ ॥ ૧૧-૨॥

ભવદ્દિદૃક્ષૂન્ભવનં વિવિક્ષૂન્દ્વાઃસ્થૌ જયસ્તાન્ વિજયોઽપ્યરુન્ધામ્ ।
તેષાં ચ ચિત્તે પદમાપ કોપઃ સર્વં ભવત્પ્રેરણયૈવ ભૂમન્ ॥ ૧૧-૩॥

વૈકુણ્ઠલોકાનુચિતપ્રચેષ્ટૌ કષ્ટૌ યુવાં દૈત્યગતિં ભજેતમ્ ।
ઇતિ પ્રશપ્તૌ ભવદાશ્રયૌ તૌ હરિસ્મૃતિર્નોઽસ્ત્વિતિ નેમતુસ્તાન્ ॥ ૧૧-૪॥

તદેતદાજ્ઞાય ભવાનવાપ્તઃ સહૈવ લક્ષ્મ્યા બહિરમ્બુજાક્ષ ।

ખગેશ્વરાંસાર્પિતચારુબાહુરાનન્દયંસ્તાનભિરામમૂર્ત્યા ॥ ૧૧-૫॥

પ્રસાદ્ય ગીર્ભિઃ સ્તુવતો મુનીન્દ્રાનનન્યનાથાવથ પાર્ષદૌ તૌ
સંરમ્ભયોગેન ભવૈસ્ત્રિભિર્મામુપેતમિત્યાત્તકૃપં ન્યગાદીઃ ॥ ૧૧-૬॥

ત્વદીયભૃત્યાવથ કાશ્યપાત્તૌ સુરારિવીરાવુદિતૌ દિતૌ દ્વૌ ।
સન્ધ્યાસમુત્પાદનકષ્ટચેષ્ટૌ યમૌ ચ લોકસ્ય યમાવિવાન્યૌ ॥ ૧૧-૭॥

હિરણ્યપૂર્વઃ કશિપુઃ કિલૈકઃ પરો હિરણ્યાક્ષ ઇતિ પ્રતીતઃ ।
ઉભૌ ભવન્નાથમશેષલોકં રુષા ન્યરુન્ધાં નિજવાસનાન્ધૌ ॥ ૧૧-૮॥

તયોર્હિરણ્યાક્ષમહાસુરેન્દ્રો રણાય ધાવન્નનવાપ્તવૈરી ।
ભવત્પ્રિયાં ક્ષ્માં સલિલે નિમજ્ય ચચાર ગર્વાદ્વિનદન્ ગદાવાન્ ॥ ૧૧-૯॥

તતો જલેશાત્સદૃશં ભવન્તં નિશમ્ય બભ્રામ ગવેષયંસ્ત્વામ્ ।
ભક્તૈકદૃશ્યઃ સ કૃપાનિધે ત્વં નિરુન્ધિ રોગાન્ મરુદાલયેશ ॥ ૧૧-૧૦॥

ઇતિ એકાદશદશકં સમાપ્તમ્ ॥

## દ્વાદશદશકમ્ (૧૨)

### વરાહાવતારમ્ ।
### 12 - The Boar Incarnation

સ્વાયમ્ભુવો મનુરથો જનસર્ગશીલો દૃષ્ટ્વા મહીમસમયે સલિલે નિમગ્નામ્ ।
સ્રષ્ટારમાપ શરણં ભવદઙ્ઘ્રિસેવાતુષ્ટાશયં મુનિજનૈઃ સહ સત્યલોકે ॥ ૧૨-૧॥

કષ્ટં પ્રજાઃ સૃજતિ મય્યવનિર્નિમગ્ના સ્થાનં સરોજભવ કલ્પય તત્પ્રજાનામ્ ।
ઇત્યેવમેષ કથિતો મનુના સ્વયમ્ભૂરમ્ભોરુહાક્ષ તવ પાદયુગં વ્યચિન્તીત્ ॥ ૧૨-૨॥

હા હા વિભો જલમહં ન્યપિબં પુરસ્તાદદ્યાપિ મજ્જતિ મહી કિમહં કરોમિ ।
ઇત્થં ત્વદઙ્ઘ્રિયુગલં શરણં યતોઽસ્ય નાસાપુટાત્સમભવઃ શિશુકોલરૂપી ॥ ૧૨-૩॥

અઙ્ગુષ્ઠમાત્રવપુરુત્પતિતઃ પુરસ્તાદ્ભૂયોઽથ કુમ્ભિસદૃશઃ સમજૃમ્ભથાસ્ત્વમ્ ।
અભ્રે તથાવિધમુદીક્ષ્ય ભવન્તમુચ્ચૈર્વિસ્મેરતાં વિધિરગાત્સહ સૂનુભિઃ સ્વૈઃ ॥ ૧૨-૪॥

કોઽસાવચિન્ત્યમહિમા કિટિરુત્થિતો મે નાસાપુટાત્કિમુ ભવેદજિતસ્ય માયા ।

ઇત્થં વિચિન્તયતિ ધાતરિ શૈલમાત્રઃ સદ્યો ભવન્કિલ જગર્જિથ ઘોરઘોરમ્ ॥ ૧૨-૫॥

તં તે નિનાદમુપકર્ણ્ય જનસ્તપઃસ્થાઃ સત્યસ્થિતાશ્ચ મુનયો નુનુવુર્ભવન્તમ્ ।
તત્સ્તોત્રહર્ષુલમનાઃ પરિણદ્ય ભૂયસ્તોયાશયં વિપુલમૂર્તિરવાતરસ્ત્વમ્ ॥ ૧૨-૬॥

ઊર્ધ્વપ્રસારિપરિધૂમ્રવિધૂતરોમા પ્રોત્ક્ષિપ્તવાલધિરવાઙ્મુખઘોરઘોણઃ ।
તૂર્ણપ્રદીર્ણજલદઃ પરિઘૂર્ણદક્ષ્ણા સ્તોતૄન્મુનીન્ શિશિરયન્નવતેરિથ ત્વમ્ ॥ ૧૨-૭॥

અન્તર્જલં તદનુ સઙ્કુલનક્રચક્રં ભ્રામ્યત્તિમિઙ્ગિલકુલં કલુષોર્મિમાલમ્ ।
આવિશ્ય ભીષણરવેણ રસાતલસ્થાનાકમ્પયન્વસુમતીમગવેષયસ્ત્વમ્ ॥ ૧૨-૮॥

દૃષ્ટ્વાઽથ દૈત્યહતકેન રસાતલાન્તે સંવેશિતાં ઝટિતિ કૂટકિટિર્વિભો ત્વમ્ ।
આપાતુકાનવિગણય્ય સુરારિખેટાન્ દંષ્ટ્રાઙ્કુરેણ વસુધામદધાઃ સલીલમ્ ॥ ૧૨-૯॥

અભ્યુદ્ધરન્નથ ધરાં દશનાગ્રલગ્નમુસ્તાઙ્કુરાઙ્કિત ઇવાધિકપીવરાત્મા ।
ઉદ્ધૂતઘોરસલિલાજ્જલધેરુદઞ્ચન્ ક્રીડાવરાહવપુરીશ્વર પાહિ રોગાત્ ॥ ૧૨-૧૦॥

ઇતિ દ્વાદશદશકં સમાપ્તમ્ ॥

## ત્રયોદશદશકમ્ (૧૩)

### હિરણ્યાક્ષવધમ્ ।
### 13 - The Slaying of HiranyakSha

હિરણ્યાક્ષં તાવદ્વરદ ભવદન્વેષણપરં
ચરન્તં સાંવર્તે પયસિ નિજજઙ્ઘાપરિમિતે ।
ભવદ્ભક્તો ગત્વા કપટપટુધીર્નારદમુનિઃ
શનૈરૂચે નન્દન્ દનુજમપિ નિન્દંસ્તવ બલમ્ ॥ ૧૩-૧॥

સ માયાવી વિષ્ણુર્હરતિ ભવદીયાં વસુમતીં
પ્રભો કષ્ટં કષ્ટં કિમિદમિતિ તેનાભિગદિતઃ ।
નદન્ ક્વાસૌ ક્વાસાવિતિ સ મુનિના દર્શિતપથો
ભવન્તં સમ્પ્રાપદ્ધરણિધરમુદ્યન્તમુદકાત્ ॥ ૧૩-૨॥

અહો આરણ્યોઽયં મૃગ ઇતિ હસન્તં બહુતરૈ-

દુરુક્તૈર્વિધ્યન્તં દિતિસુતમવજ્ઞાય ભગવન્ ।
મહીં દૃષ્ટ્વા દંષ્ટ્રાશિરસિ ચકિતાં સ્વેન મહસા
પયોધાવાધાય પ્રસભમુદયુઙ્ક્થા મૃધવિધૌ ॥ ૧૩-૩॥

ગદાપાણૌ દૈત્યે ત્વમપિ હિ ગૃહીતોન્નતગદો
નિયુદ્ધેન ક્રીડન્ઘટઘટરવોદ્ઘુષ્ટવિયતા ।
રણાલોકૌત્સુક્યાન્મિલતિ સુરસઙ્ઘે દ્રુતમમું
નિરુન્ધ્યાઃ સન્ધ્યાતઃ પ્રથમમિતિ ધાત્રા જગદિષે ॥ ૧૩-૪॥

ગદોન્મર્દે તસ્મિંસ્તવ ખલુ ગદાયાં દિતિભુવો
ગદાઘાતાદ્ભૂમૌ ઝટિતિ પતિતાયામહહ ! ભોઃ ! ।
મૃદુસ્મેરાસ્યસ્ત્વં દનુજકુલનિર્મૂલનચણં
મહાચક્રં સ્મૃત્વા કરભુવિ દધાનો રુરુચિષે ॥ ૧૩-૫॥

તતઃ શૂલં કાલપ્રતિમરુષિ દૈત્યે વિસૃજતિ
ત્વયિ છિન્દત્યેનત્કરકલિતચક્રપ્રહરણાત્ ।
સમારુષ્ટો મુષ્ટ્યા સ ખલુ વિતુદંસ્ત્વાં સમતનોત્
ગલન્માયે માયાસ્ત્વયિ કિલ જગન્મોહનકરીઃ ॥ ૧૩-૬॥

ભવચ્ચક્રજ્યોતિષ્કણલવનિપાતેન વિધુતે
તતો માયાચક્રે વિતતઘનરોષાન્ધમનસમ્ ।
ગરિષ્ઠાભિર્મુષ્ટિપ્રહૃતિભિરભિઘ્નન્તમસુરં
સ્વપાદાઙ્ગુષ્ઠેન શ્રવણપદમૂલે નિરવધીઃ ॥ ૧૩-૭॥

મહાકાયસ્સોઽયં તવ કરસરોજપ્રમથિતો
ગલદ્રક્તો વક્ત્રાદપતદૃષિભિઃ શ્લાઘિતહતિઃ ।
તદા ત્વામુદ્દામપ્રમદભરવિદ્યોતિહૃદયા
મુનીન્દ્રાસ્સાન્દ્રાભિઃ સ્તુતિભિરનુવન્નધ્વરતનુમ્ ॥ ૧૩-૮॥

ત્વચિ ચ્છન્દો રોમસ્વપિ કુશગણશ્ચક્ષુષિ ઘૃતં
ચતુર્હોતારોઽઙ્ઘ્રૌ સ્રુગપિ વદને ચોદર ઇડા ।
ગ્રહા જિહ્વાયાં તે પરપુરુષ કર્ણે ચ ચમસા
વિભો સોમો વીર્યં વરદ ગલદેશેઽપ્યુપસદઃ ॥ ૧૩-૯॥

મુનીન્દ્રૈરિત્યાદિસ્તવનમુખરૈર્મોદિતમના
મહીયસ્યા મૂર્ત્યા વિમલતરકીર્ત્યા ચ વિલસન્ ।
સ્વધિષ્ણ્યં સમ્પ્રાપ્તઃ સુખરસવિહારી મધુરિપો

નિરુન્ધ્યા રોગં મે સકલમપિ વાતાલયપતે ॥ ૧૩-૧૦॥

ઇતિ ત્રયોદશદશકં સમાપ્તમ્ ॥

## ચતુર્દશદશકમ્ (૧૪)

કપિલાવતારમ્ ।
14 - The Kapila Incarnation

સમનુસ્મૃતતાવકાઙ્ઘ્રિયુગ્મઃ સ મનુઃ પઙ્કજસમ્ભવાઙ્ગજન્મા ।
નિજમન્તરમન્તરાયહીનં ચરિતં તે કથયન્સુખં નિનાય ॥ ૧૪-૧॥

સમયે ખલુ તત્ર કર્દમાખ્યો દ્રુહિણચ્છાયભવસ્તદીયવાચા ।
ધૃતસર્ગરસો નિસર્ગરમ્યં ભગવંસ્ત્વામયુતં સમાઃ સિષેવે ॥ ૧૪-૨॥

ગરુડોપરિ કાલમેઘકમ્રં વિલસત્કેલિસરોજપાણિપદ્મમ્ ।
હસિતોલ્લસિતાનનં વિભો ત્વં વપુરાવિષ્કુરુષે સ્મ કર્દમાય ॥ ૧૪-૩॥

સ્તુવતે પુલકાવૃતાય તસ્મૈ મનુપુત્રીં દયિતાં નવાપિ પુત્રીઃ ।
કપિલં ચ સુતં સ્વમેવ પશ્ચાત્સ્વગતિં ચાપ્યનુગૃહ્ય નિર્ગતોઽભૂઃ ॥ ૧૪-૪॥

સ મનુશ્શતરૂપયા મહિષ્યા ગુણવત્યા સુતયા ચ દેવહૂત્યા ।
ભવદીરિતનારદોપદિષ્ટસ્સમગાત્કર્દમમાગતિપ્રતીક્ષમ્ ॥ ૧૪-૫॥

મનુનોપહૃતાં ચ દેવહૂતિં તરુણીરત્નમવાપ્ય કર્દમોઽસૌ ।
ભવદર્ચનનિર્વૃતોઽપિ તસ્યાં દૃઢશુશ્રૂષણયા દધૌ પ્રસાદમ્ ॥ ૧૪-૬॥

સ પુનસ્ત્વદુપાસનપ્રભાવાદ્દયિતાકામકૃતે કૃતે વિમાને ।
વનિતાકુલસઙ્કુલો નવાત્મા વ્યહરદ્દેવપથેષુ દેવહૂત્યા ॥ ૧૪-૭॥

શતવર્ષમથ વ્યતીત્ય સોઽયં નવ કન્યાઃ સમવાપ્ય ધન્યરૂપાઃ ।
વનયાનસમુદ્યતોઽપિ કાન્તાહિતકૃત્ત્વજ્જનનોત્સુકો ન્યવાત્સીત્ ॥ ૧૪-૮॥

નિજભર્તૃગિરા ભવન્નિષેવા નિરતાયામથ દેવ દેવહૂત્યામ્ ।
કપિલસ્ત્વમજાયથા જનાનાં પ્રથયિષ્યન્પરમાત્મતત્ત્વવિદ્યામ્ ॥ ૧૪-૯॥

વનમેયુષિ કર્દમે પ્રસન્ને મતસર્વસ્વમુપાદિશજ્જનન્યૈ ।

કપિલાત્મક વાયુમન્દિરેશ ત્વરિતં ત્વં પરિપાહિ માં ગદૌઘાત્ ॥ ૧૪-૧૦॥

ઇતિ ચતુર્દશદશકં સમાપ્તમ્ ॥

## પઞ્ચદશદશકમ્ (૧૫)

### કપિલોપદેશમ્ ।
### 15 - The Teachings of Kapila

મતિરિહ ગુણસક્તા બન્ધકૃત્તેષ્વસક્તા
ત્વમૃતકૃદુપરુન્ધે ભક્તિયોગસ્તુ સક્તિમ્ ।
મહદનુગમલભ્યા ભક્તિરેવાત્ર સાધ્યા
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૧॥

પ્રકૃતિમહદહઙ્કારાશ્ચ માત્રાશ્ચ ભૂતા-
ન્યપિ હૃદપિ દશાક્ષી પૂરુષઃ પઞ્ચવિંશઃ ।
ઇતિ વિદિતવિભાગો મુચ્યતેઽસૌ પ્રકૃત્યા
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૨॥

પ્રકૃતિગતગુણૌઘૈર્નાજ્યતે પૂરુષોઽયં
યદિ તુ સજતિ તસ્યાં તદ્ગુણાસ્તં ભજેરન્ ।
મદનુભજનતત્ત્વાલોચનૈઃ સાપ્યપેયાત્
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૩॥

વિમલમતિરુપાત્તૈરાસનાદ્યૈર્મદઙ્ગં
ગરુડસમધિરૂઢં દિવ્યભૂષાયુધાઙ્કમ્ ।
રુચિતુલિતતમાલં શીલયેતાનુવેલં
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૪॥

મમ ગુણગણલીલાકર્ણનૈઃ કીર્તનાદ્યૈઃ
મયિ સુરસરિદોઘપ્રખ્યચિત્તાનુવૃત્તિઃ ।
ભવતિ પરમભક્તિઃ સા હિ મૃત્યોર્વિજેત્રી
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૫॥

અહહ બહુલહિંસાસઞ્ચિતાર્થૈઃ કુટુમ્બં
પ્રતિદિનમનુપુષ્ણન્ સ્ત્રીજિતો બાલલાલી ।
વિશતિ હિ ગૃહસક્તો યાતનાં મય્યભક્તઃ
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૬॥

યુવતિજઠરખિન્નો જાતબોધોઽપ્યકાણ્ડે
પ્રસવગલિતબોધઃ પીડયોલ્લઙ્ઘ્ય બાલ્યમ્ ।
પુનરપિ બત મુહ્યત્યેવ તારુણ્યકાલે
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૭॥

પિતૃસુરગણયાજી ધાર્મિકો યો ગૃહસ્થઃ
સ ચ નિપતતિ કાલે દક્ષિણાધ્વોપગામી ।
મયિ નિહિતમકામં કર્મ તૂદક્પથાર્થં
કપિલતનુરિતિ ત્વં દેવહૂત્યૈ ન્યગાદીઃ ॥ ૧૫-૮॥

ઇતિ સુવિદિતવેદ્યાં દેવ હે દેવહૂતિં
કૃતનુતિમનુગૃહ્ય ત્વં ગતો યોગિસઙ્ઘૈઃ ।
વિમલમતિરથાઽસૌ ભક્તિયોગેન મુક્તા
ત્વમપિ જનહિતાર્થં વર્તસે પ્રાગુદીચ્યામ્ ॥ ૧૫-૯॥

પરમ કિમુ બહૂક્ત્યા ત્વત્પદામ્ભોજભક્તિં
સકલભયવિનેત્રીં સર્વકામોપનેત્રીમ્ ।
વદસિ ખલુ દૃઢં ત્વં તદ્વિધૂયામયાન્મે
ગુરુપવનપુરેશ ત્વય્યુપાધત્સ્વ ભક્તિમ્ ॥ ૧૫-૧૦॥

ઇતિ પઞ્ચદશદશકં સમાપ્તમ્ ॥

## ષોડશદશકમ્ (૧૬)

નરનારાયણાવતારં તથા દક્ષયાગઃ ।
16 - Nara Narayana And DakShayaga

દક્ષો વિરિઞ્ચતનયોઽથ મનોસ્તનૂજાં લબ્ધ્વા પ્રસૂતિમિહ ષોડશ ચાપ કન્યાઃ ।

ધર્મે ત્રયોદશ દદૌ પિતૃષુ સ્વધાં ચ સ્વાહાં હવિર્ભુજિ સતીં ગિરિશે ત્વદંશે ॥ ૧૬-૧॥

મૂર્તિર્હિ ધર્મગૃહિણી સુષુવે ભવન્તં નારાયણં નરસખં મહિતાનુભાવમ્ ।
યજ્જન્મનિ પ્રમુદિતાઃ કૃતતૂર્યઘોષાઃ પુષ્પોત્કરાન્પ્રવવૃષુર્નુનુવુઃ સુરૌઘાઃ ॥ ૧૬-૨॥

દૈત્યં સહસ્રકવચં કવચૈઃ પરીતં સાહસ્રવત્સરતપસ્સમરાભિલવ્યૈઃ ।
પર્યાયનિર્મિતતપસ્સમરૌ ભવન્તૌ શિષ્ટૈકકઙ્કટમમું ન્યહતાં સલીલમ્ ॥ ૧૬-૩॥

અન્વાચરન્નુપદિશન્નપિ મોક્ષધર્મં ત્વં ભ્રાતૃમાન્ બદરિકાશ્રમમધ્યવાત્સીઃ ।
શક્રોઽથ તે શમતપોબલનિસ્સહાત્મા દિવ્યાઙ્ગનાપરિવૃતં પ્રજિઘાય મારમ્ ॥ ૧૬-૪॥

કામો વસન્તમલયાનિલબન્ધુશાલી કાન્તાકટાક્ષવિશિખૈર્વિકસદ્વિલાસૈઃ ।
વિધ્યન્મુહુર્મુહુરકમ્પમુદીક્ષ્ય ચ ત્વાં ભીતસ્ત્વાયાથ જગદે મૃદુહાસભાજા ॥ ૧૬-૫॥

ભીત્યાલમઙ્ગજવસન્તસુરાઙ્ગના વો મન્માનસન્ત્વિહ જુષધ્વમિતિ બ્રુવાણઃ ।
ત્વં વિસ્મયેન પરિતઃ સ્તુવતામથૈષાં પ્રાદર્શયઃ સ્વપરિચારકકાતરાક્ષીઃ ॥ ૧૬-૬॥

સમ્મોહનાય મિલિતા મદનાદયસ્તે ત્વદ્દાસિકાપરિમલૈઃ કિલ મોહમાપુઃ ।
દત્તાં ત્વયા ચ જગૃહુસ્ત્રપયૈવ સર્વસ્વર્વાસિગર્વશમનીં પુનરુર્વશીં તામ્ ॥ ૧૬-૭॥

દૃષ્ટ્વોર્વશીં તવ કથાં ચ નિશમ્ય શક્રઃ પર્યાકુલોઽજનિ ભવન્મહિમાવમર્શાત્ ।
એવં પ્રશાન્તરમણીયતરાવતાતરાત્ત્વત્તોઽધિકો વરદ કૃષ્ણતનુસ્ત્વમેવ ॥ ૧૬-૮॥

દક્ષસ્તુ ધાતુરતિલાલનયા રજોઽન્ધો નાત્યાદૃતસ્ત્વયિ ચ કષ્ટમશાન્તિરાસીત્ ।
યેન વ્યરુન્ધ સ ભવત્તનુમેવ શર્વં યજ્ઞે ચ વૈરપિશુને સ્વસુતાં વ્યમાનીત્ ॥ ૧૬-૯॥

ક્રુદ્ધે શમર્દિતમખઃ સ તુ કૃત્તશીર્ષો દેવપ્રસાદિતહરાદથ લબ્ધજીવઃ ।
ત્વત્પૂરિતક્રતુવરઃ પુનરાપ શાન્તિં સ ત્વં પ્રશાન્તિકર પાહિ મરુત્પુરેશ ॥ ૧૬-૧૦॥

ઇતિ ષોડશદશકં સમાપ્તમ્ ॥

## સપ્તદશદશકમ્ (૧૭)

### ધ્રુવચરિતમ્ ।
17 - The Story of Dhruva

ઉત્તાનપાદનૃપતેર્મનુનન્દનસ્ય જાયા બભૂવ સુરુચિર્નિતરામભીષ્ટા ।
અન્યા સુનીતિરિતિ ભર્તુરનાદૃતા સા ત્વામેવ નિત્યમગતિઃ શરણં ગતાઽભૂત્ ॥ ૧૭-૧॥

અઙ્કે પિતુઃ સુરુચિપુત્રકમુત્તમં તં દૃષ્ટ્વા ધ્રુવઃ કિલ સુનીતિસુતોઽધિરોક્ષ્યન્ ।
આચિક્ષિપે કિલ શિશુઃ સુતરાં સુરુચ્યા દુસ્સન્ત્યજા ખલુ ભવદ્વિમુખૈરસૂયા ॥ ૧૭-૨॥

ત્વન્મોહિતે પિતરિ પશ્યતિ દારવશ્યે દૂરં દુરુક્તિનિહતઃ સ ગતો નિજામ્બામ્ ।
સાઽપિ સ્વકર્મગતિસન્તરણાય પુંસાં ત્વત્પાદમેવ શરણં શિશવે શશંસ ॥ ૧૭-૩॥

આકર્ણ્ય સોઽપિ ભવદર્ચનનિશ્ચિતાત્મા માની નિરેત્ય નગરાત્કિલ પઞ્ચવર્ષઃ ।
સન્દૃષ્ટનારદનિવેદિતમન્ત્રમાર્ગસ્ત્વામારરાધ તપસા મધુકાનનાન્તે ॥ ૧૭-૪॥

તાતે વિષણ્ણહૃદયે નગરીં ગતેન શ્રીનારદેન પરિસાન્ત્વિતચિત્તવૃત્તૌ ।
બાલસ્ત્વદર્પિતમનાઃ ક્રમવર્ધિતેન નિન્યે કઠોરતપસા કિલ પઞ્ચ માસાન્ ॥ ૧૭-૫॥

તાવત્તપોબલનિરુચ્છ્વસિતે દિગન્તે દેવાર્થિતસ્ત્વમુદયત્કરુણાર્દ્રચેતાઃ ।
ત્વદ્રૂપચિદ્રસનિલીનમતેઃ પુરસ્તાદાવિર્બભૂવિથ વિભો ગરુડાધિરૂઢઃ ॥ ૧૭-૬॥

ત્વદ્દર્શનપ્રમદભારતરઙ્ગિતં તં દૃગ્ભ્યાં નિમગ્નમિવ રૂપરસાયને તે ।
તુષ્ટૂષમાણમવગમ્ય કપોલદેશે સંસ્પૃષ્ટવાનસિ દરેણ તથાઽઽદરેણ ॥ ૧૭-૭॥

તાવદ્વિબોધવિમલં પ્રણુવન્તમેનમાભાષથાસ્ત્વમવગમ્ય તદીયભાવમ્ ।
રાજ્યં ચિરં સમનુભૂય ભજસ્વ ભૂયઃ સર્વોત્તરં ધ્રુવ પદં વિનિવૃત્તિહીનમ્ ॥ ૧૭-૮॥

ઇત્યૂચિષિ ત્વયિ ગતે નૃપનન્દનોઽસાવાનન્દિતાખિલજનો નગરીમુપેતઃ ।
રેમે ચિરં ભવદનુગ્રહપૂર્ણકામસ્તાતે ગતે ચ વનમાદૃતરાજ્યભારઃ ॥ ૧૭-૯॥

યક્ષેણ દેવ નિહતે પુનરુત્તમેઽસ્મિન્ યક્ષૈઃ સ યુદ્ધનિરતો વિરતો મનૂક્ત્યા ।
શાન્ત્યા પ્રસન્નહૃદયાદ્ધનદાદુપેતાત્ ત્વદ્ભક્તિમેવ સુદૃઢામવૃણોન્મહાત્મા ॥ ૧૭-૧૦॥

અન્તે ભવત્પુરુષનીતવિમાનયાતો માત્રા સમં ધ્રુવપદે મુદિતોઽયમાસ્તે ।
એવં સ્વભૃત્યજનપાલનલોલધીસ્ત્વં વાતાલયાધિપ નિરુન્ધિ મમામયૌઘાન્ ॥ ૧૭-૧૧॥

ઇતિ સપ્તદશદશકં સમાપ્તમ્ ॥

## અષ્ટાદશદશકમ્ (૧૮)

### પૃથુચરિતમ્ ।
### 18 - The Story of Prithu

જાતસ્ય ધ્રુવકુલ એવ તુઙ્ગકીર્તેરઙ્ગસ્ય વ્યજનિ સુતઃ સ વેનનામા ।
તદ્દોષવ્યથિતમતિઃ સ રાજવર્યસ્ત્વત્પાદે નિહિતમના વનં ગતોઽભૂત્ ॥ ૧૮-૧॥

પાપોઽપિ ક્ષિતિતલપાલનાય વેનઃ પૌરાદ્યૈરુપનિહિતઃ કઠોરવીર્યઃ ।
સર્વેભ્યો નિજબલમેવ સમ્પ્રશંસન્ ભૂચક્રે તવ યજનાન્યયં ન્યરૌત્સીત્ ॥ ૧૮-૨॥

સમ્પ્રાપ્તે હિતકથનાય તાપસૌઘે મત્તોઽન્યો ભુવનપતિર્ન કશ્ચનેતિ ।
ત્વન્નિન્દાવચનપરો મુનીશ્વરૈસ્તૈઃ શાપાગ્નૌ શલભદશામનાયિ વેનઃ ॥ ૧૮-૩॥

તન્નાશાત્ખલજનભીરુકૈર્મુનીન્દ્રૈસ્તન્માત્રા ચિરપરિરક્ષિતે તદઙ્ગે ।
ત્યક્તાઘે પરિમથિતાદથોરુદણ્ડાદ્દોર્દણ્ડે પરિમથિતે ત્વમાવિરાસીઃ ॥ ૧૮-૪॥

વિખ્યાતઃ પૃથુરિતિ તાપસોપદિષ્ટૈઃ સૂતાદ્યૈઃ પરિણુતભાવિભૂરિવીર્યઃ ।
વેનાર્ત્યા કબલિતસમ્પદં ધરિત્રીમાક્રાન્તાં નિજધનુષા સમામકાર્ષીઃ ॥ ૧૮-૫॥

ભૂયસ્તાં નિજકુલમુખ્યવત્સયુક્તૈર્દેવાદ્યૈઃ સમુચિતચારુભાજનેષુ ।
અન્નાદીન્યભિલષિતાનિ યાનિ તાનિ સ્વચ્છન્દં સુરભિતનૂમદૂદુહસ્ત્વમ્ ॥ ૧૮-૬॥

આત્માનં યજતિ મખૈસ્ત્વયિ ત્રિધામન્નારબ્ધે શતતમવાજિમેધયાગે ।
સ્પર્ધાલુઃ શતમખ એત્ય નીચવેષો હૃત્વાઽશ્વં તવ તનયાત્ પરાજિતોઽભૂત્ ॥ ૧૮-૭॥

દેવેન્દ્રં મુહુરિતિ વાજિનં હરન્તં વહ્નૌ તં મુનિવરમણ્ડલે જુહૂષૌ ।
રુન્ધાને કમલભવે ક્રતોઃ સમાપ્તૌ સાક્ષાત્ત્વં મધુરિપુમૈક્ષથાઃ સ્વયં સ્વમ્ ॥ ૧૮-૮॥

તદ્દત્તં વરમુપલભ્ય ભક્તિમેકાં ગઙ્ગાન્તે વિહિતપદઃ કદાપિ દેવ ।
સત્રસ્થં મુનિનિવહં હિતાનિ શંસન્નૈક્ષિષ્ઠાઃ સનકમુખાન્ મુનીન્ પુરસ્તાત્ ॥ ૧૮-૯॥

વિજ્ઞાનં સનકમુખોદિતં દધાનઃ સ્વાત્માનં સ્વયમગમો વનાન્તસેવી ।
તત્તાદૃક્પૃથુવપુરીશ સત્વરં મે રોગૌઘં પ્રશમય વાતગેહવાસિન્ ॥ ૧૮-૧૦॥

ઇતિ અષ્ટાદશદશકં સમાપ્તમ્ ॥

## એકોનવિંશદશકમ્ (૧૯)

### પ્રચેતૃણાં ચરિતમ્ ।
### 19 -The Story of Pracetas

પૃથોસ્તુ નપ્તા પૃથુધર્મકર્મઠઃ પ્રાચીનબર્હિર્યુવતૌ શતદ્રુતૌ ।
પ્રચેતસો નામ સુચેતસઃ સુતાનજીજનત્ત્વત્કરુણાઙ્કુરાનિવ ॥ ૧૯-૧॥

પિતુઃ સિસૃક્ષાનિરતસ્ય શાસનાદ્ભવત્તપસ્યાભિરતા દશાપિ તે ।
પયોનિધિં પશ્ચિમમેત્ય તત્તટે સરોવરં સન્દદૃશુર્મનોહરમ્ ॥ ૧૯-૨॥

તદા ભવત્તીર્થમિદં સમાગતો ભવો ભવત્સેવકદર્શનાદૃતઃ ।
પ્રકાશમાસાદ્ય પુરઃ પ્રચેતસામુપાદિશદ્ભક્તતમસ્તવસ્તવમ્ ॥ ૧૯-૩॥

સ્તવં જપન્તસ્તમમી જલાન્તરે ભવન્તમાસેવિષતાયુતં સમાઃ ।
ભવત્સુખાસ્વાદરસાદમીષ્વિયાન્બભૂવ કાલો ધ્રુવવન્ન શીઘ્રતા ॥ ૧૯-૪॥

તપોભિરેષામતિમાત્રવર્ધિભિઃ સ યજ્ઞહિંસાનિરતોઽપિ પાવિતઃ ।
પિતાઽપિ તેષાં ગૃહયાતનારદપ્રદર્શિતાત્મા ભવદાત્મતાં યયૌ ॥ ૧૯-૫॥

કૃપાબલેનૈવ પુરઃ પ્રચેતસાં પ્રકાશમાગાઃ પતગેન્દ્રવાહનઃ ।
વિરાજિ ચક્રાદિવરાયુધાંશુભિર્ભુજાભિરષ્ટાભિરુદઞ્ચિતદ્યુતિઃ ॥ ૧૯-૬॥

પ્રચેતસાં તાવદયાચતામપિ ત્વમેવ કારુણ્યભરાદ્વરાનદાઃ ।
ભવદ્વિચિન્તાઽપિ શિવાય દેહિનાં ભવત્વસૌ રુદ્રનુતિશ્ચ કામદા ॥ ૧૯-૭॥

અવાપ્ય કાન્તાં તનયાં મહીરુહાં તયા રમધ્વં દશલક્ષવત્સરીમ્ ।
સુતોઽસ્તુ દક્ષો નનુ તત્ક્ષણાચ્ચ માં પ્રયાસ્યથેતિ ન્યગદો મુદૈવ તાન્ ॥ ૧૯-૮॥

તતશ્ચ તે ભૂતલરોધિનસ્તરૂન્ક્રુધા દહન્તો દ્રુહિણેન વારિતાઃ ।
દ્રુમૈશ્ચ દત્તાં તનયામવાપ્ય તાં ત્વદુક્તકાલં સુખિનોઽભિરેમિરે ॥ ૧૯-૯॥

અવાપ્ય દક્ષં ચ સુતં કૃતાધ્વરાઃ પ્રચેતસો નારદલબ્ધયા ધિયા ।
અવાપુરાનન્દપદં તથાવિધસ્ત્વમીશ વાતાલયનાથ પાહિમામ્ ॥ ૧૯-૧૦॥

ઇતિ એકોનવિંશદશકં સમાપ્તમ્ ॥

# વિંશદશકમ્ (૨૦)

## ઋષભયોગીશ્વરચરિતમ્ ।
20 - The Story of Rishabhayogishvara

પ્રિયવ્રતસ્ય પ્રિયપુત્રભૂતાદાગ્નીધ્રરાજાદુદિતો હિ નાભિઃ ।
ત્વાં દૃષ્ટવાનિષ્ટદમિષ્ટિમધ્યે તવૈવ તુષ્ટ્યૈ કૃતયજ્ઞકર્મા ॥ ૨૦-૧॥

અભિષ્ટુતસ્તત્ર મુનીશ્વરૈસ્ત્વં રાજ્ઞઃ સ્વતુલ્યં સુતમર્થ્યમાનઃ ।
સ્વયં જનિષ્યેઽહમિતિ બ્રુવાણસ્તિરોદધા બર્હિષિ વિશ્વમૂર્તે ॥ ૨૦-૨॥

નાભિપ્રિયાયામથ મેરુદેવ્યાં ત્વમંશતોઽભૂરૃષભાભિધાનઃ ।
અલોકસામાન્યગુણપ્રભાવપ્રભાવિતાશેષજનપ્રમોદઃ ॥ ૨૦-૩॥

ત્વયિ ત્રિલોકીભૃતિ રાજ્યભારં નિધાય નાભિઃ સહ મેરુદેવ્યા ।
તપોવનં પ્રાપ્ય ભવન્નિષેવી ગતઃ કિલાનન્દપદં પદં તે ॥ ૨૦-૪॥

ઇન્દ્રસ્ત્વદુત્કર્ષકૃતાદમર્ષાદ્વવર્ષ નાસ્મિન્નજનાભવર્ષે ।
યદા તદા ત્વં નિજયોગશક્ત્યા સ્વવર્ષમેનદ્વ્યદધાઃ સુવર્ષમ્ ॥ ૨૦-૫॥

જિતેન્દ્રદત્તાં કમનીં જયન્તીમથોદ્વહન્નાત્મરતાશયોઽપિ ।
અજીજનસ્તત્ર શતં તનૂજાનેષાં ક્ષિતીશો ભરતોઽગ્રજન્મા ॥ ૨૦-૬॥

નવાભવન્યોગિવરા નવાન્યે ત્વપાલયન્ભારતવર્ષખણ્ડાન્ ।
સૈકા ત્વશીતિસ્તવ શેષપુત્રાસ્તપોબલાદ્ભૂસુરભૂયમીયુઃ ॥ ૨૦-૭॥

ઉક્ત્વા સુતેભ્યોઽથ મુનીન્દ્રમધ્યે વિરક્તિભક્ત્યન્વિતમુક્તિમાર્ગમ્ ।
સ્વયં ગતઃ પારમહંસ્યવૃત્તિમધા જડોન્મત્તપિશાચચર્યામ્ ॥ ૨૦-૮॥

પરાત્મભૂતોઽપિ પરોપદેશં કુર્વન્ભવાન્સર્વનિરસ્યમાનઃ ।
વિકારહીનો વિચચાર કૃત્સ્નાં મહીમહીનાત્મરસાભિલીનઃ ॥ ૨૦-૯॥

શયુવ્રતં ગોમૃગકાકચર્યાં ચિરં ચરન્નાપ્ય પરં સ્વરૂપમ્ ।
દવાહૃતાઙ્ગઃ કુટકાચલે ત્વં તાપાન્મમાપાકુરુ વાતનાથ ॥ ૨૦-૧૦॥

ઇતિ વિંશદશકં સમાપ્તમ્ ॥

# એકવિંશદશકમ્ (૨૧)

નવ વર્ષાઃ તથા સપ્તદ્વીપાઃ । જમ્બૂદ્વીપાદિષુ ઉપાસનાપદ્ધતિઃ ।
21 - Mode of Worship In Jambudvipa Etc

મધ્યોદ્ભવે ભુવ ઇલાવૃતનામ્નિ વર્ષે ગૌરીપ્રધાનવનિતાજનમાત્રભાજિ ।
શર્વેણ મન્ત્રનુતિભિઃ સમુપાસ્યમાનં સઙ્કર્ષણાત્મકમધીશ્વર સંશ્રયે ત્વામ્ ॥ ૨૧-૧॥

ભદ્રાશ્વનામક ઇલાવૃતપૂર્વવર્ષે ભદ્રશ્રવોભિરૃષિભિઃ પરિણૂયમાનમ્ ।
કલ્પાન્તગૂઢનિગમોદ્ધરણપ્રવીણં ધ્યાયામિ દેવ હયશીર્ષતનું ભવન્તમ્ ॥ ૨૧-૨॥

ધ્યાયામિ દક્ષિણગતે હરિવર્ષવર્ષે પ્રહ્લાદમુખ્યપુરુષૈઃ પરિષેવ્યમાણમ્ ।
ઉત્તુઙ્ગશાન્તધવલાકૃતિમેકશુદ્ધજ્ઞાનપ્રદં નરહરિં ભગવન્ ભવન્તમ્ ॥ ૨૧-૩॥

વર્ષે પ્રતીચિ લલિતાત્મનિ કેતુમાલે લીલાવિશેષલલિતસ્મિતશોભનાઙ્ગમ્ ।
લક્ષ્મ્યા પ્રજાપતિસુતૈશ્ચ નિષેવ્યમાણં તસ્યાઃ પ્રિયાય ધૃતકામતનું ભજે ત્વામ્ ॥ ૨૧-૪॥

રમ્યે હ્યુદીચિ ખલુ રમ્યકનામ્નિ વર્ષે તદ્વર્ષનાથમનુવર્યસપર્યમાણમ્ ।
ભક્તૈકવત્સલમમત્સરહૃત્સુ ભાન્તં મત્સ્યાકૃતિં ભુવનનાથ ભજે ભવન્તમ્ ॥ ૨૧-૫॥

વર્ષં હિરણ્મયસમાહ્વયમૌત્તરાહમાસીનમદ્રિધૃતિકર્મઠકામઠાઙ્ગમ્ ।
સંસેવતે પિતૃગણપ્રવરોઽર્યમાયં તં ત્વાં ભજામિ ભગવન્ પરચિન્મયાત્મન્ ॥ ૨૧-૬॥

કિં ચોત્તરેષુ કુરુષુ પ્રિયયા ધરણ્યા સંસેવિતો મહિતમન્ત્રનુતિપ્રભેદૈઃ ।
દંષ્ટ્રાગ્રઘૃષ્ટઘનપૃષ્ઠગરિષ્ઠવર્ષ્મા ત્વં પાહિ વિજ્ઞનુતયજ્ઞવરાહમૂર્તે ॥ ૨૧-૭॥

યામ્યાં દિશં ભજતિ કિમ્પુરુષાખ્યવર્ષે સંસેવિતો હનુમતા દૃઢભક્તિભાજા ।
સીતાભિરામપરમાદ્ભુતરૂપશાલી રામાત્મકઃ પરિલસન્પરિપાહિ વિષ્ણો ॥ ૨૧-૮॥

શ્રીનારદેન સહ ભારતખણ્ડમુખ્યૈસ્ત્વં સાઙ્ખ્યયોગનુતિભિઃ સમુપાસ્યમાનઃ ।
આકલ્પકાલમિહ સાધુજનાભિરક્ષી નારાયણો નરસખઃ પરિપાહિ ભૂમન્ ॥ ૨૧-૯॥

પ્લાક્ષેઽર્કરૂપમયિ શાલ્મલ ઇન્દુરૂપં દ્વીપે ભજન્તિ કુશનામનિ વહ્નિરૂપમ્ ।
ક્રૌઞ્ચેઽમ્બુરૂપમથ વાયુમયં ચ શાકે ત્વાં બ્રહ્મરૂપમયિ પુષ્કરનામ્નિ લોકાઃ ॥ ૨૧-૧૦॥

સર્વૈર્ધ્રુવાદિભિરુડુપ્રકરૈર્ગ્રહૈશ્ચ પુચ્છાદિકેષ્વવયવેષ્વભિકલ્પ્યમાનૈઃ ।
ત્વં શિંશુમારવપુષા મહતામુપાસ્યઃ સન્ધ્યાસુ રુન્ધિ નરકં મમ સિન્ધુશાયિન્ ॥ ૨૧-૧૧॥

પાતાલમૂલભુવિ શેષતનું ભવન્તં લોલૈકકુણ્ડલવિરાજિસહસ્રશીર્ષમ્ ।

નીલામ્બરં ધૃતહલં ભુજગાઙ્ગનાભિર્જુષ્ટં ભજે હર ગદાન્ગુરુગેહનાથ ॥ ૨૧-૧૨॥

ઇતિ એકવિંશદશકં સમાપ્તમ્ ॥

## દ્વાવિંશતિદશકમ્ (૨૨)

### અજામિલોપાખ્યાનમ્ ।
### 22 - The Story of Ajamila

અજામિલો નામ મહીસુરઃ પુરા ચરન્વિભો ધર્મપથાન્ ગૃહાશ્રમી ।
ગુરોર્ગિરા કાનનમેત્ય દૃષ્ટવાન્સુધૃષ્ટશીલાં કુલટાં મદાકુલામ્ ॥ ૨૨-૧॥

સ્વતઃ પ્રશાન્તોઽપિ તદાહૃતાશયઃ સ્વધર્મમુત્સૃજ્ય તયા સમારમન્ ।
અધર્મકારી દશમી ભવન્પુનર્દધૌ ભવન્નામયુતે સુતે રતિમ્ ॥ ૨૨-૨॥

સ મૃત્યુકાલે યમરાજકિઙ્કરાન્ ભયઙ્કરાંસ્ત્રીનભિલક્ષયન્ભિયા ।
પુરા મનાક્ત્વત્સ્મૃતિવાસનાબલાજ્જુહાવ નારાયણનામકં સુતમ્ ॥ ૨૨-૩॥

દુરાશયસ્યાપિ તદા ત્વનિર્ગતત્વદીયનામાક્ષરમાત્રવૈભવાત્ ।
પુરોઽભિપેતુર્ભવદીયપાર્ષદાશ્ચતુર્ભુજા પીતપટા મનોરમાઃ ॥ ૨૨-૪॥

અમું ચ સમ્પાશ્ય વિકર્ષતો ભટાન્ વિમુઞ્ચતેત્યારુરુધુર્બલાદમી ।
નિવારિતાસ્તે ચ ભવજ્જનૈસ્તદા તદીયપાપં નિખિલં ન્યવેદયન્ ॥ ૨૨-૫॥

ભવન્તુ પાપાનિ કથં તુ નિષ્કૃતે કૃતેઽપિ ભો દણ્ડનમસ્તિ પણ્ડિતાઃ ।
ન નિષ્કૃતિઃ કિં વિદિતા ભવાદૃશામિતિ પ્રભો ત્વત્પુરુષા બભાષિરે ॥ ૨૨-૬॥

શ્રુતિસ્મૃતિભ્યાં વિહિતા વ્રતાદયઃ પુનન્તિ પાપં ન લુનન્તિ વાસનામ્ ।
અનન્તસેવા તુ નિકૃન્તતિ દ્વયીમિતિ પ્રભો ત્વત્પુરુષા બભાષિરે ॥ ૨૨-૭॥

અનેન ભો જન્મસહસ્રકોટિભિઃ કૃતેષુ પાપેષ્વપિ નિષ્કૃતિઃ કૃતા ।
યદગ્રહીન્નામ ભયાકુલો હરેરિતિ પ્રભો ત્વત્પુરુષા બભાષિરે ॥ ૨૨-૮॥

નૃણામબુદ્ધ્યાપિ મુકુન્દકીર્તનં દહત્યઘૌઘાન્મહિમાસ્ય તાદૃશઃ ।
યથાગ્નિરેધાંસિ યથૌષધં ગદાનિતિ પ્રભો ત્વત્પુરુષા બભાષિરે ॥ ૨૨-૯॥

ઇતીરિતૈર્યામ્યભટૈરપાસૃતે ભવદ્ભટાનાં ચ ગણે તિરોહિતે ।

ભવત્સ્મૃતિં કઞ્ચન કાલમાચરન્ભવત્પદં પ્રાપિ ભવદ્ભટૈરસૌ ॥ ૨૨-૧૦॥

સ્વકિઙ્કરાવેદનશઙ્કિતો યમસ્ત્વદઙ્ઘ્રિભક્તેષુ ન ગમ્યતામિતિ ।
સ્વકીયભૃત્યાનશિશિક્ષદુચ્ચકૈઃ સ દેવ વાતાલયનાથ પાહિ મામ્ ॥ ૨૨-૧૧॥

ઇતિ દ્વાવિંશદશકં સમાપ્તં

## ત્રયોવિંશતિદશકમ્ (૨૩)

### દક્ષચરિતં તથા ચિત્રકેતૂપાખ્યાનમ્ ।
### 23 - The Stories of DakSha, Chitraketu, Etc

પ્રાચેતસસ્તુ ભગવન્નપરોઽહિ દક્ષસ્ત્વત્સેવનં વ્યધિત સર્ગવિવૃદ્ધિકામઃ ।
આવિર્બભૂવિથ તદા લસદષ્ટબાહુસ્તસ્મૈ વરં દદિથ તાં ચ વધૂમસિક્નીમ્ ॥ ૨૩-૧॥

તસ્યાત્મજાસ્ત્વયુતમીશ પુનઃ સહસ્રં શ્રીનારદસ્ય વચસા તવ માર્ગમાપુઃ ।
નૈકત્રવાસમૃષયે સ મુમોચ શાપં ભક્તોત્તમસ્ત્વૃષિરનુગ્રહમેવ મેને ॥ ૨૩-૨॥

ષષ્ટ્યા તતો દુહિતૃભિઃ સૃજતઃ કુલૌઘાન્ દૌહિત્રસૂનુરથ તસ્ય સ વિશ્વરૂપઃ ।
ત્વત્સ્તોત્રવર્મિતમજાપયદિન્દ્રમાજૌ દેવ ત્વદીયમહિમા ખલુ સર્વજૈત્રઃ ॥ ૨૩-૩॥

પ્રાક્શૂરસેનવિષયે કિલ ચિત્રકેતુઃ પુત્રાગ્રહી નૃપતિરઙ્ગિરસઃ પ્રભાવાત્ ।
લબ્ધ્વૈકપુત્રમથ તત્ર હતે સપત્નીસઙ્ઘૈરમુહ્યદવશસ્તવ માયયાસૌ ॥ ૨૩-૪॥

તં નારદસ્તુ સમમઙ્ગિરસા દયાલુઃ સમ્પ્રાપ્ય તાવદુપદર્શ્ય સુતસ્ય જીવમ્ ।
કસ્યાસ્મિ પુત્ર ઇતિ તસ્ય ગિરા વિમોહં ત્યક્ત્વા ત્વદર્ચનવિધૌ નૃપતિં ન્યયુઙ્ક્ત ॥ ૨૩-૫॥

સ્તોત્રં ચ મન્ત્રમપિ નારદતોઽથ લબ્ધ્વા તોષાય શેષવપુષો નનુ તે તપસ્યન્ ।
વિદ્યાધરાધિપતિતાં સ હિ સપ્તરાત્રે લબ્ધ્વાપ્યકુણ્ઠમતિરન્વભજદ્ભવન્તમ્ ॥ ૨૩-૬॥

તસ્મૈ મૃણાલધવલેન સહસ્રશીર્ષ્ણા રૂપેણ બદ્ધનુતિસિદ્ધગણાવૃતેન ।
પ્રાદુર્ભવન્નચિરતો નુતિભિઃ પ્રસન્નો દત્ત્વાઽઽત્મતત્ત્વમનુગૃહ્ય તિરોદધાથ ॥ ૨૩-૭॥

ત્વદ્ભક્તમૌલિરથ સોઽપિ ચ લક્ષલક્ષં વર્ષાણિ હર્ષુલમના ભુવનેષુ કામમ્ ।
સઙ્ગાપયન્ગુણગણં તવ સુન્દરીભિઃ સઙ્ગાતિરેકરહિતો લલિતં ચચાર ॥ ૨૩-૮॥

અત્યન્તસઙ્ગવિલયાય ભવત્પ્રણુન્નો નૂનં સ રૂપ્યગિરિમાપ્ય મહત્સમાજે ।

નિશ્શઙ્કમઙ્કકૃતવલ્લભમઙ્ગજારિં તં શઙ્કરં પરિહસન્નુમયાભિશેપે ॥ ૨૩-૯॥

નિસ્સમ્ભ્રમસ્ત્વયમયાચિતશાપમોક્ષો વૃત્રાસુરત્વમુપગમ્ય સુરેન્દ્રયોધી ।
ભક્ત્યાઽઽત્મતત્ત્વકથનૈસ્સમરે વિચિત્રં શત્રોરપિ ભ્રમમપાસ્ય ગતઃ પદં તે ॥ ૨૩-૧૦॥

ત્વત્સેવનેન દિતિરિન્દ્રવધોદ્યતાઽપિ તાન્પ્રત્યુતેન્દ્રસુહૃદો મરુતોઽભિલેભે ।
દુષ્ટાશયેઽપિ શુભદૈવ ભવન્નિષેવા તત્તાદૃશસ્ત્વમવ માં પવનાલયેશ ॥ ૨૩-૧૧॥

ઇતિ ત્રયોવિંશદશકં સમાપ્તમ્ ॥

## ચતુર્વિંશદશકમ્ (૨૪)

### પ્રહ્લાદચરિતમ્ ।
### 24 - The Story of Prahlada

હિરણ્યાક્ષે પોત્રિપ્રવરવપુષા દેવ ભવતા
હતે શોકક્રોધગ્લપિતધૃતિરેતસ્ય સહજઃ ।
હિરણ્યપ્રારમ્ભઃ કશિપુરમરારાતિસદસિ
પ્રતિજ્ઞામાતેને તવ કિલ વધાર્થં મુરરિપો ॥ ૨૪-૧॥ વરિઅતિઓન્ - મધુરિપો
વિધાતારં ઘોરં સ ખલુ તપસિત્વા નચિરતઃ
પુરઃ સાક્ષાત્કુર્વન્સુરનરમૃગાદ્યૈરનિધનમ્ ।
વરં લબ્ધ્વા દૃપ્તો જગદિહ ભવન્નાયકમિદં
પરિક્ષુન્દન્નિન્દ્રાદહરત દિવં ત્વામગણયન્ ॥ ૨૪-૨॥

નિહન્તું ત્વાં ભૂયસ્તવ પદમવાપ્તસ્ય ચ રિપો-
ર્બહિર્દૃષ્ટેરન્તર્દધિથ હૃદયે સૂક્ષ્મવપુષા ।
નદન્નુચ્ચૈસ્તત્રાપ્યખિલભુવનાન્તે ચ મૃગયન્
ભિયા યાતં મત્વા સ ખલુ જિતકાશી નિવવૃતે ॥ ૨૪-૩॥

તતોઽસ્ય પ્રહ્લાદઃ સમજનિ સુતો ગર્ભવસતૌ
મુનેર્વીણાપાણેરધિગતભવદ્ભક્તિમહિમા ।
સ વૈ જાત્યા દૈત્યઃ શિશુરપિ સમેત્ય ત્વયિ રતિં
ગતસ્ત્વદ્ભક્તાનાં વરદ પરમોદાહરણતામ્ ॥ ૨૪-૪॥

સુરારીણાં હાસ્યં તવ ચરણદાસ્યં નિજસુતે
સ દૃષ્ટ્વા દુષ્ટાત્મા ગુરુભિરશિશિક્ષચ્ચિરમમુમ્ ।
ગુરુપ્રોક્તં ચાસાવિદમિદમભદ્રાય દૃઢમિ-
ત્યપાકુર્વન્ સર્વં તવ ચરણભક્ત્યૈવ વવૃધે ॥ ૨૪-૫॥

અધીતેષુ શ્રેષ્ઠં કિમિતિ પરિપૃષ્ટેઽથ તનયે
ભવદ્ભક્તિં વર્યામભિગદતિ પર્યાકુલધૃતિઃ ।
ગુરુભ્યો રોષિત્વા સહજમતિરસ્યેત્યભિવિદન્
વધોપાયાનસ્મિન્ વ્યતનુત ભવત્પાદશરણે ॥ ૨૪-૬॥

સ શૂલૈરાવિદ્ધઃ સુબહુ મથિતો દિગ્ગજગણૈ-
ર્મહાસર્પૈર્દષ્ટોઽપ્યનશનગરાહારવિધુતઃ ।
ગિરીન્દ્રાવક્ષિપ્તોઽપ્યહહ પરમાત્મન્નયિ વિભો
ત્વયિ ન્યસ્તાત્મત્વાત્કિમપિ ન નિપીડામભજત ॥ ૨૪-૭॥

તતઃ શઙ્કાવિષ્ટઃ સ પુનરતિદુષ્ટોઽસ્ય જનકો
ગુરૂક્ત્યા તદ્ગેહે કિલ વરુણપાશૈસ્તમરુણત્ ।
ગુરોશ્ચાસાન્નિધ્યે સ પુનરનુગાન્દૈત્યતનયાન્
ભવદ્ભક્તેસ્તત્ત્વં પરમમપિ વિજ્ઞાનમશિષત્ ॥ ૨૪-૮॥

પિતા શ ૃણ્વન્બાલપ્રકરમખિલં ત્વત્સ્તુતિપરં
રુષાન્ધઃ પ્રાહૈનં કુલહતક કસ્તે બલમિતિ ।
બલં મે વૈકુણ્ઠસ્તવ ચ જગતાં ચાપિ સ બલં
સ એવ ત્રૈલોક્યં સકલમિતિ ધીરોઽયમગદીત્ ॥ ૨૪-૯॥

અરે ક્વાસૌ ક્વાસૌ સકલજગદાત્મા હરિરિતિ
પ્રભિન્તે સ્મ સ્તમ્ભં ચલિતકરવાલો દિતિસુતઃ ।
અતઃ પશ્ચાદ્વિષ્ણો ન હિ વદિતુમીશોઽસ્મિ સહસા
કૃપાત્મન્ વિશ્વાત્મન્ પવનપુરવાસિન્ મૃડય મામ્ ॥ ૨૪-૧૦॥

ઇતિ ચતુર્વિંશદશકં સમાપ્તમ્ ॥

# પઞ્ચવિંશદશકમ્ (૨૫)

## નરસિંહાવતારમ્ ।
25 - Incarnation As Narasimha

સ્તમ્ભે ઘટ્ટયતો હિરણ્યકશિપોઃ કર્ણૌ સમાચૂર્ણય-
ન્નાઘૂર્ણજ્જગદણ્ડકુણ્ડકુહરો ઘોરસ્તવાભૂદ્રવઃ ।
શ્રુત્વા યં કિલ દૈત્યરાજહૃદયે પૂર્વં કદાપ્યશ્રુતં
કમ્પઃ કશ્ચન સમ્પપાત ચલિતોઽપ્યમ્ભોજભૂર્વિષ્ટરાત્ ॥ ૨૫-૧॥

દૈત્યે દિક્ષુ વિસૃષ્ટચક્ષુષિ મહાસંરમ્ભિણિ સ્તમ્ભતઃ
સમ્ભૂતં ન મૃગાત્મકં ન મનુજાકારં વપુસ્તે વિભો ।
કિં કિં ભીષણમેતદદ્ભુતમિતિ વ્યુદ્ભ્રાન્તચિત્તેઽસુરે
વિસ્ફૂર્જદ્ધવલોગ્રરોમવિકસદ્વર્ષ્મા સમાજૃમ્ભથાઃ ॥ ૨૫-૨॥

તપ્તસ્વર્ણસવર્ણઘૂર્ણદતિરૂક્ષાક્ષં સટાકેસર-
પ્રોત્કમ્પપ્રનિકુમ્બિતામ્બરમહો જીયાત્તવેદં વપુઃ ।
વ્યાત્તવ્યાપ્તમહાદરીસખમુખં ખડ્ગોગ્રવલ્ગન્મહા-
જિહ્વાનિર્ગમદૃશ્યમાનસુમહાદંષ્ટ્રાયુગોડ્ડામરમ્ ॥ ૨૫-૩॥

ઉત્સર્પદ્વલિભઙ્ગભીષણહનું હ્રસ્વસ્થવીયસ્તર-
ગ્રીવં પીવરદોશ્શતોદ્ગતનખક્રૂરાંશુદૂરોલ્બણમ્ ।
વ્યોમોલ્લઙ્ઘિઘનાઘનોપમઘનપ્રધ્વાનનિર્ધાવિત-
સ્પર્ધાલુપ્રકરં નમામિ ભવતસ્તન્નારસિંહં વપુઃ ॥ ૨૫-૪॥

નૂનં વિષ્ણુરયં નિહન્મ્યમુમિતિ ભ્રામ્યદ્ગદાભીષણં
દૈત્યેન્દ્રં સમુપાદ્રવન્તમધૃથા દોર્ભ્યાં પૃથુભ્યામમુમ્ ।
વીરો નિર્ગલિતોઽથ ખડ્ગફલકે ગૃહ્ણન્વિચિત્રશ્રમાન્
વ્યાવૃણ્વન્પુનરાપપાત ભુવનગ્રાસોદ્યતં ત્વામહો ॥ ૨૫-૫॥

ભ્રામ્યન્તં દિતિજાધમં પુનરપિ પ્રોદ્ગૃહ્ય દોર્ભ્યાં જવાદ્-
દ્વારેઽથોરુયુગે નિપાત્ય નખરાન્વ્યુત્ખાય વક્ષોભુવિ ।
નિર્ભિન્દન્નધિગર્ભનિર્ભરગલદ્રક્તામ્બુ બદ્ધોત્સવં
પાયં પાયમુદૈરયો બહુજગત્સંહારિસિંહારવાન્ ॥ ૨૫-૬॥

ત્યક્ત્વા તં હતમાશુ રક્તલહરીસિક્તોન્નમદ્વર્ષ્મણિ
પ્રત્યુત્પત્ય સમસ્તદૈત્યપટલીં ચાખાદ્યમાને ત્વયિ ।
ભ્રામ્યદ્ભૂમિવિકમ્પિતામ્બુધિકુલં વ્યાલોલશૈલોત્કરં
પ્રોત્સર્પત્ખચરં ચરાચરમહો દુઃસ્થામવસ્થાં દધૌ ॥ ૨૫-૭॥

તાવન્માંસવપાકરાલવપુષં ઘોરાન્ત્રમાલાધરં
ત્વાં મધ્યેસભમિદ્ધરોષમુષિતં દુર્વારગુર્વારવમ્ ।
અભ્યેતું ન શશાક કોઽપિ ભુવને દૂરે સ્થિતા ભીરવઃ
સર્વે શર્વવિરિઞ્ચવાસવમુખાઃ પ્રત્યેકમસ્તોષત ॥ ૨૫-૮॥

ભૂયોઽપ્યક્ષતરોષધામ્નિ ભવતિ બ્રહ્માજ્ઞયા બાલકે
પ્રહ્લાદે પદયોર્નમત્યપભયે કારુણ્યભારાકુલઃ ।
શાન્તસ્ત્વં કરમસ્ય મૂર્ધ્નિ સમધાઃ સ્તોત્રૈરથોદ્ગાયત-
સ્તસ્યાકામધિયોઽપિ તેનિથ વરં લોકાય ચાનુગ્રહમ્ ॥ ૨૫-૯॥

એવં નાટિતરૌદ્રચેષ્ટિત વિભો શ્રીતાપનીયાભિધ
શ્રુત્યન્તસ્ફુટગીતસર્વમહિમન્નત્યન્તશુદ્ધાકૃતે ।
તત્તાદૃઙ્નિખિલોત્તરં પુનરહો કસ્ત્વાં પરો લઙ્ઘયેત્
પ્રહ્લાદપ્રિય હે મરુત્પુરપતે સર્વામયાત્પાહિ મામ્ ॥ ૨૫-૧૦॥

ઇતિ પઞ્ચવિંશદશકં સમાપ્તમ્ ॥

## ષડ્વિંશદશકમ્ (૨૬)

### ગજેન્દ્રમોક્ષમ્ ।
### 26 - The Liberation of Gajendra

ઇન્દ્રદ્યુમ્નઃ પાણ્ડ્યખણ્ડાધિરાજસ્ત્વદ્ભક્તાત્મા ચન્દનાદ્રૌ કદાચિત્ ।
ત્વત્સેવાયાં મગ્નધીરાલુલોકે નૈવાગસ્ત્યં પ્રાપ્તમાતિથ્યકામમ્ ॥ ૨૬-૧॥

કુમ્ભોદ્ભૂતિસ્સમ્ભૃતક્રોધભારઃ સ્તબ્ધાત્મા ત્વં હસ્તિભૂયં ભજેતિ ।
શપ્ત્વાથૈનં પ્રત્યગાત્સોઽપિ લેભે હસ્તીન્દ્રત્વં ત્વત્સ્મૃતિવ્યક્તિધન્યમ્ ॥ ૨૬-૨॥

દુગ્ધામ્ભોધેર્મધ્યભાજિ ત્રિકૂટે ક્રીડન્ શૈલે યૂથપોઽયં વશાભિઃ ।

સર્વાન્જન્તૂનત્યવર્તિષ્ટ શક્ત્યા ત્વદ્ભક્તાનાં કુત્ર નોત્કર્ષલાભઃ ॥ ૨૬-૩॥

સ્વેન સ્થેમ્ના દિવ્યદેશત્વશક્ત્યા સોઽયં ખેદાનપ્રજાનન્ કદાચિત્ ।
શૈલપ્રાન્તે ઘર્મતાન્તઃ સરસ્યાં યૂથૈઃ સાર્ધં ત્વત્પ્રણુન્નોઽભિરેમે ॥ ૨૬-૪॥

હૂહૂસ્તાવદ્દેવલસ્યાપિ શાપદ્ગ્રાહીભૂતસ્તજ્જલે વર્તમાનઃ ।
જગ્રાહૈનં હસ્તિનં પાદદેશે શાન્ત્યર્થં હિ શ્રાન્તિદોઽસિ સ્વકાનામ્ ॥ ૨૬-૫॥

ત્વત્સેવાયા વૈભવાદ્દુર્નિરોધં યુધ્યન્તં તં વત્સરાણાં સહસ્રમ્ ।
પ્રાપ્તે કાલે ત્વત્પદૈકાગ્ર્યસિદ્ધ્યૈ નક્રાક્રાન્તં હસ્તિવર્યં વ્યધાસ્ત્વમ્ ॥ ૨૬-૬॥

આર્તિવ્યક્તપ્રાક્તનજ્ઞાનભક્તિઃ શુણ્ડોત્ક્ષિપ્તૈઃ પુણ્ડરીકૈસ્સમર્ચન્ ।
પૂર્વાભ્યસ્તં નિર્વિશેષાત્મનિષ્ઠં સ્તોત્રશ્રેષ્ઠં સોઽન્વગાદીત્પરાત્મન્ ॥ ૨૬-૭॥

શ્રુત્વા સ્તોત્રં નિર્ગુણસ્થં સમસ્તં બ્રહ્મેશાદ્યૈર્નાહમિત્યપ્રયાતે ।
સર્વાત્મા ત્વં ભૂરિકારુણ્યવેગાત્તાર્ક્ષ્યારૂઢઃ પ્રેક્ષિતોઽભૂઃ પુરસ્તાત્ ॥ ૨૬-૮॥

હસ્તીન્દ્રં તં હસ્તપદ્મેન ધૃત્વા ચક્રેણ ત્વં નક્રવર્યં વ્યદારીઃ ।
ગન્ધર્વેઽસ્મિન્મુક્તશાપે સ હસ્તી ત્વત્સારૂપ્યં પ્રાપ્ય દેદીપ્યતે સ્મ ॥ ૨૬-૯॥

એતદ્વૃત્તં ત્વાં ચ માં ચ પ્રગે યો ગાયેત્સોઽયં ભૂયસે શ્રેયસે સ્યાત્ ।
ઇત્યુક્ત્વૈનં તેન સાર્ધં ગતસ્ત્વં ધિષ્ણ્યં વિષ્ણો પાહિ વાતાલયેશ ॥ ૨૬-૧૦॥

ઇતિ ષડ્વિંશદશકં સમાપ્તમ્ ॥

## સપ્તવિંશદશકમ્ (૨૭)

### ક્ષીરાબ્ધિમથનં તથા કૂર્માવતારમ્ ।
### 27 - Churning of the Milk Ocean and Tortoise Incarnation

દુર્વાસાસ્સુરવનિતાઽઽપ્તદિવ્યમાલ્યં શક્રાય સ્વયમુપદાય તત્ર ભૂયઃ ।
નાગેન્દ્રપ્રતિમૃદિતે શશાપ શક્રં કા ક્ષાન્તિસ્ત્વદિતરદેવતાંશજાનામ્ ॥ ૨૭-૧॥

શાપેન પ્રથિતજરેઽથ નિર્જરેન્દ્રે દેવેષ્વપ્યસુરજિતેષુ નિષ્પ્રભેષુ ।
શર્વાદ્યાઃ કમલજમેત્ય સર્વદેવા નિર્વાણપ્રભવ સમં ભવન્તમાપુઃ ॥ ૨૭-૨॥

બ્રહ્માદ્યૈઃ સ્તુતમહિમા ચિરં તદાનીં પ્રાદુષ્ષન્વરદ પુરઃ પરેણ ધામ્ના ।

હે દેવા દિતિજકુલૈર્વિધાય સન્ધિં પીયૂષં પરિમથતેતિ પર્યશાસ્ત્વમ્ ॥ ૨૭-૩॥

સન્ધાનં કૃતવતિ દાનવૈઃ સુરૌઘે મન્થાનં નયતિ મદેન મન્દરાદ્રિમ્ ।
ભ્રષ્ટેઽસ્મિન્બદરમિવોદ્વહન્ખગેન્દ્રે સદ્યસ્ત્વં વિનિહિતવાન્ પયઃપયોધૌ ॥ ૨૭-૪॥

આધાય દ્રુતમથ વાસુકિં વરત્રાં પાથોધૌ વિનિહિતસર્વબીજજાલે ।
પ્રારબ્ધે મથનવિધૌ સુરાસુરૈસ્તૈર્વ્યાજાત્ત્વં ભુજગમુખેઽકરોઃ સુરારીન્ ॥ ૨૭-૫॥

ક્ષુબ્ધાદ્રૌ ક્ષુભિતજલોદરે તદાનીં દુગ્ધાબ્ધૌ ગુરુતરભારતો નિમગ્ને ।
દેવેષુ વ્યથિતતમેષુ તત્પ્રિયૈષી પ્રાણૈષીઃ કમઠતનું કઠોરપૃષ્ઠામ્ ॥ ૨૭-૬॥

વજ્રાતિસ્થિરતરકર્પરેણ વિષ્ણો વિસ્તારાત્પરિગતલક્ષયોજનેન ।
અમ્ભોધેઃ કુહરગતેન વર્ષ્મણા ત્વં નિર્મગ્નં ક્ષિતિધરનાથમુન્નિનેથ ॥ ૨૭-૭॥

ઉન્મગ્ને ઝટિતિ તદા ધરાધરેન્દ્રે નિર્મેથુર્દૃઢમિહ સમ્મદેન સર્વે ।
આવિશ્ય દ્વિતયગણેઽપિ સર્પરાજે વૈવશ્યં પરિશમયન્નવીવૃધસ્તાન્ ॥ ૨૭-૮॥

ઉદ્દામભ્રમણજવોન્નમદ્ગિરીન્દ્રન્યસ્તૈકસ્થિરતરહસ્તપઙ્કજં ત્વામ્ ।
અભ્રાન્તે વિધિગિરિશાદયઃ પ્રમોદાદુદ્ભ્રાન્તા નુનુવુરુપાત્તપુષ્પવર્ષાઃ ॥ ૨૭-૯॥

દૈત્યૌઘે ભુજગમુખાનિલેન તપ્તે તેનૈવ ત્રિદશકુલેઽપિ કિઞ્ચિદાર્તે ।
કારુણ્યાત્તવ કિલ દેવ વારિવાહાઃ પ્રાવર્ષન્નમરગણાન્ન દૈત્યસઙ્ઘાન્ ॥ ૨૭-૧૦॥

ઉદ્ભ્રામ્યદ્બહુતિમિનક્રચક્રવાલે તત્રાબ્ધૌ ચિરમથિતેઽપિ નિર્વિકારે ।
એકસ્ત્વં કરયુગકૃષ્ટસર્પરાજઃ સંરાજન્ પવનપુરેશ પાહિ રોગાત્ ॥ ૨૭-૧૧॥

ઇતિ સપ્તવિંશદશકં સમાપ્તમ્ ॥

## અષ્ટાવિંશદશકમ્ (૨૮)

### લક્ષ્મીસ્વયંવરં તથા અમૃતોત્પત્તિઃ ।
### 28 - Self-Choice Marriage of Lakshmi and Emergence of Nectar.

ગરલં તરલાનલં પુરસ્તાજ્જલધેરુદ્વિજગાલ કાલકૂટમ્ ।
અમરસ્તુતિવાદમોદનિઘ્નો ગિરિશસ્તન્નિપપૌ ભવત્પ્રિયાર્થમ્ ॥ ૨૮-૧॥

વિમથત્સુ સુરાસુરેષુ જાતા સુરભિસ્તામૃષિષુ ન્યધાસ્ત્રિધામન્ ।

હયરત્નમભૂદથેભરત્નં દ્યુતરુશ્ચાપ્સરસઃ સુરેષુ તાનિ ॥ ૨૮-૨॥

જગદીશ ભવત્પરા તદાનીં કમનીયા કમલા બભૂવ દેવી ।
અમલામવલોક્ય યાં વિલોલઃ સકલોઽપિ સ્પૃહયામ્બભૂવ લોકઃ ॥ ૨૮-૩॥

ત્વયિ દત્તહૃદે તદૈવ દેવ્યૈ ત્રિદશેન્દ્રો મણિપીઠિકાં વ્યતારીત્ ।
સકલોપહૃતાભિષેચનીયૈરૃષયસ્તાં શ્રુતિગીર્ભિરભ્યષિઞ્ચન્ ॥ ૨૮-૪॥

અભિષેકજલાનુપાતિમુગ્ધત્વદપાઙ્ગૈરવભૂષિતાઙ્ગવલ્લીમ્ ।
મણિકુણ્ડલપીતચેલહારપ્રમુખૈસ્તામમરાદયોઽન્વભૂષન્ ॥ ૨૮-૫॥

વરણસ્રજમાત્તભૃઙ્ગનાદાં દધતી સા કુચકુમ્ભમન્દયાના ।
પદશિઞ્જિતમઞ્જુનૂપુરા ત્વાં કલિતવ્રીલવિલાસમાસસાદ ॥ ૨૮-૬॥

ગિરિશદ્રુહિણાદિસર્વદેવાન્ ગુણભાજોઽપ્યવિમુક્તદોષલેશાન્ ।
અવમૃશ્ય સદૈવ સર્વરમ્યે નિહિતા ત્વય્યનયાપિ દિવ્યમાલા ॥ ૨૮-૭॥

ઉરસા તરસા મમાનિથૈનાં ભુવનાનાં જનનીમનન્યભાવામ્ ।
ત્વદુરોવિલસત્તદીક્ષણશ્રી પરિવૃષ્ટ્યા પરિપુષ્ટમાસ વિશ્વમ્ ॥ ૨૮-૮॥

અતિમોહનવિભ્રમા તદાનીં મદયન્તી ખલુ વારુણી નિરાગાત્ ।
તમસઃ પદવીમદાસ્ત્વમેનામતિસમ્માનનયા મહાસુરેભ્યઃ ॥ ૨૮-૯॥

તરુણામ્બુદસુન્દરસ્તદા ત્વં નનુ ધન્વન્તરિરુત્થિતોઽમ્બુરાશેઃ ।
અમૃતં કલશે વહન્કરાભ્યામખિલાર્તિં હર મારુતાલયેશ ॥ ૨૮-૧૦॥

ઇતિ અષ્ટાવિંશદશકં સમાપ્તમ્ ॥

## એકોનત્રિંશદશકમ્ (૨૯)

### મોહિન્યવતારં આદિ ।
29 - Mohini Incarnation, Etc

ઉદ્ગચ્છતસ્તવ કરાદમૃતં હરત્સુ દૈત્યેષુ તાનશરણાનનુનીય દેવાન્ ।
સદ્યસ્તિરોદધિથ દેવ ભવત્પ્રભાવાદુદ્યત્સ્વયૂથ્યકલહા દિતિજા બભૂવુઃ ॥ ૨૯-૧॥

શ્યામાં રુચાપિ વયસાપિ તનું તદાનીં પ્રાપ્તોઽસિ તુઙ્ગકુચમણ્ડલભઙ્ગુરાં ત્વમ્ ।

પીયુષકુમ્ભકલહં પરિમુચ્ય સર્વે તૃષ્ણાકુલાઃ પ્રતિયયુસ્ત્વદુરોજકુમ્ભે ॥ ૨૯-૨॥

કા ત્વં મૃગાક્ષિ વિભજસ્વ સુધામિમામિત્યારૂઢરાગવિવશાનભિયાચતોઽમૂન્ ।
વિશ્વસ્યતે મયિ કથં કુલટાસ્મિ દૈત્યા ઇત્યાલપન્નપિ સુવિશ્વસિતાનતાનીઃ ॥ ૨૯-૩॥

મોદાત્સુધાકલશમેષુ દદત્સુ સા ત્વં દુશ્ચેષ્ટિતં મમ સહધ્વમિતિ બ્રુવાણા ।
પઙ્ક્તિપ્રભેદવિનિવેશિતદેવદૈત્યા લીલાવિલાસગતિભિઃ સમદાઃ સુધાં તામ્ ॥ ૨૯-૪॥

અસ્માસ્વિયં પ્રણયિનીત્યસુરેષુ તેષુ જોષં સ્થિતેષ્વથ સમાપ્ય સુધાં સુરેષુ ।
ત્વં ભક્તલોકવશગો નિજરૂપમેત્ય સ્વર્ભાનુમર્ધપરિપીતસુધં વ્યલાવીઃ ॥ ૨૯-૫॥

ત્વત્તઃ સુધાહરણયોગ્યફલં પરેષુ દત્ત્વા ગતે ત્વયિ સુરૈઃ ખલુ તે વ્યગૃહ્ણન્ ।
ઘોરેઽથ મૂર્છતિ રણે બલિદૈત્યમાયાવ્યામોહિતે સુરગણે ત્વમિહાવિરાસીઃ ॥ ૨૯-૬॥

ત્વં કાલનેમિમથ માલિમુખાઞ્જઘન્થ શક્રો જઘાન બલિજમ્ભવલાન્ સપાકાન્ ।
શુષ્કાર્દ્રદુષ્કરવધે નમુચૌ ચ લૂને ફેનેન નારદગિરા ન્યરુણો રણં ત્વમ્ ॥ ૨૯-૭॥

યોષાવપુર્દનુજમોહનમાહિતં તે શ્રુત્વા વિલોકનકુતૂહલવાન્મહેશઃ ।
ભૂતૈસ્સમં ગિરિજયા ચ ગતઃ પદં તે સ્તુત્વાબ્રવીદભિમતં ત્વમથો તિરોધાઃ ॥ ૨૯-૮॥

આરામસીમનિ ચ કન્દુકઘાતલીલાલોલાયમાનનયનાં કમનીં મનોજ્ઞામ્ ।
ત્વામેષ વીક્ષ્ય વિગલદ્વસનાં મનોભૂવેગાદનઙ્ગરિપુરઙ્ગ સમાલિલિઙ્ગ ॥ ૨૯-૯॥

ભૂયોઽપિ વિદ્રુતવતીમુપધાવ્ય દેવો વીર્યપ્રમોક્ષવિકસત્પરમાર્થબોધઃ ।
ત્વન્માનિતસ્તવ મહત્વમુવાચ દેવ્યૈ તત્તાદૃશસ્ત્વમવ વાતનિકેતનાથ ॥ ૨૯-૧૦॥

ઇતિ એકોનત્રિંશદશકં સમાપ્તમ્ ॥

## ત્રિંશદશકમ્ (૩૦)

### વામનાવતારમ્ ।
### 30 - Vamana Incarnation

શક્રેણ સંયતિ હતોઽપિ બલિર્મહાત્મા શુક્રેણ જીવિતતનુઃ ક્રતુવર્ધિતોષ્મા ।
વિક્રાન્તિમાન્ ભયનિલીનસુરાં ત્રિલોકીં ચક્રે વશે સ તવ ચક્રમુખાદભીતઃ ॥ ૩૦-૧॥

પુત્રાર્તિદર્શનવશાદદિતિર્વિષણ્ણા તં કાશ્યપં નિજપતિં શરણં પ્રપન્ના ।

ત્વત્પૂજનં તદુદિતં હિ પયોવ્રતાખ્યં સા દ્વાદશાહમચરત્ત્વયિ ભક્તિપૂર્ણા ॥ ૩૦-૨॥

તસ્યાવધૌ ત્વયિ નિલીનમતેરમુષ્યાઃ શ્યામશ્ચતુર્ભુજવપુઃ સ્વયમાવિરાસીઃ ।
નમ્રાં ચ તામિહ ભવત્તનયો ભવેયં ગોપ્યં મદીક્ષણમિતિ પ્રલપન્નયાસીઃ ॥ ૩૦-૩॥

ત્વં કાશ્યપે તપસિ સન્નિદધત્તદાનીં પ્રાપ્તોઽસિ ગર્ભમદિતેઃ પ્રણુતો વિધાત્રા ।
પ્રાસૂત ચ પ્રકટવૈષ્ણવદિવ્યરૂપં સા દ્વાદશીશ્રવણપુણ્યદિને ભવન્તમ્ ॥ ૩૦-૪॥

પુણ્યાશ્રમં તમભિવર્ષતિ પુષ્પવર્ષૈર્હર્ષાકુલે સુરકુલે કૃતતૂર્યઘોષે ।
બદ્ધ્વાઞ્જલિં જય જયેતિ નુતઃ પિતૃભ્યાં ત્વં તત્ક્ષણે પટુતમં વટુરૂપમાધાઃ ॥ ૩૦-૫॥

તાવત્પ્રજાપતિમુખૈરુપનીય મૌઞ્જીદણ્ડાજિનાક્ષવલયાદિભિરર્ચ્યમાનઃ ।
દેદીપ્યમાનવપુરીશ કૃતાગ્નિકાર્યસ્ત્વં પ્રાસ્થિથા બલિગૃહં પ્રકૃતાશ્વમેધમ્ ॥ ૩૦-૬॥

ગાત્રેણ ભાવિમહિમોચિતગૌરવં પ્રાગ્વ્યાવૃણ્વતેવ ધરણીં ચલયન્નયાસીઃ ।
છત્રં પરોષ્મતિરણાર્થમિવાદધાનો દણ્ડં ચ દાનવજનેષ્વિવ સન્નિધાતુમ્ ॥ ૩૦-૭॥

તાં નર્મદોત્તરતટે હયમેધશાલામાસેદુષિ ત્વયિ રુચા તવ રુદ્ધનેત્રૈઃ ।
ભાસ્વાન્કિમેષ દહનો નુ સનત્કુમારો યોગી નુ કોઽયમિતિ શુક્રમુખૈઃ શશઙ્કે ॥ ૩૦-૮॥

આનીતમાશુ ભૃગુભિર્મહસાભિભૂતૈસ્ત્વાં રમ્યરૂપમસુરઃ પુલકાવૃતાઙ્ગઃ ।
ભક્ત્યા સમેત્ય સુકૃતી પરિણિજ્ય પાદૌ તત્તોયમન્વધૃત મૂર્ધનિ તીર્થતીર્થમ્ ॥ ૩૦-૯॥

પ્રહ્લાદવંશજતયા ક્રતુભિર્દ્વિજેષુ વિશ્વાસતો નુ તદિદં દિતિજોઽપિ લેભે ।
યત્તે પદામ્બુ ગિરિશસ્ય શિરોભિલાલ્યં સ ત્વં વિભો ગુરુપુરાલય પાલયેથાઃ ॥ ૩૦-૧૦॥

ઇતિ ત્રિંશદશકં સમાપ્તમ્ ॥

## એકત્રિંશદશકમ્ (૩૧)

બલિદર્પહરણમ્ ।
31 - Humbling of Bali

પ્રીત્યા દૈત્યસ્તવ તનુમહઃપ્રેક્ષણાત્સર્વથાઽપિ
ત્વામારાધ્યન્નજિત રચયન્નઞ્જલિં સઞ્જગાદ ।
મત્તઃ કિં તે સમભિલષિતં વિપ્રસૂનો વદ ત્વં

વિત્તં ભક્તં ભવનમવનીં વાપિ સર્વં પ્રદાસ્યે ॥ ૩૧-૧॥

તામક્ષીણાં બલિગિરમુપાકર્ણ્ય કારુણ્યપૂર્ણોઽ-
પ્યસ્યોત્સેકં શમયિતુમના દૈત્યવંશં પ્રશંસન્ ।
ભૂમિં પાદત્રયપરિમિતાં પ્રાર્થયામાસિથ ત્વં
સર્વં દેહીતિ તુ નિગદિતે કસ્ય હાસ્યં ન વા સ્યાત્ ॥ ૩૧-૨॥

વિશ્વેશં માં ત્રિપદમિહ કિં યાચસે બાલિશસ્ત્વં
સર્વાં ભૂમિં વૃણુ કિમમુનેત્યાલપત્ત્વાં સ દૃપ્યન્ ।
યસ્માદ્દર્પાત્ત્રિપદપરિપૂર્ત્યક્ષમઃ ક્ષેપવાદાન્
બન્ધં ચાસાવગમદતદર્હોઽપિ ગાઢોપશાન્ત્યૈ ॥ ૩૧-૩॥

પાદત્રય્યા યદિ ન મુદિતો વિષ્ટપૈર્નાપિ તુષ્યે-
દિત્યુક્તેઽસ્મિન્વરદ ભવતે દાતુકામેઽથ તોયમ્ ।
દૈત્યાચાર્યસ્તવ ખલુ પરીક્ષાર્થિનઃ પ્રેરણાત્તં
મા મા દેયં હરિરયમિતિ વ્યક્તમેવાબભાષે ॥ ૩૧-૪॥

યાચત્યેવં યદિ સ ભગવાન્પૂર્ણકામોઽસ્મિ સોઽહં
દાસ્યામ્યેવ સ્થિરમિતિ વદન્ કાવ્યશપ્તોઽપિ દૈત્યઃ ।
વિન્ધ્યાવલ્યા નિજદયિતયા દત્તપાદ્યાય તુભ્યં
ચિત્રં ચિત્રં સકલમપિ સ પ્રાર્પયત્તોયપૂર્વમ્ ॥ ૩૧-૫॥

નિસ્સન્દેહં દિતિકુલપતૌ ત્વય્યશેષાર્પણં તદ્-
વ્યાતન્વાને મુમુચુરૃષયઃ સામરાઃ પુષ્પવર્ષમ્ ।
દિવ્યં રૂપં તવ ચ તદિદં પશ્યતાં વિશ્વભાજા-
મુચ્ચૈરુચ્ચૈરવૃધદવધીકૃત્ય વિશ્વાણ્ડભાણ્ડમ્ ॥ ૩૧-૬॥

ત્વત્પાદાગ્રં નિજપદગતં પુણ્ડરીકોદ્ભવોઽસૌ
કુણ્ડીતોયૈરસિચદપુનાદ્યજ્જલં વિશ્વલોકાન્ ।
હર્ષોત્કર્ષાત્સુબહુ નનૃતે ખેચરૈરુત્સવેઽસ્મિન્
ભેરીં નિઘ્નન્ ભુવનમચરજ્જામ્બવાન્ ભક્તિશાલી ॥ ૩૧-૭॥

તાવદ્દૈત્યાસ્ત્વનુમતિમૃતે ભર્તુરારબ્ધયુદ્ધા
દેવોપેતૈર્ભવદનુચરૈઃ સઙ્ગતા ભઙ્ગમાપન્ ।
કાલાત્માયં વસતિ પુરતો યદ્વશાત્પ્રાગ્જિતાઃ સ્મઃ
કિં વો યુદ્ધૈરિતિ બલિગિરા તેઽથ પાતાલમાપુઃ ॥ ૩૧-૮॥

પાશૈર્બદ્ધં પતગપતિના દૈત્યમુચ્ચૈરવાદી-
સ્તાર્તીયીકં દિશ મમ પદં કિં ન વિશ્વેશ્વરોઽસિ ।
પાદં મૂર્ધ્નિ પ્રણય ભગવન્નિત્યકમ્પં વદન્તં
પ્રહ્લાદસ્તં સ્વયમુપગતો માનયન્નસ્તવીત્ત્વામ્ ॥ ૩૧-૯॥

દર્પોચ્છિત્ત્યૈ વિહિતમખિલં દૈત્ય સિદ્ધોઽસિ પુણ્યૈ-
ર્લોકસ્તેઽસ્તુ ત્રિદિવવિજયી વાસવત્વં ચ પશ્ચાત્ ।
મત્સાયુજ્યં ભજ ચ પુનરિત્યન્વગૃહ્ણા બલિં તં
વિપ્રૈસ્સન્તાનિતમખવરઃ પાહિ વાતાલયેશ ॥ ૩૧-૧૦॥

ઇતિ એકત્રિંશદશકં સમાપ્તમ્ ॥

## દ્વાત્રિંશદશકમ્ (૩૨)

### મત્સ્યાવતારમ્ ।
### 32 - Matsya Avatar

પુરા હયગ્રીવમહાસુરેણ ષષ્ઠાન્તરાન્તોદ્યદકાણ્ડકલ્પે ।
નિદ્રોન્મુખબ્રહ્મમુખાદ્ધૃતેષુ વેદેષ્વધિત્સઃ કિલ મત્સ્યરૂપમ્ ॥ ૩૨-૧॥

સત્યવ્રતસ્ય દ્રમિલાધિભર્તુર્નદીજલે તર્પયતસ્તદાનીમ્ ।
કરાઞ્જલૌ સઞ્જ્વલિતાકૃતિસ્ત્વમદૃશ્યથાઃ કશ્ચન બાલમીનઃ ॥ ૩૨-૨॥

ક્ષિપ્તં જલે ત્વાં ચકિતં વિલોક્ય નિન્યેઽમ્બુપાત્રેણ મુનિઃ સ્વગેહમ્ ।
સ્વલ્પૈરહોભિઃ કલશીં ચ કૂપં વાપીં સરશ્ચાનશિષે વિભો ત્વમ્ ॥ ૩૨-૩॥

યોગપ્રભાવાદ્ભવદાજ્ઞયૈવ નીતસ્તતસ્ત્વં મુનિના પયોધિમ્ ।
પૃષ્ટોઽમુના કલ્પદિદૃક્ષુમેનં સપ્તાહમાસ્વેતિ વદન્નયાસીઃ ॥ ૩૨-૪॥

પ્રાપ્તે ત્વદુક્તેઽહનિ વારિધારાપરિપ્લુતે ભૂમિતલે મુનીન્દ્રઃ ।
સપ્તર્ષિભિઃ સાર્ધમપારવારિણ્યુદ્ઘૂર્ણમાનઃ શરણં યયૌ ત્વામ્ ॥ ૩૨-૫॥

ધરાં ત્વદાદેશકરીમવાપ્તાં નૌરૂપિણીમારુરુહુસ્તદા તે ।
તત્કમ્પકમ્પ્રેષુ ચ તેષુ ભૂયસ્ત્વમમ્બુધેરાવિરભૂર્મહીયાન્ ॥ ૩૨-૬॥

ઝષાકૃતિં યોજનલક્ષદીર્ઘાં દધાનમુચ્ચૈસ્તરતેજસં ત્વામ્ ।
નિરીક્ષ્ય તુષ્ટા મુનયસ્ત્વદુક્ત્યા ત્વત્તુઙ્ગશૃઙ્ગે તરણિં બબન્ધુઃ ॥ ૩૨-૭॥

આકૃષ્ટનૌકો મુનિમણ્ડલાય પ્રદર્શયન્વિશ્વજગદ્વિભાગાન્ ।
સંસ્તૂયમાનો નૃવરેણ તેન જ્ઞાનં પરં ચોપદિશન્નચારીઃ ॥ ૩૨-૮॥

કલ્પાવધૌ સપ્તમુનીન્પુરોવત્પ્રસ્થાપ્ય સત્યવ્રતભૂમિપં તમ્ ।
વૈવસ્વતાખ્યં મનુમાદધાનઃ ક્રોધાદ્ધયગ્રીવમભિદ્રુતોઽભૂઃ ॥ ૩૨-૯॥

સ્વતુઙ્ગશૃઙ્ગક્ષતવક્ષસં તં નિપાત્ય દૈત્યં નિગમાન્ગૃહીત્વા ।
વિરિઞ્ચયે પ્રીતહૃદે દદાનઃ પ્રભઞ્જનાગારપતે પ્રપાયાઃ ॥ ૩૨-૧૦॥

ઇતિ દ્વાત્રિંશદશકં સમાપ્તમ્ ॥

## ત્રયસ્ત્રિંશદશકમ્ (૩૩)

### અમ્બરીષચરિતમ્ ।
### 33 - The Story of Ambarisha

વૈવસ્વતાખ્યમનુપુત્રનભાગજાતનાભાગનામકનરેન્દ્રસુતોઽમ્બરીષઃ ।
સપ્તાર્ણવાવૃતમહીદયિતોઽપિ રેમે ત્વત્સઙ્ગિષુ ત્વયિ ચ મગ્નમનાસ્સદૈવ ॥ ૩૩-૧॥

ત્વત્પ્રીતયે સકલમેવ વિતન્વતોઽસ્ય ભક્ત્યૈવ દેવ નચિરાદભૃથાઃ પ્રસાદમ્ ।
યેનાસ્ય યાચનમૃતેઽપ્યભિરક્ષણાર્થં ચક્રં ભવાન્પ્રવિતતાર સહસ્રધારમ્ ॥ ૩૩-૨॥

સ દ્વાદશીવ્રતમથો ભવદર્ચનાર્થં વર્ષં દધૌ મધુવને યમુનોપકણ્ઠે ।
પત્ન્યા સમં સુમનસા મહતીં વિતન્વન્ પૂજાં દ્વિજેષુ વિસૃજન્પશુષષ્ટિકોટિમ્ ॥ ૩૩-૩॥

તત્રાથ પારણદિને ભવદર્ચનાન્તે દુર્વાસસાઽસ્ય મુનિના ભવનં પ્રપેદે ।
ભોક્તું વૃતશ્ચ સ નૃપેણ પરાર્તિશીલો મન્દં જગામ યમુનાં નિયમાન્વિધાસ્યન્ ॥ ૩૩-૪॥

રાજ્ઞાથ પારણમુહૂર્તસમાપ્તિખેદાદ્વારૈવ પારણમકારિ ભવત્પરેણ ।
પ્રાપ્તો મુનિસ્તદથ દિવ્યદૃશા વિજાનન્ ક્ષિપ્યન્ ક્રુધોદ્ધૃતજટો વિતતાન કૃત્યામ્ ॥ ૩૩-૫॥

કૃત્યાં ચ તામસિધરાં ભુવનં દહન્તીમગ્રેઽભિવીક્ષ્ય નૃપતિર્ન પદાચ્ચકમ્પે ।
ત્વદ્ભક્તબાધમભિવીક્ષ્ય સુદર્શનં તે કૃત્યાનલં શલભયન્મુનિમન્વધાવીત્ ॥ ૩૩-૬॥

ધાવન્નશેષભુવનેષુ ભિયા સ પશ્યન્ વિશ્વત્ર ચક્રમપિ તે ગતવાન્વિરિઞ્ચમ્ ।
કઃ કાલચક્રમતિલઙ્ઘયતીત્યપાસ્તઃ શર્વં યયૌ સ ચ ભવન્તમવન્દતૈવ ॥ ૩૩-૭॥

ભૂયો ભવન્નિલયમેત્ય મુનિં નમન્તં પ્રોચે ભવાનહમૃષે નનુ ભક્તદાસઃ ।
જ્ઞાનં તપશ્ચ વિનયાન્વિતમેવ માન્યં યાહ્યમ્બરીષપદમેવ ભજેતિ ભૂમન્ ॥ ૩૩-૮॥

તાવત્સમેત્ય મુનિના સ ગૃહીતપાદો રાજાઽપસૃત્ય ભવદસ્ત્રમસાવનૌષીત્ ।
ચક્રે ગતે મુનિરદાદખિલાશિષોઽસ્મૈ ત્વદ્ભક્તિમાગસિ કૃતેઽપિ કૃપાં ચ શંસન્ ॥ ૩૩-૯॥

રાજા પ્રતીક્ષ્ય મુનિમેકસમામનાશ્વાન્ સમ્ભોજ્ય સાધુ તમૃષિં વિસૃજન્પ્રસન્નમ્ ।
ભુક્ત્વા સ્વયં ત્વયિ તતોઽપિ દૃઢં રતોઽભૂત્ સાયુજ્યમાપ ચ સ માં પવનેશ પાયાઃ ॥ ૩૩-૧૦॥

ઇતિ ત્રયસ્ત્રિંશદશકં સમાપ્તમ્ ॥

## ચતુસ્ત્રિંશદશકમ્ (૩૪)

### શ્રીરામાવતારમ્-૧
### 34 - Sri Rama Avatar-1

ગીર્વાણૈરર્થ્યમાનો દશમુખનિધનં કોસલેઽષ્વૃષ્યશૃઙ્ગે
પુત્રીયામિષ્ટિમિષ્ટ્વા દદુષિ દશરથક્ષ્માભૃતે પાયસાગ્ર્યમ્ ।
તદ્ભુક્ત્યા તત્પુરન્ધ્રીષ્વપિ તિસૃષુ સમં જાતગર્ભાસુ જાતો
રામસ્ત્વં લક્ષ્મણેન સ્વયમથ ભરતેનાપિ શત્રુઘ્નનામ્ના ॥ ૩૪-૧॥

કોદણ્ડી કૌશિકસ્ય ક્રતુવરમવિતું લક્ષ્મણેનાનુયાતો
યાતોઽભૂસ્તાતવાચા મુનિકથિતમનુદ્વન્દ્વશાન્તાધ્વખેદઃ ।
નૃણાં ત્રાણાય બાણૈર્મુનિવચનબલાત્તાટકાં પાટયિત્વા
લબ્ધ્વાસ્માદસ્ત્રજાલં મુનિવનમગમો દેવ સિદ્ધાશ્રમાખ્યમ્ ॥ ૩૪-૨॥

મારીચં દ્રાવયિત્વા મખશિરસિ શરૈરન્યરક્ષાંસિ નિઘ્નન્
કલ્યાં કુર્વન્નહલ્યાં પથિ પદરજસા પ્રાપ્ય વૈદેહગેહમ્ ।
ભિન્દાનશ્ચાન્દ્રચૂડં ધનુરવનિસુતામિન્દિરામેવ લબ્ધ્વા
રાજ્યં પ્રાતિષ્ઠથાસ્ત્વં ત્રિભિરપિ ચ સમં ભ્રાતૃવીરૈઃ સદારૈઃ ॥ ૩૪-૩॥

આરુન્ધાને રુષાન્ધે ભૃગુકુલતિલકે સઙ્ક્રમય્ય સ્વતેજો
યાતે યાતોઽસ્યયોધ્યાં સુખમિહ નિવસન્કાન્તયા કાન્તમૂર્તે ।
શત્રુઘ્નેનૈકદાથો ગતવતિ ભરતે માતુલસ્યાધિવાસં
તાતારબ્ધોઽભિષેકસ્તવ કિલ વિહતઃ કેકયાધીશપુત્ર્યા ॥ ૩૪-૪॥

તાતોક્ત્યા યાતુકામો વનમનુજવધૂસંયુતશ્ચાપધારઃ
પૌરાનારુધ્ય માર્ગે ગુહનિલયગતસ્ત્વં જટાચીરધારી ।
નાવા સન્તીર્ય ગઙ્ગામધિપદવિ પુનસ્તં ભરદ્વાજમારા-
ન્નત્વા તદ્વાક્યહેતોરતિસુખમવસશ્ચિત્રકૂટે ગિરીન્દ્રે ॥ ૩૪-૫॥

શ્રુત્વા પુત્રાર્તિખિન્નં ખલુ ભરતમુખાત્સ્વર્ગયાતં સ્વતાતં
તપ્તો દત્ત્વામ્બુ તસ્મૈ નિદધિથ ભરતે પાદુકાં મેદિનીં ચ ।
અત્રિં નત્વાથ ગત્વા વનમતિવિપુલાં દણ્ડકં ચણ્ડકાયં
હત્વા દૈત્યં વિરાધં સુગતિમકલયશ્ચારુ ભોઃ શારભઙ્ગીમ્ ॥ ૩૪-૬॥

નત્વાઽગસ્ત્યં સમસ્તાશરનિકરસપત્રાકૃતિં તાપસેભ્યઃ
પ્રત્યશ્રૌષીઃ પ્રિયૈષી તદનુ ચ મુનિના વૈષ્ણવે દિવ્યચાપે ।
બ્રહ્માસ્ત્રે ચાપિ દત્તે પથિ પિતૃસુહૃદં વીક્ષ્ય ભૂયો જટાયું
મોદાદ્ગોદાતટાન્તે પરિરમસિ પુરા પઞ્ચવટ્યાં વધૂટ્યા ॥ ૩૪-૭॥

પ્રાપ્તાયાઃ શૂર્પણખ્યા મદનચલધૃતેરર્થનૈર્નિસ્સહાત્મા
તાં સૌમિત્રૌ વિસૃજ્ય પ્રબલતમરુષા તેન નિર્લૂનનાસામ્ ।
દૃષ્ટ્વૈનાં રુષ્ટચિત્તં ખરમભિપતિતં દૂષણં ચ ત્રિમૂર્ધં
વ્યાહિંસીરાશરાનપ્યયુતસમધિકાંસ્તત્ક્ષણાદક્ષતોષ્મા ॥ ૩૪-૮॥

સોદર્યા પ્રોક્તવાર્તાવિવશદશમુખાદિષ્ટમારીચમાયા-
સારઙ્ગં સારસાક્ષ્યા સ્પૃહિતમનુગતઃ પ્રાવધીર્બાણઘાતમ્ ।
તન્માયાક્રન્દનિર્યાપિતભવદનુજાં રાવણસ્તામહાર્ષીત્
તેનાર્તોઽપિ ત્વમન્તઃ કિમપિ મુદમધાસ્તદ્વધોપાયલાભાત્ ॥ ૩૪-૯॥

ભૂયસ્તન્વીં વિચિન્વન્નહૃત દશમુખસ્ત્વદ્વધૂં મદ્વધેને-
ત્યુક્ત્વા યાતે જટાયૌ દિવમથ સુહૃદઃ પ્રાતનોઃ પ્રેતકાર્યમ્ ।
ગૃહ્ણાનં તં કબન્ધં જઘનિથ શબરીં પ્રેક્ષ્ય પમ્પાતટે ત્વં
સમ્પ્રાપ્તો વાતસૂનું ભૃશમુદિતમનાઃ પાહિ વાતાલયેશ ॥ ૩૪-૧૦॥

ઇતિ ચતુસ્ત્રિંશદશકં સમાપ્તમ્ ॥

## પઞ્ચત્રિંશદશકમ્ (૩૫)

શ્રીરામાવતારમ્-૨
35 - Sri Rama Avatar contd.

નીતસ્સુગ્રીવમૈત્રીં તદનુ હનુમતા દુન્દુભેઃ કાયમુચ્ચૈઃ
ક્ષિપ્ત્વાઙ્ગુષ્ઠેન ભૂયો લુલવિથ યુગપત્પત્રિણા સપ્ત સાલાન્ ।
હત્વા સુગ્રીવઘાતોદ્યતમતુલબલં વાલિનં વ્યાજવૃત્ત્યા
વર્ષાવેલામનૈષીર્વિરહતરલિતસ્ત્વં મતઙ્ગાશ્રમાન્તે ॥ ૩૫-૧॥

સુગ્રીવેણાનુજોક્ત્યા સભયમભિયતા વ્યૂહિતાં વાહિનીં તા-
મૃક્ષાણાં વીક્ષ્ય દિક્ષુ દ્રુતમથ દયિતામાર્ગણાયાવનમ્રામ્ ।
સન્દેશં ચાઙ્ગુલીયં પવનસુતકરે પ્રાદિશો મોદશાલી
માર્ગે માર્ગે મમાર્ગે કપિભિરપિ તદા ત્વત્પ્રિયા સપ્રયાસૈઃ ॥ ૩૫-૨॥

ત્વદ્વાર્તાકર્ણનોદ્યદ્ગરુદુરુજવસમ્પાતિસમ્પાતિવાક્ય-
પ્રોત્તીર્ણાર્ણોધિરન્તર્નગરિ જનકજાં વીક્ષ્ય દત્ત્વાઽઙ્ગુલીયમ્ ।
પ્રક્ષુદ્યોદ્યાનમક્ષક્ષપણચણરણઃ સોઢબન્ધો દશાસ્યં
દૃષ્ટ્વા પ્લુષ્ટ્વા ચ લઙ્કાં ઝટિતિ સ હનુમાન્મૌલિરત્નં દદૌ તે ॥ ૩૫-૩॥

ત્વં સુગ્રીવાઙ્ગદાદિપ્રબલકપિચમૂચક્રવિક્રાન્તભૂમી-
ચક્રોઽભિક્રમ્ય પારેજલધિ નિશિચરેન્દ્રાનુજાશ્રીયમાણઃ ।
તત્પ્રોક્તાં શત્રુવાર્તાં રહસિ નિશમયન્પ્રાર્થનાપાર્થ્યરોષ-
પ્રાસ્તાગ્નેયાસ્ત્રતેજસ્ત્રસદુદધિગિરા લબ્ધવાન્મધ્યમાર્ગમ્ ॥ ૩૫-૪॥

કીશૈરાશાન્તરોપાહૃતગિરિનિકરૈઃ સેતુમાધાપ્ય યાતો
યાતૂન્યામર્દ્ય દંષ્ટ્રાનખશિખરિશિલાસાલશસ્ત્રૈઃ સ્વસૈન્યૈઃ ।
વ્યાકુર્વન્સાનુજસ્ત્વં સમરભુવિ પરં વિક્રમં શક્રજેત્રા
વેગાન્નાગાસ્ત્રબદ્ધઃ પતગપતિગરુન્મારુતૈર્મોચિતોઽભૂઃ ॥ ૩૫-૫॥

સૌમિત્રિસ્ત્વત્ર શક્તિપ્રહૃતિગલદસુર્વાતજાનીતશૈલ-

ઘ્રાણાત્પ્રણાનુપેતો વ્યકૃણુત કુસૃતિશ્લાઘિનં મેઘનાદમ્ ।
માયાક્ષોભેષુ વૈભીષણવચનહૃતસ્તમ્ભનઃ કુમ્ભકર્ણં
સમ્પ્રાપ્તં કમ્પિતોર્વીતલમખિલચમૂભક્ષિણં વ્યક્ષિણોસ્ત્વમ્ ॥ ૩૪-૬॥

ગૃહ્ણન્ જમ્ભારિસમ્પ્રેષિતરથકવચૌ રાવણેનાભિયુધ્યન્
બ્રહ્માસ્ત્રેણાસ્ય ભિન્દન્ ગલતતિમબલામગ્નિશુદ્ધાં પ્રગૃહ્ણન્ ।
દેવશ્રેણીવરોજ્જીવિતસમરમૃતૈરક્ષતૈરૃક્ષસઙ્ઘૈ-
ર્લઙ્કાભર્ત્રા ચ સાકં નિજનગરમગાઃ સપ્રિયઃ પુષ્પકેણ ॥ ૩૫-૭॥

પ્રીતો દિવ્યાભિષેકૈરયુતસમધિકાન્વત્સરાન્પર્યરંસી-
ર્મૈથિલ્યાં પાપવાચા શિવ શિવ કિલ તાં ગર્ભિણીમભ્યહાસીઃ ।
શત્રુઘ્નેનાર્દયિત્વા લવણનિશિચરં પ્રાર્દયઃ શૂદ્રપાશં
તાવદ્વાલ્મીકિગેહે કૃતવસતિરુપાસૂત સીતા સુતૌ તે ॥ ૩૫-૮॥

વાલ્મીકેસ્ત્વત્સુતોદ્ગાપિતમધુરકૃતેરાજ્ઞયા યજ્ઞવાટે
સીતાં ત્વય્યાપ્તુકામે ક્ષિતિમવિશદસૌ ત્વં ચ કાલાર્થિતોઽભૂઃ ।
હેતોઃ સૌમિત્રિઘાતી સ્વયમથ સરયૂમગ્નનિશ્શેષભૃત્યૈઃ
સાકં નાકં પ્રયાતો નિજપદમગમો દેવ વૈકુણ્ઠમાદ્યમ્ ॥ ૩૫-૯॥

સોઽયં મર્ત્યાવતારસ્તવ ખલુ નિયતં મર્ત્યશિક્ષાર્થમેવં
વિશ્લેષાર્તિર્નિરાગસ્ત્યજનમપિ ભવેત્કામધર્માતિસક્ત્યા ।
નો ચેત્સ્વાત્માનુભૂતેઃ ક્વનુ તવ મનસો વિક્રિયા ચક્રપાણે
સ ત્વં સત્ત્વૈકમૂર્તે પવનપુરપતે વ્યાધુનુ વ્યાધિતાપાન્ ॥ ૩૫-૧૦॥

ઇતિ પઞ્ચત્રિંશદશકં સમાપ્તમ્ ॥

## ષટ્ત્રિંશદશકમ્ (૩૬)

### પરશુરામાવતારમ્ ।
### 36 - Parasurama Avatar

અત્રેઃ પુત્રતયા પુરા ત્વમનસૂયાયાં હિ દત્તાભિધો
જાતઃ શિષ્યનિબન્ધતન્દ્રિતમનાઃ સ્વસ્થશ્ચરન્કાન્તયા ।

દૃષ્ટો ભક્તતમેન હેહયમહીપાલેન તસ્મૈ વરા-
નષ્ટૈશ્વર્યમુખાન્પ્રદાય દદિથ સ્વેનૈવ ચાન્તે વધમ્ ॥ ૩૬-૧॥

સત્યં કર્તુમથાર્જુનસ્ય ચ વરં તચ્છક્તિમાત્રાનતં
બ્રહ્મદ્વેષિ તદાખિલં નૃપકુલં હન્તું ચ ભૂમેર્ભરમ્ ।
સઞ્જાતો જમદગ્નિતો ભૃગુકુલે ત્વં રેણુકાયાં હરે
રામો નામ તદાત્મજેષ્વવરજઃ પિત્રોરધાઃ સમ્મદમ્ ॥ ૩૬-૨॥

લબ્ધામ્નાયગણશ્ચતુર્દશવયા ગન્ધર્વરાજે મના-
ગાસક્તાં કિલ માતરં પ્રતિ પિતુઃ ક્રોધાકુલસ્યાજ્ઞયા ।
તાતાજ્ઞાતિગસોદરૈઃ સમમિમાં છિત્વાથ શાન્તાત્પિતુ-
સ્તેષાં જીવનયોગમાપિથ વરં માતા ચ તેઽદાદ્વરાન્ ॥ ૩૬-૩॥

પિત્રા માતૃમુદે સ્તવાહૃતવિયદ્ધેનોર્નિજાદાશ્રમાત્
પ્રસ્થાયાથ ભૃગોર્ગિરા હિમગિરાવારાધ્ય ગૌરીપતિમ્ ।
લબ્ધ્વા તત્પરશું તદુક્તદનુજચ્છેદી મહાસ્ત્રાદિકં
પ્રાપ્તો મિત્રમથાકૃતવ્રણમુનિં પ્રાપ્યાગમઃ સ્વાશ્રમમ્ ॥ ૩૬-૪॥

આખેટોપગતોઽર્જુનઃ સુરગવીસમ્પ્રાપ્તસમ્પદ્ગણૈ-
સ્ત્વત્પિત્રા પરિપૂજિતઃ પુરગતો દુર્મન્ત્રિવાચા પુનઃ ।
ગાં ક્રેતું સચિવં ન્યયુઙ્ક્ત કુધિયા તેનાપિ રુન્ધન્મુનિ-
પ્રાણક્ષેપસરોષગોહતચમૂચક્રેણ વત્સો હૃતઃ ॥ ૩૬-૫॥

શુક્રોજ્જીવિતતાતવાક્યચલિતક્રોધોઽથ સખ્યા સમં
બિભ્રદ્ધ્યાતમહોદરોપનિહિતં ચાપં કુઠારં શરાન્ ।
આરૂઢઃ સહવાહયન્તૃકરથં માહિષ્મતીમાવિશન્
વાગ્ભિર્વત્સમદાશુષિ ક્ષિતિપતૌ સમ્પ્રાસ્તુથાઃ સઙ્ગરમ્ ॥ ૩૬-૬॥

પુત્રાણામયુતેન સપ્તદશભિશ્ચાક્ષૌહિણીભિર્મહા-
સેનાનીભિરનેકમિત્રનિવહૈર્વ્યાજૃમ્ભિતાયોધનઃ ।
સદ્યસ્ત્વત્કકુઠારબાણવિદલન્નિશ્શેષસૈન્યોત્કરો
ભીતિપ્રદ્રુતનષ્ટશિષ્ટનયસ્ત્વામાપતદ્ધેહયઃ ॥ ૩૬-૭॥ (આપતત્ હેયયઃ)

લીલાવારિતનર્મદાજલવલલ્લઙ્કેશગર્વાપહ-
શ્રીમદ્બાહુસહસ્રમુક્તબહુશસ્ત્રાસ્ત્રં નિરુન્ધન્નમુમ્ ।
ચક્રે ત્વય્યથ વૈષ્ણવેઽપિ વિફલે બુદ્ધ્વા હરિં ત્વાં મુદા
ધ્યાયન્તં છિતસર્વદોષમવધીઃ સોઽગાત્પરં તે પદમ્ ॥ ૩૬-૮॥

ભૂયોઽમર્ષિતહેહયાત્મજગણૈસ્તાતે હતે રેણુકા-
માઘ્નાનાં હૃદયં નિરીક્ષ્ય બહુશો ઘોરાં પ્રતિજ્ઞાં વહન્ ।
ધ્યાનાનીતરથાયુધસ્ત્વમકૃથા વિપ્રદ્રુહઃ ક્ષત્રિયાન્
દિક્ચક્રેષુ કુઠારયન્વિશિખયન્ નિઃક્ષાત્રિયાં મેદિનીમ્ ॥ ૩૬-૯॥

તાતોજ્જીવનકૃન્નૃપાલકકુલં ત્રિઃસપ્તકૃત્વો જયન્
સન્તર્પ્યાથ સમન્તપઞ્ચકમહારક્તાહૃદૌઘે પિતૄન્ ।
યજ્ઞે ક્ષ્મામપિ કાશ્યપાદિષુ દિશન્ સાલ્વેન યુધ્યન્ પુનઃ
કૃષ્ણોઽમું નિહનિષ્યતીતિ શમિતો યુદ્ધાત્ કુમારૈર્ભવાન્ ॥ ૩૬-૧૦॥ વર્ - કુઠારૈર્ભવાન્
ન્યસ્યાસ્ત્રાણિ મહેન્દ્રભૂભૃતિ તપસ્તન્વન્પુનર્મજ્જિતાં
ગોકર્ણાવધિ સાગરેણ ધરણીં દૃષ્ટ્વાર્થિતસ્તાપસૈઃ ।
ધ્યાતેષ્વાસધૃતાનલાસ્ત્રચકિતં સિન્ધું સ્રુવક્ષેપણા-
દુત્સાર્યોદ્ધૃતકેરલો ભૃગુપતે વાતેશ સંરક્ષ મામ્ ॥ ૩૬-૧૧॥

ઇતિ ષટ્ત્રિંશદશકં સમાપ્તમ્ ।

ઇતિ નવમસ્કન્ધં સમાપ્તમ્ ।

દશમસ્કન્ધમ્ ।

## સપ્તત્રિંશદશકમ્ (૩૭)

### શ્રીકૃષ્ણાવતારોપક્રમમ્ ।
### 37 - Prelude To the Incarnation As Krishna

સાન્દ્રાનન્દતનો હરે નનુ પુરા દૈવાસુરે સઙ્ગરે
ત્વત્કૃત્તા અપિ કર્મશેષવશતો યે તે ન યાતા ગતિમ્ ।
તેષાં ભૂતલજન્મનાં દિતિભુવાં ભારેણ દુરાર્દિતા
ભૂમિઃ પ્રાપ વિરિઞ્ચમાશ્રિતપદં દેવૈઃ પુરૈવાગતૈઃ ॥ ૩૭-૧॥

હા હા દુર્જનભૂરિભારમથિતાં પાથોનિધૌ પાતુકા-
મેતાં પાલય હન્ત મે વિવશતાં સમ્પૃચ્છ દેવાનિમાન્ ।

ઇત્યાદિપ્રચુરપ્રલાપવિવશામાલોક્ય ધાતા મહીં
દેવાનાં વદનાનિ વીક્ષ્ય પરિતો દધ્યૌ ભવન્તં હરે ॥ ૩૭-૨॥

ઊચે ચામ્બુજભૂરમૂનયિ સુરાઃ સત્યં ધરિત્ર્યા વચો
નન્વસ્યા ભવતાં ચ રક્ષણવિધૌ દક્ષો હિ લક્ષ્મીપતિઃ ।
સર્વે શર્વપુરસ્સરા વયમિતો ગત્વા પયોવારિધિં
નત્વા તં સ્તુમહે જવાદિતિ યયુઃ સાકં તવાકેતનમ્ ॥ ૩૭-૩॥

તે મુગ્ધાનિલશાલિદુગ્ધજલધેસ્તીરં ગતાઃ સઙ્ગતા
યાવત્ત્વત્પદચિન્તનૈકમનસસ્તાવત્સ પાથોજભૂઃ ।
ત્વદ્વાચં હૃદયે નિશમ્ય સકલાનાનન્દયન્નૂચિવા-
નાખ્યાતઃ પરમાત્મના સ્વયમહં વાક્યં તદાકર્ણ્યતામ્ ॥ ૩૭-૪॥

જાને દીનદશામહં દિવિષદાં ભૂમેશ્ચ ભીમૈર્નૃપૈ-
સ્તત્ક્ષેપાય ભવામિ યાદવકુલે સોઽહં સમગ્રાત્મના ।
દેવા વૃષ્ણિકુલે ભવન્તુ કલયા દેવાઙ્ગનાશ્ચાવનૌ
મત્સેવાર્થમિતિ ત્વદીયવચનં પાથોજભૂરૂચિવાન્ ॥ ૩૭-૫॥

શ્રુત્વા કર્ણરસાયનં તવ વચઃ સર્વેષુ નિર્વાપિત-
સ્વાન્તેષ્વીશ ગતેષુ તાવકકૃપાપીયૂષતૃપ્તાત્મસુ ।
વિખ્યાતે મથુરાપુરે કિલ ભવત્સાન્નિધ્યપુણ્યોત્તરે
ધન્યાં દેવકનન્દનામુદ્વહદ્રાજા સ શૂરાત્મજઃ ॥ ૩૭-૬॥

ઉદ્વાહાવસિતૌ તદીયસહજઃ કંસોઽથ સમ્માનય-
ન્નેતૌ સૂતતયા ગતઃ પથિ રથે વ્યોમોત્થયા ત્વદ્ગિરા ।
અસ્યાસ્ત્વામતિદુષ્ટમષ્ટમસુતો હન્તેતિ હન્તેરિતઃ
સન્ત્રાસાત્સ તુ હન્તુમન્તિકગતાં તન્વીં કૃપાણીમધાત્ ॥ ૩૭-૭॥

ગૃહ્ણાનશ્ચિકુરેષુ તાં ખલમતિઃ શૌરેશ્ચિરં સાન્ત્વનૈ-
ર્નો મુઞ્ચન્પુનરાત્મજાર્પણગિરા પ્રીતોઽથ યાતો ગૃહાન્ ।
આદ્યં ત્વત્સહજં તથાર્પિતમપિ સ્નેહેન નાહન્નસૌ
દુષ્ટાનામપિ દેવ પુષ્ટકરુણા દૃષ્ટા હિ ધીરેકદા ॥ ૩૭-૮॥

તાવત્ત્વન્મનસૈવ નારદમુનિઃ પ્રોચે સ ભોજેશ્વરં
યૂયં નન્વસુરાઃ સુરાશ્ચ યદવો જાનાસિ કિં ન પ્રભો ।
માયાવી સ હરિર્ભવદ્વધકૃતે ભાવી સુરપ્રાર્થના-
દિત્યાકર્ણ્ય યદૂનદૂધુનદસૌ શૌરેશ્ચ સૂનૂનહન્ ॥ ૩૭-૯॥

પ્રાપ્તે સપ્તમગર્ભતામહિપતૌ ત્વત્પ્રેરણાન્માયયા
નીતે માધવ રોહિણીં ત્વમપિ ભોઃ સચ્ચિત્સુખૈકાત્મકઃ ।
દેવક્યા જઠરં વિવેશિથ વિભો સંસ્તૂયમાનસ્સુરૈઃ
સ ત્વં કૃષ્ણ વિધૂય રોગપટલીં ભક્તિં પરાં દેહિ મે ॥ ૩૭-૧૦॥

ઇતિ સપ્તત્રિંશદશકં સમાપ્તમ્ ।

## અષ્ટાત્રિંશદશક (૩૮)

### શ્રીકૃષ્ણાવતારમ્ ।
### 38 - Incarnation of Sri Krishna

આનન્દરૂપ ભગવન્નયિ તેઽવતારે
પ્રાપ્તે પ્રદીપ્તભવદઙ્ગનિરીયમાણૈઃ ।
કાન્તિવ્રજૈરિવ ઘનાઘનમણ્ડલૈર્દ્યા-
માવૃણ્વતી વિરુરુચે કિલ વર્ષવેલા ॥ ૩૮-૧॥

આશાસુ શીતલતરાસુ પયોદતોયૈ-
રાશાસિતાપ્તિવિવશેષુ ચ સજ્જનેષુ ।
નૈશાકરોદયવિધૌ નિશિ મધ્યમાયાં
ક્લેશાપહસ્ત્રિજગતાં ત્વમિહાઽવિરાસીઃ ॥ ૩૮-૨॥

બાલ્યસ્પૃશાપિ વપુષા દધુષા વિભૂતી-
રુદ્યત્કિરીટકટકાઙ્ગદહારભાસા ।
શઙ્ખારિવારિજગદાપરિભાસિતેન
મેઘાસિતેન પરિલેસિથ સૂતિગેહે ॥ ૩૮-૩॥

વક્ષઃસ્થલીસુખનિલીનવિલાસિલક્ષ્મી-
મન્દાક્ષલક્ષિતકટાક્ષવિમોક્ષભેદૈઃ ।
તન્મન્દિરસ્ય ખલકંસકૃતામલક્ષ્મી-
મુન્માર્જયન્નિવ વિરેજિથ વાસુદેવ ॥ ૩૮-૪॥

શૌરિસ્તુ ધીરમુનિમણ્ડલચેતસોઽપિ
દૂરસ્થિતં વપુરુદીક્ષ્ય નિજેક્ષણાભ્યામ્ ।
આનન્દબાષ્પપુલકોદ્ગમગદ્ગદાર્દ્ર-
સ્તુષ્ટાવ દૃષ્ટિમકરન્દરસં ભવન્તમ્ ॥ ૩૮-૫॥

દેવ પ્રસીદ પરપૂરુષ તાપવલ્લી-
નિર્લૂનદાત્ર સમનેત્ર કલાવિલાસિન્ ।
ખેદાનપાકુરુ કૃપાગુરુભિઃ કટાક્ષૈ-
રિત્યાદિ તેન મુદિતેન ચિરં નુતોઽભૂઃ ॥ ૩૮-૬॥

માત્રા ચ નેત્રસલિલાસ્તૃતગાત્રવલ્લ્યા
સ્તોત્રૈરભિષ્ટુતગુણઃ કરુણાલયસ્ત્વમ્ ।
પ્રાચીનજન્મયુગલં પ્રતિબોધ્ય તાભ્યાં
માતુર્ગિરા દધિથ માનુષબાલવેષમ્ ॥ ૩૮-૭॥

ત્વત્પ્રેરિતસ્તતદનુ નન્દતનૂજયા તે
વ્યત્યાસમારચયિતું સ હિ શૂરસૂનુઃ ।
ત્વાં હસ્તયોરધૃત ચિત્તવિધાર્યમાર્યૈ-
રમ્ભોરુહસ્થકલહંસકિશોરરમ્યમ્ ॥ ૩૮-૮॥

જાતા તદા પશુપસદ્મનિ યોગનિદ્રા
નિદ્રાવિમુદ્રિતમથાકૃત પૌરલોકમ્ ।
ત્વત્પ્રેરણાત્કિમિહ ચિત્રમચેતનૈર્યદ્-
દ્વારૈઃ સ્વયં વ્યઘટિ સઙ્ઘટિતૈસ્સુગાઢમ્ ॥ ૩૮-૯॥

શેષેણ ભૂરિફણવારિતવારિણાઽથ
સ્વૈરં પ્રદર્શિતપથો મણિદીપિતેન ।
ત્વાં ધારયન્ સ ખલુ ધન્યતમઃ પ્રતસ્થે
સોઽયં ત્વમીશ મમ નાશય રોગવેગાન્ ॥ ૩૮-૧૦॥

ઇતિ અષ્ટાત્રિંશદશકં સમાપ્તમ્ ।

# એકોનચત્વારિંશદશકમ્ (૩૯)

યોગમાયા પ્રાદુર્ભાવં તથા ગોકુલે કૃષ્ણજન્મોત્સવમ્ ॥

39 - Manifestation of Yogamaya and Celebration of Birth of Shrikrishna at Gokula

ભવન્તમયમુદ્વહન્ યદુકુલોદ્વહો નિસ્સરન્
દદર્શ ગગનોચ્ચલજ્જલભરાં કલિન્દાત્મજામ્ ।
અહો સલિલસઞ્ચયઃ સ પુનરૈન્દ્રજાલોદિતો
જલૌઘ ઇવ તત્ક્ષણાત્પ્રપદમેયતામાયયૌ ॥ ૩૯-૧॥

પ્રસુપ્તપશુપાલિકાં નિભૃતમારુદદ્બાલિકા-
મપાવૃતકવાટિકાં પશુપવાટિકામાવિશન્ ।
ભવન્તમયમર્પયન્ પ્રસવતલ્પકે તત્પદા-
દ્વહન્ કપટકન્યકાં સ્વપુરમાગતો વેગતઃ ॥ ૩૯-૨॥

તતસ્ત્વદનુજારવક્ષપિતનિદ્રવેગદ્રવ-
દ્ભટોત્કરનિવેદિતપ્રસવવાર્તયૈવાર્તિમાન્ ।
વિમુક્તચિકુરોત્કરસ્ત્વરિતમાપતન્ ભોજરા-
ડતુષ્ટ ઇવ દૃષ્ટવાન્ ભગિનિકાકરે કન્યકામ્ ॥ ૩૯-૩॥

ધ્રુવં કપટશાલિનો મધુહરસ્ય માયા ભવે-
દસાવિતિ કિશોરિકાં ભગિનિકાકરાલિઙ્ગિતામ્ ।
દ્વિપો નલિનિકાન્તરાદિવ મૃણાલિકામાક્ષિપ-
ન્નયં ત્વદનુજામજામુપલપટ્ટકે પિષ્ટવાન્ ॥ ૩૯-૪॥

તતો ભવદુપાસકો ઝટિતિ મૃત્યુપાશાદિવ
પ્રમુચ્ય તરસૈવ સા સમધિરૂઢરૂપાન્તરા ।
અધસ્તલમજગ્મુષી વિકસદષ્ટબાહુસ્ફુરન્-
મહાયુધમહો ગતા કિલ વિહાયસા દિદ્યુતે ॥ ૩૯-૫॥

નૃશંસતર કંસ તે કિમુ મયા વિનિષ્પિષ્ટયા
બભૂવ ભવદન્તકઃ ક્વચન ચિન્ત્યતાં તે હિતમ્ ।
ઇતિ ત્વદનુજા વિભો ખલમુદીર્ય તં જગ્મુષી
મરુદ્ગણપણાયિતા ભુવિ ચ મન્દિરાણ્યેયુષી ॥ ૩૯-૬॥

પ્રગે પુનરગાત્મજાવચનમીરિતા ભૂભુજા
પ્રલમ્બબકપૂતનાપ્રમુખદાનવા માનિનઃ ।
ભવન્નિધનકામ્યયા જગતિ બભ્રમુર્નિર્ભયાઃ
કુમારકવિમારકાઃ કિમિવ દુષ્કરં નિષ્કૃપૈઃ ॥ ૩૯-૭ ॥

તતઃ પશુપમન્દિરે ત્વયિ મુકુન્દ નન્દપ્રિયા-
પ્રસૂતિશયનેશયે રુદતિ કિઞ્ચિદઞ્ચત્પદે ।
વિબુધ્ય વનિતાજનૈસ્તનયસમ્ભવે ઘોષિતે
મુદા કિમુ વદામ્યહો સકલમાકુલં ગોકુલમ્ ॥ ૩૯-૮ ॥

અહો ખલુ યશોદયા નવકલાયચેતોહરં
ભવન્તમલમન્તિકે પ્રથમમાપિબન્ત્યા દૃશા ।
પુનઃ સ્તનભરં નિજં સપદિ પાયયન્ત્યા મુદા
મનોહરતનુસ્પૃશા જગતિ પુણ્યવન્તો જિતાઃ ॥ ૩૯-૯ ॥

ભવત્કુશલકામ્યયા સ ખલુ નન્દગોપસ્તદા
પ્રમોદભરસઙ્કુલો દ્વિજકુલાય કિં નાદદાત્ ।
તથૈવ પશુપાલકાઃ કિમુ ન મઙ્ગલં તેનિરે
જગત્રિતયમઙ્ગલ ત્વમિહ પાહિ મામામયાત્ ॥ ૩૯-૧૦ ॥

ઇતિ એકોનચત્વારિંશદશકં સમાપ્તમ્ ।

## ચત્વારિંશદશકમ્ (૪૦)

### પૂતનામોક્ષમ્ ।
### 40 - Salvation of Putana

તદનુ નન્દમમન્દશુભાસ્પદં નૃપપુરીં કરદાનકૃતે ગતમ્ ।
સમવલોક્ય જગાદ ભવત્પિતા વિદિતકંસસહાયજનોદ્યમઃ ॥ ૪૦-૧ ॥

અયિ સખે તવ બાલકજન્મ માં સુખયતેઽદ્ય નિજાત્મજજન્મવત્ ।
ઇતિ ભવત્પિતૃતાં વ્રજનાયકે સમધિરોપ્ય શશંસ તમાદરાત્ ॥ ૪૦-૨ ॥

ઇહ ચ સન્ત્યનિમિત્તશતાનિ તે કટકસીમ્નિ તતો લઘુ ગમ્યતામ્ ।
ઇતિ ચ તદ્વચસા વ્રજનાયકો ભવદપાયભિયા દ્રુતમાયયૌ ॥ ૪૦-૩ ॥

અવસરે ખલુ તત્ર ચ કાચન વ્રજપદે મધુરાકૃતિરઙ્ગના ।
તરલષટ્પદલાલિતકુન્તલા કપટપોતક તે નિકટં ગતા ॥ ૪૦-૪ ॥

સપદિ સા હૃતબાલકચેતના નિશિચરાન્વયજા કિલ પૂતના ।
વ્રજવધૂષ્વિહ કેયમિતિ ક્ષણં વિમૃશતીષુ ભવન્તમુપાદદે ॥ ૪૦-૫ ॥

લલિતભાવવિલાસહૃતાત્મભિર્યુવતિભિઃ પ્રતિરોદ્ધુમપારિતા ।
સ્તનમસૌ ભવનાન્તનિષેદુષી પ્રદદુષી ભવતે કપટાત્મને ॥ ૪૦-૬ ॥

સમધિરુહ્ય તદઙ્કમશઙ્કિતસ્ત્વમથ બાલકલોપનરોષિતઃ ।
મહદિવામ્રફલં કુચમણ્ડલં પ્રતિચુચૂષિથ દુર્વિષદૂષિતમ્ ॥ ૪૦-૭ ॥

અસુભિરેવ સમં ધયતિ ત્વયિ સ્તનમસૌ સ્તનિતોપમનિસ્વના ।
નિરપતદ્ભયદાયિ નિજં વપુઃ પ્રતિગતા પ્રવિસાર્ય ભુજાવુભૌ ॥ ૪૦-૮ ॥

ભયદઘોષણભીષણવિગ્રહશ્રવણદર્શનમોહિતવલ્લવે ।
વ્રજપદે તદુરઃસ્થલખેલનં નનુ ભવન્તમગૃહ્ણત ગોપિકાઃ ॥ ૪૦-૯ ॥

ભુવનમઙ્ગલનામભિરેવ તે યુવતિભિર્બહુધા કૃતરક્ષણઃ ।
ત્વમયિ વાતનિકેતનનાથ મામગદયન્ કુરુ તાવકસેવકમ્ ॥ ૪૦-૧૦ ॥

ઇતિ ચત્વારિંશદશકં સમાપ્તમ્ ।

## એકચત્વારિંશદશકમ્ (૪૧)

પૂતનાદહનં તથા કૃષ્ણલાળનાહ્લાદમ્ ।
41 - Cremation of Putana and Joy of Caressing Krishna

વ્રજેશ્વરઃ શૌરિવચો નિશમ્ય સમાવ્રજન્નધ્વનિ ભીતચેતાઃ ।
નિષ્પિષ્ટનિશ્શેષતરું નિરીક્ષ્ય કઞ્ચિત્પદાર્થં શરણં ગતસ્ત્વામ્ ॥ ૪૧-૧ ॥

નિશમ્ય ગોપીવચનાદુદન્તં સર્વેઽપિ ગોપા ભયવિસ્મયાન્ધાઃ ।
ત્વત્પાતિતં ઘોરપિશાચદેહં દેહુર્વિદૂરેઽથ કુઠારકૃત્તમ્ ॥ ૪૧-૨ ॥

ત્વત્પીતપૂતસ્તનતચ્છરીરાત્સમુચ્ચલન્નુચ્ચતરો હિ ધૂમઃ ।
શઙ્કામધાદાગરવઃ કિમેષ કિં ચાન્દનો ગૌલ્ગુલવોઽથવેતિ ॥ ૪૧-૩॥

મદઙ્ગસઙ્ગસ્ય ફલં ન દૂરે ક્ષણેન તાવદ્ભવતામપિ સ્યાત્ ।
ઇત્યુલ્લપન્વલ્લવતલ્લજેભ્યસ્ત્વં પૂતનામાતનુથાસ્સુગન્ધિમ્ ॥ ૪૧-૪॥

ચિત્રં પિશાચ્યા ન હતઃ કુમારશ્ચિત્રં પુરૈવાકથિ શૌરિણેદમ્ ।
ઇતિ પ્રશંસન્કિલ ગોપલોકો ભવન્મુખાલોકરસે ન્યમાઙ્ક્ષીત્ ॥ ૪૧-૫॥

દિને દિનેઽથ પ્રતિવૃદ્ધલક્ષ્મીરક્ષીણમાઙ્ગલ્યશતો વ્રજોઽયમ્ ।
ભવન્નિવાસાદયિ વાસુદેવ પ્રમોદસાન્દ્રઃ પરિતો વિરેજે ॥ ૪૧-૬॥

ગૃહેષુ તે કોમલરૂપહાસમિથઃ કથાસઙ્કુલિતાઃ કમન્યઃ ।
વૃત્તેષુ કૃત્યેષુ ભવન્નિરીક્ષાસમાગતાઃ પ્રત્યહમત્યનન્દન્ ॥ ૪૧-૭॥

અહો કુમારો મયિ દત્તદૃષ્ટિઃ સ્મિતં કૃતં માં પ્રતિ વત્સકેન ।
એહ્યેહિ મામિત્યુપસાર્ય પાણિં ત્વયીશ કિં કિં ન કૃતં વધૂભિઃ ॥ ૪૧-૮॥

ભવદ્વપુઃસ્પર્શનકૌતુકેન કરાત્કરં ગોપવધૂજનેન ।
નીતસ્ત્વમાતામ્રસરોજમાલાવ્યાલમ્બિલોલમ્બતુલામલાસીઃ ॥ ૪૧-૯॥

નિપાયયન્તી સ્તનમઙ્કગં ત્વાં વિલોકયન્તી વદનં હસન્તી ।
દશાં યશોદા કતમાન્ન ભેજે સ તાદૃશઃ પાહિ હરે ગદાન્મામ્ ॥ ૪૧-૧૦॥

ઇતિ એકચત્વારિંશદશકં સમાપ્તમ્ ॥

## દ્વિચત્વારિંશદશકમ્ (૪૨)

### શકટાસુરવધમ્ ।
42 - Slaying of Shakatasura

કદાપિ જન્મર્ક્ષદિને તવ પ્રભો નિમન્ત્રિતજ્ઞાતિવધૂમહીસુરા ।
મહાનસસ્ત્વાં સવિધે નિધાય સા મહાનસાદૌ વવૃતે વ્રજેશ્વરી ॥ ૪૨-૧॥

તતો ભવત્રાણનિયુક્તબાલકપ્રભીતિસઙ્ક્રન્દનસઙ્કુલારવૈઃ ।

વિમિશ્રમશ્રાવિ ભવત્સમીપતઃ પરિસ્ફુટદ્દારુચટચ્ચટારવઃ ॥ ૪૨-૨॥

તતસ્તદાકર્ણનસમ્ભ્રમશ્રમપ્રકમ્પિવક્ષોજભરા વ્રજાઙ્ગનાઃ ।
ભવન્તમન્તર્દદૃશુઃ સમન્તતો વિનિષ્પતદ્દારુણદારુમધ્યગમ્ ॥ ૪૨-૩॥

શિશોરહો કિં કિમભૂદિતિ દ્રુતં પ્રધાવ્ય નન્દઃ પશુપાશ્ચ ભૂસુરાઃ ।
ભવન્તમાલોક્ય યશોદયા ધૃતં સમાશ્વસન્નશ્રુજલાર્દ્રલોચનાઃ ॥ ૪૨-૪॥

કસ્કો નુ કૌતસ્કુત એષ વિસ્મયો વિશઙ્કટં યચ્છકટં વિપાટિતમ્ ।
ન કારણં કિઞ્ચિદિહેતિ તે સ્થિતાઃ સ્વનાસિકાદત્તકરાસ્ત્વદીક્ષકાઃ ॥ ૪૨-૫॥

કુમારકસ્યાસ્ય પયોધરાર્થિનઃ પ્રરોદને લોલપદામ્બુજાહતમ્ ।
મયા મયા દૃષ્ટમનો વિપર્યગાદિતીશ તે પાલકબાલકા જગુઃ ॥ ૪૨-૬॥

ભિયા તદા કિઞ્ચિદજાનતામિદં કુમારકાણામતિદુર્ઘટં વચઃ ।
ભવત્પ્રભાવાવિદુરૈરિતીરિતં મનાગિવાશઙ્ક્યત દૃષ્ટપૂતનૈઃ ॥ ૪૨-૭॥

પ્રવાલતામ્રં કિમિદં પદં ક્ષતં સરોજરમ્યૌ નુ કરૌ વિરોજિતૌ ।
ઇતિ પ્રસર્પત્કરુણાતરઙ્ગિતાસ્ત્વદઙ્ગમાપસ્પૃશુરઙ્ગનાજનાઃ ॥ ૪૨-૮॥

અયે સુતં દેહિ જગત્પતેઃ કૃપાતરઙ્ગપાતાત્પરિપાતમદ્ય મે ।
ઇતિ સ્મ સઙ્ગૃહ્ય પિતા ત્વદઙ્ગકં મુહુર્મુહુઃ શ્લિષ્યતિ જાતકણ્ટકઃ ॥ ૪૨-૯॥

અનોનિલીનઃ કિલ હન્તુમાગતઃ સુરારિરેવં ભવતા વિહિંસિતઃ ।
રજોઽપિ નો દૃષ્ટમમુષ્ય તત્કથં સ શુદ્ધસત્ત્વે ત્વયિ લીનવાન્ધ્રુવમ્ ॥ ૪૨-૧૦॥

પ્રપૂજિતૈસ્તત્ર તતો દ્વિજાતિભિર્વિશેષતો લમ્ભિતમઙ્ગલાશિષઃ ।
વ્રજં નિજૈર્બાલ્યરસૈર્વિમોહયન્મરુત્પુરાધીશ રુજાં જહીહિ મે ॥ ૪૨-૧૧॥

ઇતિ દ્વિચત્વારિંશદશકં સમાપ્તમ્ ।

## ત્રિચત્વારિંશદશકમ્ (૪૩)

તૃણાવર્તવધમ્ ।
43 - The Slaying of Trinavarta

ત્વામેકદા ગુરુમરુત્પુરનાથ વોઢું
ગાઢાધિરૂઢગરિમાણમપારયન્તી ।
માતા નિધાય શયને કિમિદં બતેતિ
ધ્યાયન્ત્યચેષ્ટત ગૃહેષુ નિવિષ્ટશઙ્કા ॥ ૪૩-૧॥

તાવદ્વિદૂરમુપકર્ણિતઘોરઘોષ-
વ્યાજૃમ્ભિપાંસુપટલીપરિપૂરિતાશઃ ।
વાત્યાવપુઃ સ કિલ દૈત્યવરસ્તૃણાવ-
ર્તાખ્યો જહાર જનમાનસહારિણં ત્વામ્ ॥ ૪૩-૨॥

ઉદ્દામપાંસુતિમિરાહતદૃષ્ટિપાતે
દ્રષ્ટું કિમપ્યકુશલે પશુપાલલોકે ।
હા બાલકસ્ય કિમિતિ ત્વદુપાન્તમાપ્તા
માતા ભવન્તમવિલોક્ય ભૃશં રુરોદ ॥ ૪૩-૩॥

તાવત્સ દાનવવરોઽપિ ચ દીનમૂર્તિ-
ર્ભાવત્કભારપરિધારણલૂનવેગઃ ।
સઙ્કોચમાપ તદનુ ક્ષતપાંસુઘોષે
ઘોષે વ્યતાયત ભવજ્જનનીનિનાદઃ ॥ ૪૩-૪॥

રોદોપકર્ણનવશાદુપગમ્ય ગેહં
ક્રન્દત્સુ નન્દમુખગોપકુલેષુ દીનઃ ।
ત્વાં દાનવસ્ત્વખિલમુક્તિકરં મુમુક્ષુ-
સ્ત્વય્યપ્રમુઞ્ચતિ પપાત વિયત્પ્રદેશાત્ ॥ ૪૩-૫॥

રોદાકુલાસ્તદનુ ગોપગણા બહિષ્ઠ-
પાષાણપૃષ્ઠભુવિ દેહમતિસ્થવિષ્ઠમ્ ।
પ્રૈક્ષન્ત હન્ત નિપતન્તમમુષ્ય વક્ષ-
સ્યક્ષીણમેવ ચ ભવન્તમલં હસન્તમ્ ॥ ૪૩-૬॥

ગ્રાવપ્રપાતપરિપિષ્ટગરિષ્ઠદેહ-
ભ્રષ્ટાસુદુષ્ટદનુજોપરિ ધૃષ્ટહાસમ્ ।
આઘ્નાનમમ્બુજકરેણ ભવન્તમેત્ય
ગોપા દધુર્ગિરિવરાદિવ નીલરત્નમ્ ॥ ૪૩-૭॥

એકૈકમાશુ પરિગૃહ્ય નિકામનન્દ-

ન્નન્દાદિગોપપરિરબ્ધવિચુમ્બિતાઙ્ગમ્ ।
આદાતુકામપરિશઙ્કિતગોપનારી-
હસ્તામ્બુજપ્રપતિતં પ્રણુમો ભવન્તમ્ ॥ ૪૩-૮॥

ભૂયોઽપિ કિન્નુ કૃણુમઃ પ્રણતાર્તિહારી
ગોવિન્દ એવ પરિપાલયતાત્સુતં નઃ ।
ઇત્યાદિ માતરપિતૃપ્રમુખૈસ્તદાનીં
સમ્પ્રાર્થિતસ્ત્વદવનાય વિભો ત્વમેવ ॥ ૪૩-૯॥

વાતાત્મકં દનુજમેવમયિ પ્રધૂન્વન્
વાતોદ્ભવાન્મમ ગદાન્કિમુ નો ધુનોષિ ।
કિં વા કરોમિ પુનરપ્યનિલાલયેશ
નિશ્શેષરોગશમનં મુહુરર્થયે ત્વામ્ ॥ ૪૩-૧૦॥

ઇતિ ત્રિચત્વારિંશદશકં સમાપ્તમ્ ।

## ચતુશ્ચત્વારિંશદશકમ્ (૪૪)

### નામકરણસંસ્કારાદિ ।
### 44 - Naming Ceremony Etc

ગૂઢં વસુદેવગિરા કર્તું તે નિષ્ક્રિયસ્ય સંસ્કારાન્ ।
હૃદ્ગતહોરાતત્વો ગર્ગમુનિસ્ત્વદ્ગૃહં વિભો ગતવાન્ ॥ ૪૪-૧॥

નન્દોઽથ નન્દિતાત્મા વૃન્દિષ્ટં માનયન્નમું યમિનામ્ ।
મન્દસ્મિતાર્દ્રમૂચે ત્વત્સંસ્કારાન્ વિધાતુમુત્સુકધીઃ ॥ ૪૪-૨॥

યદુવંશાચાર્યત્વાત્સુનિભૃતમિદમાર્ય કાર્યમિતિ કથયન્ ।
ગર્ગો નિર્ગતપુલકશ્ચક્રે તવ સાગ્રજસ્ય નામાનિ ॥ ૪૪-૩॥

કથમસ્ય નામ કુર્વે સહસ્રનામ્નો હ્યનન્તનામ્નો વા ।
ઇતિ નૂનં ગર્ગમુનિશ્ચક્રે તવ નામ નામ રહસિ વિભો ॥ ૪૪-૪॥

કૃષિધાતુણકારાભ્યાં સત્તાનન્દાત્મતાં કિલાભિલપત્ ।

જગદઘકર્ષિત્વં વા કથયદૃષિઃ કૃષ્ણનામ તે વ્યતનોત્ ॥ ૪૪-૫॥

અન્યાંશ્ચ નામભેદાન્ વ્યાકુર્વન્નગ્રજે ચ રામાદીન્ ।
અતિમાનુષાનુભાવં ન્યગદત્ત્વામપ્રકાશયન્પિત્રે ॥ ૪૪-૬॥

સ્નિહ્યતિ યસ્તવ પુત્રે મુહ્યતિ સ ન માયિકૈઃ પુનશ્શોકૈઃ ।
દ્રુહ્યતિ યસ્સ તુ નશ્યેદિત્યવદત્તે મહત્ત્વમૃષિવર્યઃ ॥ ૪૪-૭॥

જેષ્યતિ બહુતરદૈત્યાન્ નેષ્યતિ નિજબન્ધુલોકમમલપદમ્ ।
શ્રોષ્યતિ સુવિમલકીર્તીરસ્યેતિ ભવદ્વિભૂતિમૃષિરૂચે ॥ ૪૪-૮॥

અમુનૈવ સર્વદુર્ગં તરિતાસ્થ કૃતાસ્થમત્ર તિષ્ઠધ્વમ્ ।
હરિરેવેત્યનભિલપન્નિત્યાદિ ત્વામવર્ણયત્સ મુનિઃ ॥ ૪૪-૯॥

ગર્ગેઽથ નિર્ગતેઽસ્મિન્ નન્દિતનન્દાદિનન્દ્યમાનસ્ત્વમ્ ।
મદ્ગદમુદ્ગતકરુણો નિર્ગમય શ્રીમરુત્પુરાધીશ ॥ ૪૪-૧૦॥

ઇતિ ચતુશ્ચત્વારિંશદશકં સમાપ્તમ્ ।

---

## પઞ્ચચત્વારિંશદશકમ્ (૪૫)

### શ્રીકૃષ્ણસ્ય બાલલીલાઃ ।
### 45 - Krishna’s Childhood Pranks

અયિ સબલ મુરારે પાણિજાનુપ્રચારૈઃ
કિમપિ ભવનભાગાન્ ભૂષયન્તૌ ભવન્તૌ ।
ચલિતચરણકઞ્જૌ મઞ્જુમઞ્જીરશિઞ્જા-
શ્રવણકુતુકભાજૌ ચેરતુશ્ચારુ વેગાત્ ॥ ૪૫-૧॥

મૃદુ મૃદુ વિહસન્તાવુન્મિષદ્દન્તવન્તૌ
વદનપતિતકેશૌ દૃશ્યપાદાબ્જદેશૌ ।
ભુજગલિતકરાન્તવ્યાલગત્કઙ્કણાઙ્કૌ
મતિમહરતમુચ્ચૈઃ પશ્યતાં વિશ્વનૃણામ્ ॥ ૪૫-૨॥

અનુસરતિ જનૌઘે કૌતુકવ્યાકુલાક્ષે

કિમપિ કૃતનિનાદં વ્યાહસન્તૌ દ્રવન્તૌ ।
વલિતવદનપદ્મં પૃષ્ઠતો દત્તદૃષ્ટી
કિમિવ ન વિદધાથે કૌતુકં વાસુદેવ ॥ ૪૫-૩॥

દ્રુતગતિષુ પતન્તાવુત્થિતૌ લિપ્તપઙ્કૌ
દિવિ મુનિભિરપઙ્કૈઃ સસ્મિતં વન્દ્યમાનૌ ।
દ્રુતમથ જનનીભ્યાં સાનુકમ્પં ગૃહીતૌ
મુહુરપિ પરિરબ્ધૌ દ્રાગ્યુવાં ચુમ્બિતૌ ચ ॥ ૪૫-૪॥

સ્નુતકુચભરમઙ્કે ધારયન્તી ભવન્તં
તરલમતિ યશોદા સ્તન્યદા ધન્યધન્યા ।
કપટપશુપ મધ્યે મુગ્ધહાસાઙ્કુરં તે
દશનમુકુલહૃદ્યં વીક્ષ્ય વક્ત્રં જહર્ષ ॥ ૪૫-૫॥

તદનુ ચરણચારી દારકૈઃ સાકમારા-
ન્નિલયતતિષુ ખેલન્ બાલચાપલ્યશાલી ।
ભવનશુકબિડાલાન્ વત્સકાંશ્ચાનુધાવન્
કથમપિ કૃતહાસૈર્ગોપકૈર્વારિતોઽભૂઃ ॥ ૪૫-૬॥

હલધરસહિતસ્ત્વં યત્ર યત્રોપયાતો
વિવશપતિતનેત્રાસ્તત્ર તત્રૈવ ગોપ્યઃ ।
વિગલિતગૃહકૃત્યા વિસ્મૃતાપત્યભૃત્યા
મુરહર મુહુરત્યન્તાકુલા નિત્યમાસન્ ॥ ૪૫-૭॥

પ્રતિનવનવનીતં ગોપિકાદત્તમિચ્છન્
કલપદમુપગાયન્ કોમલં ક્વાપિ નૃત્યન્ ।
સદયયુવતિલોકૈરર્પિતં સર્પિરશ્નન્
ક્વચન નવવિપક્વં દુગ્ધમપ્યાપિબસ્ત્વમ્ ॥ ૪૫-૮॥

મમ ખલુ બલિગેહે યાચનં જાતમાસ્તા-
મિહ પુનરબલાનામગ્રતો નૈવ કુર્વે ।
ઇતિ વિહિતમતિઃ કિં દેવ સન્ત્યજ્ય યાચ્ઞાં
દધિઘૃતમહરસ્ત્વં ચારુણા ચોરણેન ॥ ૪૫-૯॥

તવ દધિઘૃતમોષે ઘોષયોષાજનાના-
મભજત હૃદિ રોષો નાવકાશં ન શોકઃ ।
હૃદયમપિ મુષિત્વા હર્ષસિન્ધૌ ન્યધાસ્ત્વં

સ મમ શમય રોગાન્વાતગેહાધિનાથ ॥ ૪૫-૧૦॥

ઇતિ પઞ્ચચત્વારિંશદશકં સમાપ્તમ્ ।

## ષટ્ચત્વારિંશદશકમ્ (૪૬)

### વિશ્વરૂપદર્શનમ્ ।
46 - Revelation of the Cosmic Form

અયિ દેવ પુરા કિલ ત્વયિ સ્વયમુત્તાનશયે સ્તનન્ધયે ।
પરિજૃમ્ભણતો વ્યપાવૃતે વદને વિશ્વમચષ્ટ વલ્લવી ॥ ૪૬-૧॥

પુનરપ્યથ બાલકૈઃ સમં ત્વયિ લીલાનિરતે જગત્પતે ।
ફલસઞ્ચયવઞ્ચનક્રુધા તવ મૃદ્ભોજનમૂચુરર્ભકાઃ ॥ ૪૬-૨॥

અયિ તે પ્રલયાવધૌ વિભો ક્ષિતિતોયાદિસમસ્તભક્ષિણઃ ।
મૃદુપાશનતો રુજા ભવેદિતિ ભીતા જનની ચુકોપ સા ॥ ૪૬-૩॥

અયિ દુર્વિનયાત્મક ત્વયા કિમુ મૃત્સા બત વત્સ ભક્ષિતા ।
ઇતિ માતૃગિરં ચિરં વિભો વિતથાં ત્વં પ્રતિજજ્ઞિષે હસન્ ॥ ૪૬-૪॥

અયિ તે સકલૈર્વિનિશ્ચિતે વિમતિશ્ચેદ્વદનં વિદાર્યતામ્ ।
ઇતિ માતૃવિભર્ત્સિતો મુખં વિકસત્પદ્મનિભં વ્યદારયઃ ॥ ૪૬-૫॥

અપિ મૃલ્લવદર્શનોત્સુકાં જનનીં તાં બહુ તર્પયન્નિવ ।
પૃથિવીં નિખિલાં ન કેવલં ભુવનાન્યપ્યખિલાન્યદીદૃશઃ ॥ ૪૬-૬॥

કુહચિદ્વનમમ્બુધિઃ ક્વચિત્ ક્વચિદભ્રં કુહચિદ્રસાતલમ્ ।
મનુજા દનુજાઃ ક્વચિત્સુરા દદૃશે કિં ન તદા ત્વદાનને ॥ ૪૬-૭॥

કલશામ્બુધિશાયિનં પુનઃ પરવૈકુણ્ઠપદાધિવાસિનમ્ ।
સ્વપુરશ્ચ નિજાર્ભકાત્મકં કતિધા ત્વાં ન દદર્શ સા મુખે ॥ ૪૬-૮॥

વિકસદ્ભુવને મુખોદરે નનુ ભૂયોઽપિ તથાવિધાનનઃ ।
અનયા સ્ફુટમીક્ષિતો ભવાનનવસ્થાં જગતાં બતાતનોત્ ॥ ૪૬-૯॥

ધૃતતત્ત્વધિયં તદા ક્ષણં જનનીં તાં પ્રણયેન મોહયન્ ।

સ્તનમમ્બ દિશેત્યુપાસજન્ ભગવન્નદ્ભુતબાલ પાહિ મામ્ ॥ ૪૬-૧૦॥

ઇતિ ષટ્ચત્વારિંશદશકં સમાપ્તમ્ ।

## સપ્તચત્વારિંશદશકમ્ (૪૭)

### ઉલૂખલબન્ધનમ્ ।
### 47 - Tying Krishna To the Mortar

એકદા દધિવિમાથકારિણીં માતરં સમુપસેદિવાન્ ભવાન્ ।
સ્તન્યલોલુપતયા નિવારયન્નઙ્કમેત્ય પપિવાન્પયોધરૌ ॥ ૪૭-૧॥

અર્ધપીતકુચકુડ્મલે ત્વયિ સ્નિગ્ધહાસમધુરાનનામ્બુજે ।
દુગ્ધમીશ દહને પરિસ્રુતં ધર્તુમાશુ જનની જગામ તે ॥ ૪૭-૨॥

સામિપીતરસભઙ્ગસઙ્ગતક્રોધભારપરિભૂતચેતસા ।
મન્થદણ્ડમુપગૃહ્ય પાટિતં હન્ત દેવ દધિભાજનં ત્વયા ॥ ૪૭-૩॥

ઉચ્ચલદ્ધ્વનિતમુચ્ચકૈસ્તદા સન્નિશમ્ય જનની સમાદ્રુતા ।
ત્વદ્યશોવિસરવદ્દદર્શ સા સદ્ય એવ દધિ વિસ્તૃતં ક્ષિતૌ ॥ ૪૬-૪॥

વેદમાર્ગપરિમાર્ગિતં રુષા ત્વામવીક્ષ્ય પરિમાર્ગયન્ત્યસૌ ।
સન્દદર્શ સુકૃતિન્યુલૂખલે દીયમાનનવનીતમોતવે ॥ ૪૬-૫॥

ત્વાં પ્રગૃહ્ય બત ભીતિભાવનાભાસુરાનનસરોજમાશુ સા ।
રોષરૂષિતમુખી સખીપુરો બન્ધનાય રશનામુપાદદે ॥ ૪૭-૬॥

બન્ધુમિચ્છતિ યમેવ સજ્જનસ્તં ભવન્તમયિ બન્ધુમિચ્છતિ ।
સા નિયુજ્ય રશનાગુણાન્બહૂન્ દ્વ્યઙ્ગુલોનમખિલં કિલૈક્ષત ॥ ૪૭-૭॥

વિસ્મિતોત્સ્મિતસખીજનેક્ષિતાં સ્વિન્નસન્નવપુષં નિરીક્ષ્ય તામ્ ।
નિત્યમુક્તવપુરપ્યહો હરે બન્ધમેવ કૃપયાન્વમન્યથાઃ ॥ ૪૭-૮॥

સ્થીયતાં ચિરમુલૂખલે ખલેત્યાગતા ભવનમેવ સા યદા ।
પ્રાગુલૂખલબિલાન્તરે તદા સર્પિરર્પિતમદન્નવાસ્થિતાઃ ॥ ૪૭-૯॥

યદ્યપાશસુગમો ભવાન્વિભો સંયતઃ કિમુ સપાશયાનયા ।

એવમાદિ દિવિજૈરભિષ્ટુતો વાતનાથ પરિપાહિ માં ગદાત્ ॥ ૪૭-૧૦॥

ઇતિ સપ્તચત્વારિંશદશકં સમાપ્તમ્ ।

## અષ્ટચત્વારિંશદશકમ્ (૪૮)

નળકૂબર-મણિગ્રીવયોઃ શાપમોક્ષમ્ ।
48 - Redemption of Nalakubara And Manigriva

મુદા સુરૌઘૈસ્ત્વમુદારસમ્મદૈરુદીર્ય દામોદર ઇત્યભિષ્ટુતઃ ।
મૃદૂદરઃ સ્વૈરમુલૂખલે લગન્નદૂરતો દ્વૌ કકુભાવુદૈક્ષથાઃ ॥ ૪૮-૧॥

કુબેરસૂનુર્નલકૂબરાભિધઃ પરો મણિગ્રીવ ઇતિ પ્રથાં ગતઃ ।
મહેશસેવાધિગતશ્રિયોન્મદૌ ચિરં કિલ ત્વદ્વિમુખાવખેલતામ્ ॥ ૪૮-૨॥

સુરાપગાયાં કિલ તૌ મદોત્કટૌ સુરાપગાયદ્બહુયૌવતાવૃતૌ ।
વિવાસસૌ કેલિપરૌ સ નારદો ભવત્પદૈકપ્રવણો નિરૈક્ષત ॥ ૪૮-૩॥

ભિયા પ્રિયાલોકમુપાત્તવાસસં પુરો નિરીક્ષ્યાપિ મદાન્ધચેતસૌ ।
ઇમૌ ભવદ્ભક્ત્યુપશાન્તિસિદ્ધયે મુનિર્જગૌ શાન્તિમૃતે કુતસ્સુખમ્ ॥ ૪૮-૪॥

યુવામવાપ્તૌ કકુભાત્મતાં ચિરં હરિં નિરીક્ષ્યાથ પદં સ્વમાપ્નુતમ્ ।
ઇતીરિતૌ તૌ ભવદીક્ષણસ્પૃહાં ગતૌ વ્રજાન્તે કકુભૌ બભૂવતુઃ ॥ ૪૮-૫॥

અતન્દ્રમિન્દ્રદ્રુયુગં તથાવિધં સમેયુષા મન્થરગામિના ત્વયા ।
તિરાયિતોલૂખલરોધનિર્ધુતૌ ચિરાય જીર્ણૌ પરિપાતિતૌ તરૂ ॥ ૪૮-૬॥

અભાજિ શાખિદ્વિતયં યદા ત્વયા તદૈવ તદ્ગર્ભતલાન્નિરેયુષા ।
મહાત્વિષા યક્ષયુગેન તત્ક્ષણાદભાજિ ગોવિન્દ ભવાનપિ સ્તવૈઃ ॥ ૪૮-૭॥

ઇહાન્યભક્તોઽપિ સમેષ્યતિ ક્રમાદ્ભવન્તમેતૌ ખલુ રુદ્રસેવકૌ ।
મુનિપ્રસાદાદ્ભવદઙ્ઘ્રિમાગતૌ ગતૌ વૃણાનૌ ખલુ ભક્તિમુત્તમામ્ ॥ ૪૮-૮॥

તતસ્તરૂદ્દારણદારુણારવપ્રકમ્પિસમ્પાતિનિ ગોપમણ્ડલે ।
વિલજ્જિતત્વજ્જનનીમુખેક્ષિણા વ્યમોક્ષિ નન્દેન ભવાન્વિમોક્ષદઃ ॥ ૪૮-૯॥

મહીરુહોર્મધ્યગતો બતાર્ભકો હરેઃ પ્રભાવાદપરિક્ષતોઽધુના ।

ઇતિ બ્રુવાણૈર્ગમિતો ગૃહં ભવાન્મરુત્પુરાધીશ્વર પાહિ માં ગદાત્ ॥ ૪૮-૧૦॥

ઇતિ અષ્ટચત્વારિંશદશકં સમાપ્તમ્ ।

## એકોનપઞ્ચાશત્તમદશકમ્ (૪૯)

વૃન્દાવનપ્રવેશમ્ ।
49 - Journey To Vrindavana

ભવત્પ્રભાવાવિદુરા હિ ગોપાસ્તરુપ્રપાતાદિકમત્ર ગોષ્ઠે ।
અહેતુમુત્પાતગણં વિશઙ્ક્ય પ્રયાતુમન્યત્ર મનો વિતેનુઃ ॥ ૪૯-૧॥

તત્રોપનન્દાભિધગોપવર્યો જગૌ ભવત્પ્રેરણયૈવ નૂનમ્ ।
ઇતઃ પ્રતીચ્યાં વિપિનં મનોજ્ઞં વૃન્દાવનં નામ વિરાજતીતિ ॥ ૪૯-૨॥

બૃહદ્વનં તત્ખલુ નન્દમુખ્યા વિધાય ગૌષ્ઠીનમથ ક્ષણેન ।
ત્વદન્વિતત્વજ્જનનીનિવિષ્ટગરિષ્ઠયાનાનુગતા વિચેલુઃ ॥ ૪૯-૩॥

અનોમનોજ્ઞધ્વનિધેનુપાલીખુરપ્રણાદાન્તરતો વધૂભિઃ ।
ભવદ્વિનોદાલપિતાક્ષરાણિ પ્રપીય નાજ્ઞાયત માર્ગદૈર્ઘ્યમ્ ॥ ૪૯-૪॥

નિરીક્ષ્ય વૃન્દાવનમીશ નન્દત્પ્રસૂનકુન્દપ્રમુખદ્રુમૌઘમ્ ।
અમોદથાશ્શાદ્વલસાન્દ્રલક્ષ્મ્યા હરિન્મણીકુટ્ટિમપુષ્ટશોભમ્ ॥ ૪૯-૫॥

નવાકનિર્વ્યૂઢનિવાસભેદેષ્વશેષગોપેષુ સુખાસિતેષુ ।
વનશ્રિયં ગોપકિશોરપાલીવિમિશ્રિતઃ પર્યવલોકથાસ્ત્વમ્ ॥ ૪૯-૬॥

અરાલમાર્ગાગતનિર્મલાપાં મરાલકુજાકૃતનર્મલાપામ્ ।
નિરન્તરસ્મેરસરોજવક્ત્રાં કલિન્દકન્યાં સમલોકયસ્ત્વમ્ ॥ ૪૯-૭॥

મયૂરકેકાશતલોભનીયં મયૂખમાલશબલં મણીનામ્ ।
વિરિઞ્ચલોકસ્પૃશમુચ્ચશૃઙ્ગૈર્ગિરિં ચ ગોવર્ધનમૈક્ષથાસ્ત્વમ્ ॥ ૪૯-૮॥

સમં તતો ગોપકુમારકૈસ્ત્વં સમન્તતો યત્ર વનાન્તમાગાઃ ।
તતસ્તતસ્તાં કુટિલામપશ્યઃ કલિન્દજાં રાગવતીમિવૈકામ્ ॥ ૪૯-૯॥

તથાવિધેઽસ્મિન્વિપિને પશવ્યે સમુત્સુકો વત્સગણપ્રચારે ।

ચરન્સરામોઽથ કુમારકૈસ્ત્વં સમીરગેહાધિપ પાહિ રોગાત્ ॥ ૪૯-૧૦॥

ઇતિ એકોનપઞ્ચાશત્તમદશકં સમાપ્તમ્ ।

## પઞ્ચાશત્તમદશકમ્ (૫૦)

વત્સાસુર-બકાસુરયોઃ વધમ્ ।
50 - Slaying of VatsAsura And BakAsura

તરલમધુકૃદ્વૃન્દે વૃન્દાવનેઽથ મનોહરે
પશુપશિશુભિસ્સાકં વત્સાનુપાલનલોલુપઃ ।
હલધરસખો દેવ શ્રીમન્ વિચેરિથ ધારયન્
ગવલમુરલીવેત્રં નેત્રાભિરામતનુદ્યુતિઃ ॥ ૫૦-૧॥

વિહિતજગતીરક્ષં લક્ષ્મીકરામ્બુજલાલિતં
દદતિ ચરણદ્વન્દ્વં વૃન્દાવને ત્વયિ પાવને ।
કિમિવ ન બભૌ સમ્પત્સમ્પૂરિતં તરુવલ્લરી-
સલિલધરણીગોત્રક્ષેત્રાદિકં કમલાપતે ॥ ૫૦-૨॥

વિલસદુલપે કાન્તારાન્તે સમીરણશીતલે
વિપુલયમુનાતીરે ગોવર્ધનાચલમૂર્ધસુ ।
લલિતમુરલીનાદસ્સઞ્ચારયન્ખલુ વાત્સકં
ક્વચન દિવસે દૈત્યં વત્સાકૃતિં ત્વમુદૈક્ષથાઃ ॥ ૫૦-૩॥

રભસવિલસત્પુચ્છં વિચ્છાયતોઽસ્ય વિલોકયન્
કિમપિ વલિતસ્કન્ધં રન્ધ્રપ્રતીક્ષમુદીક્ષિતમ્ ।
તમથ ચરણે બિભ્રદ્વિભ્રામયન્મુહુરુચ્ચકૈઃ
કુહચન મહાવૃક્ષે ચિક્ષેપિથ ક્ષતજીવિતમ્ ॥ ૫૦-૪॥

નિપતતિ મહાદૈત્યે જાત્યા દુરાત્મનિ તત્ક્ષણં
નિપતનજવક્ષુણ્ણક્ષોણીરુહક્ષતકાનને ।
દિવિ પરિમિલદ્વૃન્દા વૃન્દારકાઃ કુસુમોત્કરૈઃ
શિરસિ ભવતો હર્ષાદ્વર્ષન્તિ નામ તદા હરે ॥ ૫૦-૫॥

સુરભિલતમા મૂર્ધન્યૂર્ધ્વં કુતઃ કુસુમાવલી
નિપતતિ તવેત્યુક્તો બાલૈઃ સહેલમુદૈરયઃ ।
ઝટિતિ દનુજક્ષેપેણોર્ધ્વં ગતસ્તરુમણ્ડલાત્
કુસુમનિકરસ્સોઽયં નૂનં સમેતિ શનૈરિતિ ॥ ૫૦-૬॥

ક્વચન દિવસે ભૂયો ભૂયસ્તરે પરુષાતપે
તપનતનયાપાથઃ પાતું ગતા ભવદાદયઃ ।
ચલિતગરુતં પ્રેક્ષામાસુર્બકં ખલુ વિસ્મૃતં
ક્ષિતિધરગરુચ્છેદે કૈલાસશૈલમિવાપરમ્ ॥ ૫૦-૭॥

પિબતિ સલિલં ગોપવ્રાતે ભવન્તમભિદ્રુતઃ
સ કિલ નિગિલન્નગ્નિપ્રખ્યં પુનર્દ્રુતમુદ્વમન્ ।
દલયિતુમગાત્ત્રોટ્યાઃ કોટ્યા તદા તુ ભવાન્વિભો
ખલજનભિદા ચુઞ્ચુશ્ચઞ્ચૂ પ્રગૃહ્ય દદાર તમ્ ॥ ૫૦-૮॥

સપદિ સહજાં સન્દ્રષ્ટું વા મૃતાં ખલુ પૂતના-
મનુજમઘમપ્યગ્રે ગત્વા પ્રતીક્ષિતુમેવ વા ।
શમનનિલયં યાતે તસ્મિન્બકે સુમનોગણે
કિરતિ સુમનોવૃન્દં વૃન્દાવનાદ્ગૃહમૈયથાઃ ॥ ૫૦-૯॥

લલિતમુરલીનાદં દૂરાન્નિશમ્ય વધૂજનૈ-
સ્ત્વરિતમુપગમ્યારાદારૂઢમોદમુદીક્ષિતઃ ।
જનિતજનનીનન્દાનન્દસ્સમીરણમન્દિર-
પ્રથિતવસતે શૌરે દૂરીકુરુષ્વ મમામયાન્ ॥ ૫૦-૧૦॥

ઇતિ પઞ્ચાશત્તમશકં સમાપ્તં

## એકપઞ્ચાશત્તમશકમ્ (૫૧)

અઘાસુરવધમ્ ।
51 - Slaying of AghAsura

કદાચન વ્રજશિશુભિઃ સમં ભવાન્ વનાશને વિહિતમતિઃ પ્રગેતરામ્ ।

સમાવૃતો બહુતરવત્સમણ્ડલૈઃ સતેમનૈર્નિરગમદીશ જેમનૈઃ ॥ ૫૧-૧॥

વિનિર્યતસ્તવ ચરણામ્બુજદ્વયાદુદઞ્ચિતં ત્રિભુવનપાવનં રજઃ ।
મહર્ષયઃ પુલકધરૈઃ કલેવરૈરુદૂહિરે ધૃતભવદીક્ષણોત્સવાઃ ॥ ૫૧-૨॥

પ્રચારયત્યવિરલશાદ્વલે તલે પશૂન્વિભો ભવતિ સમં કુમારકૈઃ ।
અઘાસુરો ન્યરુણદઘાય વર્તની ભયાનકઃ સપદિ શયાનકાકૃતિઃ ॥ ૫૧-૩॥

મહાચલપ્રતિમતનોર્ગુહાનિભપ્રસારિતપ્રથિતમુખસ્ય કાનને ।
મુખોદરં વિહરણકૌતુકાદ્ગતાઃ કુમારકાઃ કિમપિ વિદૂરગે ત્વયિ ॥ ૫૧-૪॥

પ્રમાદતઃ પ્રવિશતિ પન્નગોદરં ક્વથત્તનૌ પશુપકુલે સવાત્સકે ।
વિદન્નિદં ત્વમપિ વિવેશિથ પ્રભો સુહૃજ્જનં વિશરણમાશુ રક્ષિતુમ્ ॥ ૫૧-૫॥

ગલોદરે વિપુલિતવર્ષ્મણા ત્વયા મહોરગે લુઠતિ નિરુદ્ધમારુતે ।
દ્રુતં ભવાન્વિદલિતકણ્ઠમણ્ડલો વિમોચયન્પશુપપશૂન્ વિનિર્યયૌ ॥ ૫૧-૬॥

ક્ષણં દિવિ ત્વદુપગમાર્થમાસ્થિતં મહાસુરપ્રભવમહો મહો મહત્ ।
વિનિર્ગતે ત્વયિ તુ નિલીનમઞ્જસા નભઃસ્થલે નનૃતુરથો જગુસ્સુરાઃ ॥ ૫૧-૭॥

સવિસ્મયૈઃ કમલભવાદિભિઃ સુરૈરનુદ્રુતસ્તદનુ ગતઃ કુમારકૈઃ ।
દિને પુનસ્તરુણદશામુપેયુષિ સ્વકૈર્ભવાનતનુત ભોજનોત્સવમ્ ॥ ૫૧-૮॥

વિષાણિકામપિ મુરલીં નિતમ્બકે નિવેશયન્કબલધરઃ કરામ્બુજે ।
પ્રહાસયન્કલવચનૈઃ કુમારકાન્ બુભોજિથ ત્રિદશગણૈર્મુદા નુતઃ ॥ ૫૧-૯॥

સુખાશનં ત્વિહ તવ ગોપમણ્ડલે મખાશનાત્પ્રિયમિવ દેવમણ્ડલે ।
ઇતિ સ્તુતસ્ત્રિદશવરૈર્જગત્પતે મરુત્પુરીનિલય ગદાત્પ્રપાહિ મામ્ ॥ ૫૧-૧૦॥

ઇતિ એકપઞ્ચાશત્તમદશકં સમાપ્તમ્ ।

## દ્વિપઞ્ચાશત્તમદશકમ્ (૫૨)

વત્સસ્તેયં તથા બ્રહ્મગર્વશમનમ્ ।
52 - The Stealing of the Calves By Brahma And Humbling of Brahma’s Pride.

અન્યાવતારનિકરેષ્વનિરીક્ષિતં તે ભૂમાતિરેકમભિવીક્ષ્ય તદાઘમોક્ષે ।
બ્રહ્મા પરીક્ષિતુમનાઃ સ પરોક્ષભાવં નિન્યેઽથ વત્સકગણાન્પ્રવિતત્ય માયામ્ ॥ ૫૨-૧॥

વત્સાનવીક્ષ્ય વિવશે પશુપોત્કરે તાનાનેતુકામ ઇવ ધાતૃમતાનુવર્તી ।
ત્વં સામિભુક્તકબલો ગતવાંસ્તદાનીં ભુક્તાંસ્તિરોધિત સરોજભવઃ કુમારાન્ ॥ ૫૨-૨॥

વત્સાયિતસ્તદનુ ગોપગણાયિતસ્ત્વં શિક્યાદિભાણ્ડમુરલીગવલાદિરૂપઃ ।
પ્રાગ્વદ્વિહૃત્ય વિપિનેષુ ચિરાય સાયં ત્વં માયયાથ બહુધા વ્રજમાયયાથ ॥ ૫૨-૩॥

ત્વામેવ શિક્યગવલાદિમયં દધાનો ભૂયસ્ત્વમેવ પશુવત્સકબાલરૂપઃ ।
ગોરૂપિણીભિરપિ ગોપવધૂમયીભિરાસાદિતોઽસિ જનનીભિરતિપ્રહર્ષાત્ ॥ ૫૨-૪॥

જીવં હિ કઞ્ચિદભિમાનવશાત્સ્વકીયં મત્વા તનૂજ ઇતિ રાગભરં વહન્ત્યઃ ।
આત્માનમેવ તુ ભવન્તમવાપ્ય સૂનું પ્રીતિં યયુર્ન કિયતીં વનિતાશ્ચ ગાવઃ ॥ ૫૨-૫॥

એવં પ્રતિક્ષણવિજૃમ્ભિતહર્ષભારનિશ્શેષગોપગણલાલિતભૂરિમૂર્તિમ્ ।
ત્વામગ્રજોઽપિ બુબુધે કિલ વત્સરાન્તે બ્રહ્માત્મનોરપિ મહાન્યુવયોર્વિશેષઃ ॥ ૫૨-૬॥

વર્ષાવધૌ નવપુરાતનવત્સપાલાન્ દૃષ્ટ્વા વિવેકમસૃણે દ્રુહિણે વિમૂઢે ।
પ્રાદીદૃશઃ પ્રતિનવાન્મકુટાઙ્ગદાદિભૂષાંશ્ચતુર્ભુજયુજઃ સજલામ્બુદાભાન્ ॥ ૫૨-૭॥

પ્રત્યેકમેવ કમલાપરિલાલિતાઙ્ગાન્ ભોગીન્દ્રભોગશયનાન્નયનાભિરામાન્ ।
લીલાનિમીલિતદૃશઃ સનકાદિયોગિવ્યાસેવિતાન્કમલભૂર્ભવતો દદર્શ ॥ ૫૨-૮॥

નારાયણાકૃતિમસઙ્ખ્યતમાં નિરીક્ષ્ય સર્વત્ર સેવકમપિ સ્વમવેક્ષ્ય ધાતા ।
માયાનિમગ્નહૃદયો વિમુમોહ યાવદેકો બભૂવિથ તદા કબલાર્ધપાણિઃ ॥ ૫૨-૯॥

નશ્યન્મદે તદનુ વિશ્વપતિં મુહુસ્ત્વાં નત્વા ચ નૂતવતિ ધાતરિ ધામ યાતે ।
પોતૈઃ સમં પ્રમુદિતૈઃ પ્રવિશન્નિકેતં વાતાલયાધિપ વિભો પરિપાહિ રોગાત્ ॥ ૫૨-૧૦॥

ઇતિ દ્વિપઞ્ચાશત્તમદશકં સમાપ્તં

## ત્રિપઞ્ચાશત્તમદશકમ્ (૫૩)

### ધેનુકાસુરવધમ્ ।

53 - Slaying of Dhenukasura

અતીત્ય બાલ્યં જગતાં પતે ત્વમુપેત્ય પૌગણ્ડવયો મનોજ્ઞમ્ ।
ઉપેક્ષ્ય વત્સાવનમુત્સવેન પ્રાવર્તથા ગોગણપાલનાયામ્ ॥ ૫૩-૧॥

ઉપક્રમસ્યાનુગુણૈવ સેયં મરુત્પુરાધીશ તવ પ્રવૃત્તિઃ ।
ગોત્રાપરિત્રાણકૃતેઽવતીર્ણસ્તદેવ દેવારભથાસ્તદા યત્ ॥ ૫૩-૨॥

કદાપિ રામેણ સમં વનાન્તે વનશ્રિયં વીક્ષ્ય ચરન્સુખેન ।
શ્રીદામનામ્નઃ સ્વસખસ્ય વાચા મોદાદગા ધેનુકકાનનં ત્વમ્ ॥ ૫૩-૩॥

ઉત્તાલતાલીનિવહે ત્વદુક્ત્યા બલેન ધૂતેઽથ બલેન દોર્ભ્યામ્ ।
મૃદુઃ ખરશ્ચાભ્યપતત્પુરસ્તાત્ ફલોત્કરો ધેનુકદાનવોઽપિ ॥ ૫૩-૪॥

સમુદ્યતો ધૈનુકપાલનેઽહં વધં કથં ધૈનુકમદ્ય કુર્વે ।
ઇતીવ મત્વા ધ્રુવમગ્રજેન સુરૌઘયોદ્ધારમજીઘતસ્ત્વમ્ ॥ ૫૩-૫॥

તદીયભૃત્યાનપિ જમ્બુકત્વેનોપાગતાનગ્રજસંયુતસ્ત્વમ્ ।
જમ્બૂફલાનીવ તદા નિરાસ્થસ્તાલેષુ ખેલન્ભગવન્ નિરાસ્થઃ ॥ ૫૩-૬॥

વિનિઘ્નતિ ત્વય્યથ જમ્બુકૌઘં સનામકત્વાદ્વરુણસ્તદાનીમ્ ।
ભયાકુલો જમ્બુકનામધેયં શ્રુતિપ્રસિદ્ધં વ્યધિતેતિ મન્યે ॥ ૫૩-૭॥

તવાવતારસ્ય ફલં મુરારે સઞ્જાતમદ્યેતિ સુરૈર્નુતસ્ત્વમ્ ।
સત્યં ફલં જાતમિહેતિ હાસી બાલૈઃ સમં તાલફલાન્યભુઙ્ક્થાઃ ॥ ૫૩-૮॥

મધુદ્રવસ્રુન્તિ બૃહન્તિ તાનિ ફલાનિ મેદોભરભૃન્તિ ભુક્ત્વા ।
તૃપ્તૈશ્ચ દૃપ્તૈર્ભવનં ફલૌઘં વહદ્ભિરાગાઃ ખલુ બાલકૈસ્ત્વમ્ ॥ ૫૩-૯॥

હતો હતો ધેનુક ઇત્યુપેત્ય ફલાન્યદદ્ભિર્મધુરાણિ લોકૈઃ ।
જયેતિ જીવેતિ નુતો વિભો ત્વં મરુત્પુરાધીશ્વર પાહિ રોગાત્ ॥ ૫૩-૧૦॥

ઇતિ ત્રિપઞ્ચાશત્તમદશકં સમાપ્તમ્ ।

## ચતુઃપઞ્ચાશત્તમદશકમ્ (૫૪)

## કાલિયસ્ય કાલિન્દીપ્રાપ્તિઃ તથા વિષબાધા
## 54 - Reason For Kaliya Coming To the Yamuna And Affliction by Poison.

ત્વત્સેવોત્કઃ સૌભરિર્નામ પૂર્વં કાલિન્ધ્યન્તર્દ્વાદશાબ્દં તપસ્યન્ ।
મીનવ્રાતે સ્નેહવાન્ભોગલોલે તાર્ક્ષ્યં સાક્ષાદૈક્ષતાગ્રે કદાચિત્ ॥ ૫૪-૧ ॥

ત્વદ્વાહં તં સક્ષુધં તૃક્ષસૂનું મીનં કઞ્ચિજ્જક્ષતં લક્ષયન્ સઃ ।
તપ્તશ્ચિત્તે શપ્તવાનત્ર ચેત્ત્વં જન્તૂન્ ભોક્તા જીવિતં ચાપિ મોક્તા ॥ ૫૪-૨ ॥

તસ્મિન્કાલે કાલિયઃ ક્ષ્વેલદર્પાત્સર્પારાતેઃ કલ્પિતં ભાગમશ્નન્ ।
તેન ક્રોધાત્ત્વત્પદામ્ભોજભાજા પક્ષક્ષિપ્તસ્તદ્દુરાપં પયોઽગાત્ ॥ ૫૪-૩ ॥

ઘોરે તસ્મિન્સૂરજાનીરવાસે તીરે વૃક્ષા વિક્ષતાઃ ક્ષ્વેલવેગાત્ ।
પક્ષિવ્રાતાઃ પેતુરભ્રે પતન્તઃ કારુણ્યાર્દ્રં ત્વન્મનસ્તેન જાતમ્ ॥ ૫૪-૪ ॥

કાલે તસ્મિન્નેકદા સીરપાણિં મુક્ત્વા યાતે યામુનં કાનનાન્તમ્ ।
ત્વય્યુદ્દામગ્રીષ્મભીષ્મોષ્મતપ્તા ગોગોપાલા વ્યાપિબન્ ક્ષ્વેલતોયમ્ ॥ ૫૪-૫ ॥

નશ્યજ્જીવાન્ વિચ્યુતાન્ ક્ષ્માતલે તાન્ વિશ્વાન્ પશ્યન્નચ્યુત ત્વં દયાર્દ્રઃ ।
પ્રાપ્યોપાન્તં જીવયામાસિથ દ્રાક્ પીયૂષામ્ભોવર્ષિભિઃ શ્રીકટાક્ષૈઃ ॥ ૫૪-૬ ॥

કિં કિં જાતો હર્ષવર્ષાતિરેકઃ સર્વાઙ્ગેષ્વિત્યુત્થિતા ગોપસઙ્ઘાઃ ।
દૃષ્ટ્વાઽગ્રે ત્વાં ત્વત્કૃતં તદ્વિદન્તસ્ત્વામાલિઙ્ગન્ દૃષ્ટનાનાપ્રભાવાઃ ॥ ૫૪-૭ ॥

ગાવશ્ચૈવં લબ્ધજીવાઃ ક્ષણેન સ્ફીતાનન્દાસ્ત્વાં ચ દૃષ્ટ્વા પુરસ્તાત્ ।
દ્રાગાવવ્રુઃ સર્વતો હર્ષબાષ્પં વ્યામુઞ્ચન્ત્યો મન્દમુદ્યન્નિનાદાઃ ॥ ૫૪-૮ ॥

રોમાઞ્ચોઽયં સર્વતો નઃ શરીરે ભૂયસ્યન્તઃ કાચિદાનન્દમૂર્છા ।
આશ્ચર્યોઽયં ક્ષ્વેલવેગો મુકુન્દેત્યુક્તો ગોપૈર્નન્દિતો વન્દિતોઽભૂઃ ॥ ૫૪-૯ ॥

એવં ભક્તાન્મુક્તજીવાનપિ ત્વં મુગ્ધાપાઙ્ગૈરસ્તરોગાંસ્તનોષિ ।
તાદૃગ્ભૂતસ્ફીતકારુણ્યભૂમા રોગાત્પાયા વાયુગેહાધિનાથ ॥ ૫૪-૧૦ ॥

ઇતિ ચતુઃપઞ્ચાશત્તમદશકં સમાપ્તમ્ ।

# પઞ્ચપઞ્ચાશત્તમદશકમ્ (૫૫)

## કાલિયનર્તનમ્ ।
## 55 - Krishna’s Dance On Kaliya

અથ વારિણિ ઘોરતરં ફણિનં પ્રતિવારયિતું કૃતધીર્ભગવન્ ।
દ્રુતમારિથ તીરગનીપતરું વિષમારુતશોષિતપર્ણચયમ્ ॥ ૫૫-૧॥

અધિરુહ્ય પદામ્બુરુહેણ ચ તં નવપલ્લવતુલ્યમોઽહારુચા ।
હ્રદવારિણિ દૂરતરં ન્યપતઃ પરિઘૂર્ણિતઘોરતરઙ્ગગણે ॥ ૫૫-૨॥

ભુવનત્રયભારભૃતો ભવતો ગુરુભારવિકમ્પિવિજૃમ્ભિજલા ।
પરિમજ્જયતિ સ્મ ધનુઃશતકં તટિની ઝટિતિ સ્ફુટઘોષવતી ॥ ૫૫-૩॥

અથ દિક્ષુ વિદિક્ષુ પરિક્ષુભિતભ્રમિતોદરવારિનિનાદભરૈઃ ।
ઉદકાદુદગાદુરગાધિપતિસ્ત્વદુપાન્તમશાન્તરુષાન્ધમનાઃ ॥ ૫૫-૪॥

ફણશ‍ૃઙ્ગસહસ્રવિનિસ્સૃમરજ્વલદગ્નિકણોગ્રવિષામ્બુધરમ્ ।
પુરતઃ ફણિનં સમલોકયથા બહુશ‍ૃઙ્ગિણમઞ્જનશૈલમિવ ॥ ૫૫-૫॥

જ્વલદક્ષિપરિક્ષરદુગ્રવિષશ્વસનોષ્મભરઃ સ મહાભુજગઃ ।
પરિદંશ્ય ભવન્તમનન્તબલં સમવેષ્ટયદસ્ફુટચેષ્ટમહો ॥ ૫૫-૬॥

અવિલોક્ય ભવન્તમથાકુલિતે તટગામિનિ બાલકધેનુગણે ।
વ્રજગેહતલેઽપ્યનિમિત્તશતં સમુદીક્ષ્ય ગતા યમુનાં પશુપાઃ ॥ ૫૫-૭॥

અખિલેષુ વિભો ભવદીયદશામવલોક્ય જિહાસુષુ જીવભરમ્ ।
ફણિબન્ધનમાશુ વિમુચ્ય જવાદુદગમ્યત હાસજુષા ભવતા ॥ ૫૫-૮॥

અધિરુહ્ય તતઃ ફણિરાજફણાન્નનૃતે ભવતા મૃદુપાદરુચા ।
કલશિઞ્ચિતનૂપુરમઞ્ચુમિલત્કરકઙ્કણસઙ્કુલસઙ્ક્વણિતમ્ ॥ ૫૫-૯॥

જહૃષુઃ પશુપાસ્તુતુષુર્મુનયો વવૃષુઃ કુસુમાનિ સુરેન્દ્રગણાઃ ।
ત્વયિ નૃત્યતિ મારુતગેહપતે પરિપાહિ સ માં ત્વમદાન્તગદાત્ ॥ ૫૫-૧૦॥

ઇતિ પઞ્ચપઞ્ચાત્તમદશકં સમાપ્તમ્ ।

# ષટ્પઞ્ચાશત્તમદશકમ્ (૫૬)

## કાલિયગર્વશમનં તથા ભગવદનુગ્રહમ્ ।
## 56 - Humbling of Kalia's Pride And Lord Blessing Kaliya

રુચિરકમ્પિતકુણ્ડલમણ્ડલઃ સુચિરમીશ નનર્તિથ પન્નગે ।
અમરતાડિતદુન્દુભિસુન્દરં વિયતિ ગાયતિ દૈવતયૌવતે ॥ ૫૬-૧॥

નમતિ યદ્યદમુષ્ય શિરો હરે પરિવિહાય તદુન્નતમુન્નતમ્ ।
પરિમથન્પદપઙ્કરુહા ચિરં વ્યહરથાઃ કરતાલમનોહરમ્ ॥ ૫૬-૨॥

ત્વદવભગ્નવિભુગ્નફણાગણે ગલિતશોણિતશોણિતપાથસિ ।
ફણિપતાવવસીદતિ સન્નતાસ્તદબલાસ્તવ માધવ પાદયોઃ ॥ ૫૬-૩॥

અયિ પુરૈવ ચિરાય પરિશ્રુતત્વદનુભાવવિલીનહૃદો હિ તાઃ ।
મુનિભિરપ્યનવાપ્યપથૈઃ સ્તવૈર્નુનુવુરીશ ભવન્તમયન્ત્રિતમ્ ॥ ૫૬-૪॥

ફણિવધૂજનભક્તિવિલોકનપ્રવિકસત્કરુણાકુલચેતસા ।
ફણિપતિર્ભવતાચ્યુત જીવિતસ્ત્વયિ સમર્પિતમૂર્તિરવાનમત્ ॥ ૫૬-૫॥

રમણકં વ્રજ વારિધિમધ્યગં ફણિરિપુર્ન કરોતિ વિરોધિતામ્ ।
ઇતિ ભવદ્વચનાન્યતિમાનયન્ ફણિપતિર્નિરગાદુરગૈઃ સમમ્ ॥ ૫૬-૬॥

ફણિવધૂજનદત્તમણિવ્રજજ્વલિતહારદુકૂલવિભૂષિતઃ ।
તટગતૈઃ પ્રમદાશ્રુવિમિશ્રિતૈઃ સમગથાઃ સ્વજનૈર્દિવસાવધૌ ॥ ૫૬-૭॥

નિશિ પુનસ્તમસા વ્રજમન્દિરં વ્રજિતુમક્ષમ એવ જનોત્કરે ।
સ્વપતિ તત્ર ભવચ્ચરણાશ્રયે દવકૃશાનુરરુન્ધ સમન્તતઃ ॥ ૫૬-૮॥

પ્રબુધિતાનથ પાલય પાલયેત્યુદયદાર્તરવાન્ પશુપાલકાન્ ।
અવિતુમાશુ પપાથ મહાનલં કિમિહ ચિત્રમયં ખલુ તે મુખમ્ ॥ ૫૬-૯॥

શિખિનિ વર્ણત એવ હિ પીતતા પરિલસત્યધુના ક્રિયયાઽપ્યસૌ ।
ઇતિ નુતઃ પશુપૈર્મુદિતૈર્વિભો હર હરે દુરિતૈઃ સહ મે ગદાન્ ॥ ૫૬-૧૦॥

ઇતિ ષટ્પઞ્ચાશત્તમદશકં સમાપ્તં

## સપ્તપઞ્ચાશત્તમદશકમ્ (૫૭)

### પ્રલમ્બાસુરવધમ્ ।
57 - Slaying of Pralambasura

રામસખઃ ક્વાપિ દિને કામદ ભગવન્ ગતો ભવાન્વિપિનમ્ ।
સૂનુભિરપિ ગોપાનાં ધેનુભિરભિસંવૃતો લસદ્વેષઃ ॥ ૫૭-૧॥

સન્દર્શયન્બલાય સ્વૈરં વૃન્દાવનશ્રિયં વિમલામ્ ।
કાણ્ડીરૈઃ સહ બાલૈર્ભાણ્ડીરકમાગમો વટં ક્રીડન્ ॥ ૫૭-૨॥

તાવત્તાવકનિધનસ્પૃહયાલુર્ગોપમૂર્તિરદયાલુઃ ।
દૈત્યઃ પ્રલમ્બનામા પ્રલમ્બબાહું ભવન્તમાપેદે ॥ ૫૭-૩॥

જાનન્નપ્યવિજાનન્નિવ તેન સમં નિબદ્ધસૌહાર્દઃ ।
વટનિકટે પટુપશુપવ્યાબદ્ધં દ્વન્દ્વયુદ્ધમારબ્ધાઃ ॥ ૫૭-૪॥

ગોપાન્વિભજ્ય તન્વન્સઙ્ઘં બલભદ્રકં ભવત્કમપિ ।
ત્વદ્બલભીરું દૈત્યં ત્વદ્બલગતમન્વમન્યથા ભગવન્ ॥ ૫૭-૫॥

કલ્પિતવિજેતૃવહને સમરે પરયૂથગં સ્વદયિતતરમ્ ।
શ્રીદામાનમધત્થાઃ પરાજિતો ભક્તદાસતાં પ્રથયન્ ॥ ૫૭-૬॥

એવં બહુષુ વિભૂમન્ બાલેષુ વહત્સુ વાહ્યમાનેષુ ।
રામવિજિતઃ પ્રલમ્બો જહાર તં દૂરતો ભવદ્ભીત્યા ॥ ૫૭-૭॥

ત્વદ્દૂરં ગમયન્તં તં દૃષ્ટ્વા હલિનિ વિહિતગરિમભરે ।
દૈત્યઃ સ્વરૂપમાગાદ્યદ્રૂપાત્સ હિ બલોઽપિ ચકિતોઽભૂત્ ॥ ૫૭-૮॥

ઉચ્ચતયા દૈત્યતનોસ્ત્વન્મુખમાલોક્ય દૂરતો રામઃ ।
વિગતભયો દૃઢમુષ્ટ્યા ભૃશદુષ્ટં સપદિ પિષ્ટવાનેનમ્ ॥ ૫૭-૯॥

હત્વા દાનવવીરં પ્રાપ્તં બલમાલિલિઙ્ગિથ પ્રેમ્ણા ।
તાવન્મિલતોર્યુવયોઃ શિરસિ કૃતા પુષ્પવૃષ્ટિરમરગણૈઃ ॥ ૫૭-૧૦॥

આલમ્બો ભુવનાનાં પ્રાલમ્બં નિધનમેવમારચયન્ ।
કાલં વિહાય સદ્યો લોલમ્બરુચે હરે હર ક્લેશાન્ ॥ ૫૭-૧૧॥

ઇતિ સપ્તપઞ્ચાશત્તમદશકં સમાપ્તં

## અષ્ટપઞ્ચાશત્તમદશકમ્ (૫૮)

દાવાગ્નિસંરક્ષણં તથા ઋતુવર્ણનમ્ ।
58 - Rescue From Forest Fire and Description of Seasons

ત્વયિ વિહરણલોલે બાલજાલૈઃ પ્રલમ્બ-
પ્રમથનસવિલમ્બે ધેનવઃ સ્વૈરચારાઃ ।
તૃણકુતુકનિવિષ્ટા દૂરદૂરં ચરન્ત્યઃ
કિમપિ વિપિનમૈષીકાખ્યમીષામ્બભૂવુઃ ॥ ૫૮-૧॥

અનધિગતનિદાઘક્રૌર્યવૃન્દાવનાન્તાત્
બહિરિદમુપયાતાઃ કાનનં ધેનવસ્તાઃ ।
તવ વિરહવિષણ્ણા ઊષ્મલગ્રીષ્મતાપ-
પ્રસરવિસરદમ્ભસ્યાકુલાઃ સ્તમ્ભમાપુઃ ॥ ૫૮-૨॥

તદનુ સહ સહાયૈર્દૂરમન્વિષ્ય શૌરે
ગલિતસરણિમુઞ્જારણ્યસઞ્જાતખેદમ્ ।
પશુકુલમભિવીક્ષ્ય ક્ષિપ્રમાનેતુમારાત્
ત્વયિ ગતવતિ હી હી સર્વતોઽગ્નિર્જજૃમ્ભે ॥ ૫૮-૩॥

સકલહરિતિ દીપ્તે ઘોરભાઙ્કારભીમે
શિખિનિ વિહતમાર્ગા અર્ધદગ્ધા ઇવાર્તાઃ ।
અહહ ભુવનબન્ધો પાહિ પાહીતિ સર્વે
શરણમુપગતાસ્ત્વાં તાપહર્તારમેકમ્ ॥ ૫૮-૪॥

અલમલમતિભીત્ય સર્વતો મીલયધ્વં
ભૃશમિતિ તવ વાચા મીલિતાક્ષેષુ તેષુ ।
ક્વનુ દવદહનોઽસૌ કુત્ર મુઞ્જાટવી સા
સપદિ વવૃતિરે તે હન્ત ભણ્ડીરદેશે ॥ ૫૮-૫॥

જય જય તવ માયા કેયમીશેતિ તેષાં

નુતિભિરુદિતહાસો બદ્ધનાનાવિલાસઃ ।
પુનરપિ વિપિનાન્તે પ્રાચરઃ પાટલાદિ-
પ્રસવનિકરમાત્રગ્રાહ્યઘર્માનુભાવે ॥ ૫૮-૬॥

ત્વયિ વિમુખવિમોચ્ચૈસ્તાપભારં વહન્તં
તવ ભજનવદન્તઃ પઙ્કમુચ્છોષયન્તમ્ ।
તવ ભુજવદુદઞ્ચદ્ભૂરિતેજઃપ્રવાહં
તપસમયમનૈષીર્યામુનેષુ સ્થલેષુ ॥ ૫૮-૭॥

તદનુ જલદજાલૈસ્ત્વદ્વપુસ્તુલ્યભાભિ-
ર્વિકસદમલવિદ્યુત્પીતવાસોવિલાસૈઃ ।
સકલભુવનભાજાં હર્ષદાં વર્ષવેલાં
ક્ષિતિધરકુહરેષુ સ્વૈરવાસી વ્યનૈષીઃ ॥ ૫૮-૮॥

કુહરતલનિવિષ્ટં ત્વાં ગરિષ્ઠં ગિરીન્દ્રઃ
શિખિકુલનવકેકાકાકુભિઃ સ્તોત્રકારી ।
સ્ફુટકુટજકદમ્બસ્તોમપુષ્પાઞ્જલિં ચ
પ્રવિદધદનુભેજે દેવ ગોવર્ધનોઽસૌ ॥ ૫૮-૯॥

અથ શરદમુપેતાં તાં ભવદ્ભક્તચેતો-
વિમલસલિલપૂરાં માનયન્કાનનેષુ ।
તૃણમમલવનાન્તે ચારુ સઞ્ચારયન્ ગાઃ
પવનપુરપતે ત્વં દેહિ મે દેહસૌખ્યમ્ ॥ ૫૮-૧૦॥

ઇતિ અષ્ટપઞ્ચાશત્તમદશકં સમાપ્તમ્ ।

## એકોનષષ્ટિતમદશકમ્ (૫૯)

### વેણુગાનવર્ણનમ્ ।
### 59 - Krishna Playing the Flute

ત્વદ્વપુર્નવકલાયકોમલં પ્રેમદોહનમશેષમોહનમ્ ।
બ્રહ્મતત્ત્વપરચિન્મુદાત્મકં વીક્ષ્ય સમ્મુમુહુરન્વહં સ્ત્રિયઃ ॥ ૫૯-૧॥

મન્મથોન્મથિતમાનસાઃ ક્રમાત્ત્વદ્વિલોકનરતાસ્તતસ્તતઃ ।
ગોપિકાસ્તવ ન સેહિરે હરે કાનનોપગતિમપ્યહર્મુખે ॥ ૫૯-૨॥

નિર્ગતે ભવતિ દત્તદૃષ્ટયસ્ત્વદ્ગતેન મનસા મૃગેક્ષણાઃ ।
વેણુનાદમુપકર્ણ્ય દૂરતસ્ત્વદ્વિલાસકથયાભિરેમિરે ॥ ૫૯-૩॥

કાનનાન્તમિતવાન્ભવાનપિ સ્નિગ્ધપાદપતલે મનોરમે ।
વ્યત્યયાકલિતપાદમાસ્થિતઃ પ્રત્યપૂરયત વેણુનાલિકામ્ ॥ ૫૯-૪॥

મારબાણધુતખેચરીકુલં નિર્વિકારપશુપક્ષિમણ્ડલમ્ ।
દ્રાવણં ચ દૃષદામપિ પ્રભો તાવકં વ્યજનિ વેણુકૂજિતમ્ ॥ ૫૯-૫॥

વેણુરન્ધ્રતરલાઙ્ગુલીદલં તાલસઞ્ચલિતપાદપલ્લવમ્ ।
તત્સ્થિતં તવ પરોક્ષમપ્યહો સંવિચિન્ત્ય મુમુહુર્વ્રજાઙ્ગનાઃ ॥ ૫૯-૬॥

નિર્વિશઙ્કભવદઙ્ગદર્શિનીઃ ખેચરીઃ ખગમૃગાન્પશૂનપિ ।
ત્વત્પદપ્રણયિ કાનનં ચ તાઃ ધન્યધન્યમિતિ નન્વમાનયન્ ॥ ૫૯-૭॥

આપિબેયમધરામૃતં કદા વેણુભુક્તરસશેષમેકદા ।
દૂરતો બત કૃતં દુરાશયેત્યાકુલા મુહુરિમાઃ સમામુહન્ ॥ ૫૯-૮॥

પ્રત્યહં ચ પુનરિત્થમઙ્ગનાશ્ચિત્તયોનિજનિતાદનુગ્રહાત્ ।
બદ્ધરાગવિવશાસ્ત્વયિ પ્રભો નિત્યમાપુરિહ કૃત્યમૂઢતામ્ ॥ ૫૯-૯॥

રાગસ્તાવજ્જાયતે હિ સ્વભાવાન્મોક્ષોપાયો યત્નતઃ સ્યાન્ન વા સ્યાત્ ।
તાસાં ત્વેકં તદ્વયં લબ્ધમાસીદ્ભાગ્યં ભાગ્યં પાહિ માં મારુતેશ ॥ ૫૯-૧૦॥

ઇતિ એકોનષષ્ટિતમદશકં સમાપ્તમ્ ।

## ષષ્ટિતમદશકમ્ (૬૦)

### ગોપીવસ્ત્રાપહરણમ્ ।
### 60 - Stealing the Clothes of the Gopikas

મદનાતુરચેતસોઽન્વહં ભવદઙ્ઘ્રિદ્વયદાસ્યકામ્યયા ।
યમુનાતટસીમ્નિ સૈકતીં તરલાક્ષ્યો ગિરિજાં સમાર્ચિચન્ ॥ ૬૦-૧॥

તવ નામકથારતાઃ સમં સુદૃશઃ પ્રાતરુપાગતા નદીમ્ ।
ઉપહારશતૈરપૂજયન્ દયિતો નન્દસુતો ભવેદિતિ ॥ ૬૦-૨॥

ઇતિ માસમુપાહિતવ્રતાસ્તરલાક્ષીરભિવીક્ષ્ય તા ભવાન્ ।
કરુણામૃદુલો નદીતટં સમયાસીત્તદનુગ્રહેચ્છયા ॥ ૬૦-૩॥

નિયમાવસિતૌ નિજામ્બરં તટસીમન્યવમુચ્ય તાસ્તદા ।
યમુનાજલખેલનાકુલાઃ પુરતસ્ત્વામવલોક્ય લજ્જિતાઃ ॥ ૬૦-૪॥

ત્રપયા નમિતાનનાસ્વથો વનિતાસ્વમ્બરજાલમન્તિકે ।
નિહિતં પરિગૃહ્ય ભૂરુહો વિટપં ત્વં તરસાધિરૂઢવાન્ ॥ ૬૦-૫॥

ઇહ તાવદુપેત્ય નીયતાં વસનં વઃ સુદૃશો યથાયથમ્ ।
ઇતિ નર્મમૃદુસ્મિતે ત્વયિ બ્રુવતિ વ્યામુમુહે વધૂજનૈઃ ॥ ૬૦-૬॥

અયિ જીવ ચિરં કિશોર નસ્તવ દાસીરવશીકરોષિ કિમ્ ।
પ્રદિશામ્બરમમ્બુજેક્ષણેત્યુદિતસ્ત્વં સ્મિતમેવ દત્તવાન્ ॥ ૬૦-૭॥

અધિરુહ્ય તટં કૃતાઞ્જલીઃ પરિશુદ્ધાઃ સ્વગતીર્નિરીક્ષ્ય તાઃ ।
વસનાન્યખિલાન્યનુગ્રહં પુનરેવં ગિરમપ્યદા મુદા ॥ ૬૦-૮॥

વિદિતં નનુ વો મનીષિતં વદિતારસ્ત્વિહ યોગ્યમુત્તરમ્ ।
યમુનાપુલિને સચન્દ્રિકાઃ ક્ષણદા ઇત્યબલાસ્ત્વમૂચિવાન્ ॥ ૬૦-૯॥

ઉપકર્ણ્ય ભવન્મુખચ્યુતં મધુનિષ્યન્દિ વચો મૃગીદૃશઃ ।
પ્રણયાદયિ વીક્ષ્ય વીક્ષ્ય તે વદનાબ્જં શનકૈર્ગૃહં ગતાઃ ॥ ૬૦-૧૦॥

ઇતિ નન્વનુગૃહ્ય વલ્લવીર્વિપિનાન્તેષુ પુરેવ સઞ્ચરન્ ।
કરુણાશિશિરો હરે હર ત્વરયા મે સકલામયાવલિમ્ ॥ ૬૦-૧૧॥

ઇતિ ષષ્ટિતમદશકં સમાપ્તં

## એકષષ્ટિતમદશકમ્ (૬૧)

વિપ્રપત્ન્યનુગ્રહમ્ ।

## 61 - Blessing the Wives of the Performers of Vedic Sacrifices

તતશ્ચ વૃન્દાવનતોઽતિદૂરતો વનં ગતસ્ત્વં ખલુ ગોપગોકુલૈઃ ।
હૃદન્તરે ભક્તતરદ્વિજાઙ્ગનાકદમ્બકાનુગ્રહણાગ્રહં વહન્ ॥ ૬૧-૧॥

તતો નિરીક્ષ્યાશરણે વનાન્તરે કિશોરલોકં ક્ષુધિતં તૃષાકુલમ્ ।
અદૂરતો યજ્ઞપરાન્ દ્વિજાન્પ્રતિ વ્યસર્જયો દીદિવિયાચનાય તાન્ ॥ ૬૧-૨॥

ગતેષ્વથો તેષ્વભિધાય તેઽભિધાં કુમારકેષ્વોદનયાચિષુ પ્રભો ।
શ્રુતિસ્થિરા અપ્યભિનિન્યુરશ્રુતિં ન કિઞ્ચિદૂચુશ્ચ મહીસુરોત્તમાઃ ॥ ૬૧-૩॥

અનાદરાત્ખિન્નધિયો હિ બાલકાઃ સમાયયુર્યુક્તમિદં હિ યજ્વસુ ।
ચિરાદભક્તાઃ ખલુ તે મહીસુરાઃ કથં હિ ભક્તં ત્વયિ તૈઃ સમર્પ્યતે ॥ ૬૧-૪॥

નિવેદયધ્વં ગૃહિણીજનાય માં દિશેયુરન્નં કરુણાકુલા ઇમાઃ ।
ઇતિ સ્મિતાર્દ્રં ભવતેરિતા ગતાસ્તે દારકા દારજનં યયાચિરે ॥ ૬૧-૫॥

ગૃહીતનામ્નિ ત્વયિ સમ્ભ્રમાકુલાશ્ચતુર્વિધં ભોજ્યરસં પ્રગૃહ્ય તાઃ ।
ચિરં ધૃતત્વત્પ્રવિલોકનાગ્રહાઃ સ્વકૈર્નિરુદ્ધા અપિ તૂર્ણમાયયુઃ ॥ ૬૧-૬॥

વિલોલપિઞ્છં ચિકુરે કપોલયોઃ સમુલ્લસત્કુણ્ડલમાર્દ્રમીક્ષિતે ।
નિધાય બાહું સુહૃદંસસીમનિ સ્થિતં ભવન્તં સમલોકયન્ત તાઃ ॥ ૬૧-૭॥

તદા ચ કાચિત્ત્વદુપાગમોદ્યતા ગૃહીતહસ્તા દયિતેન યજ્વના ।
તદૈવ સઞ્ચિન્ત્ય ભવન્તમઞ્જસા વિવેશ કૈવલ્યમહો કૃતિન્યસૌ ॥ ૬૧-૮॥

આદાય ભોજ્યાન્યનુગૃહ્ય તાઃ પુનસ્ત્વદઙ્ગસઙ્ગસ્પૃહયોજ્ઝતીર્ગૃહમ્ ।
વિલોક્ય યજ્ઞાય વિસર્જયન્નિમાશ્ચકર્થ ભર્તૄનપિ તાસ્વગર્હણાન્ ॥ ૬૧-૯॥

નિરૂપ્ય દોષં નિજમઙ્ગનાજને વિલોક્ય ભક્તિં ચ પુનર્વિચારિભિઃ ।
પ્રબુદ્ધતત્ત્વૈસ્ત્વમભિષ્ટુતો દ્વિજૈર્મરુત્પુરાધીશ નિરુન્ધિ મે ગદાન્ ॥ ૬૧-૧૦॥

ઇતિ એકષષ્ટિતમદશકં સમાપ્તમ્ ।

## દ્વિષષ્ટિતમદશકમ્ (૬૨)

## ઇન્દ્રયજ્ઞનિરોધનં તથા ગોવર્ધનયાગમ્ ।
## 62 - Blocking of the Sacrifice To Indra And Performance of Sacrifice to Govardhana

કદાચિદ્ગોપાલાન્ વિહિતમખસમ્ભારવિભવાન્
નિરીક્ષ્ય ત્વં શૌરે મઘવમદમુધ્વંસિતુમનાઃ ।
વિજાનન્નપ્યેતાન્ વિનયમૃદુ નન્દાદિપશુપા-
નપૃચ્છઃ કો વાયં જનક ભવતામુદ્યમ ઇતિ ॥ ૬૨-૧॥

બભાષે નન્દસ્ત્વાં સુત નનુ વિધેયો મઘવતો
મખો વર્ષે વર્ષે સુખયતિ સ વર્ષેણ પૃથિવીમ્ ।
નૃણાં વર્ષાયત્તં નિખિલમુપજીવ્યં મહિતલે
વિશેષાદસ્માકં તૃણસલિલજીવા હિ પશવઃ ॥ ૬૨-૨॥

ઇતિ શ્રુત્વા વાચં પિતુરયિ ભવાનાહ સરસં
ધિગેતન્નો સત્યં મઘવજનિતા વૃષ્ટિરિતિ યત્ ।
અદૃષ્ટં જીવાનાં સૃજતિ ખલુ વૃષ્ટિં સમુચિતાં
મહારણ્યે વૃક્ષાઃ કિમિવ બલિમિન્દ્રાય દદતે ॥ ૬૨-૩॥

ઇદં તાવત્સત્યં યદિહ પશવો નઃ કુલધનં
તદાજીવ્યાયાસૌ બલિરચલભર્ત્રે સમુચિતઃ ।
સુરેભ્યોઽપ્યુત્કૃષ્ટા નનુ ધરણિદેવાઃ ક્ષિતિતલે
તતસ્તેઽપ્યારાધ્યા ઇતિ જગદિથ ત્વં નિજજનાન્ ॥ ૬૨-૪॥

ભવદ્વાચં શ્રુત્વા બહુમતિયુતાસ્તેઽપિ પશુપા
દ્વિજેન્દ્રાનર્ચન્તો બલિમદદુરુચ્ચૈઃ ક્ષિતિભૃતે ।
વ્યધુઃ પ્રાદક્ષિણ્યં સુભૃશમનમન્નાદરયુતા-
સ્ત્વમાદઃ શૈલાત્મા બલિમખિલમાભીરપુરતઃ ॥ ૬૨-૫॥

અવોચશ્ચૈવં તાન્કિમિહ વિતથં મે નિગદિતં
ગિરીન્દ્રો નન્વેષુ સ્વબલિમુપભૂઙ્ક્તે સ્વવપુષા ।
અયં ગોત્રો ગોત્રદ્વિષિ ચ કુપિતે રક્ષિતુમલં
સમસ્તાનિત્યુક્તા જહૃષુરખિલા ગોકુલજુષઃ ॥ ૬૨-૬॥

પરિપ્રીતા યાતાઃ ખલુ ભવદુપેતા વ્રજજુષો
વ્રજં યાવત્તાવન્નિજમખવિભઙ્ગં નિશમયન્ ।

ભવન્તં જાનન્નપ્યધિકરજસાઽઽક્રાન્તહૃદયો
ન સેહે દેવેન્દ્રસ્ત્વદુપરચિતાત્મોન્નતિરપિ ॥ ૬૨-૭॥

મનુષ્યત્વં યાતો મધુભિદપિ દેવેષ્વવિનયં
વિધત્તે ચેન્નષ્ટસ્ત્રિદશસદસાં કોઽપિ મહિમા ।
તતશ્ચ ધ્વંસિષ્યે પશુપહતકસ્ય શ્રિયમિતિ
પ્રવૃત્તસ્ત્વાં જેતું સ કિલ મઘવા દુર્મદનિધિઃ ॥ ૬૨-૮॥

ત્વદાવાસં હન્તું પ્રલયજલદાનમ્બરભુવિ
પ્રહિણ્વન્ બિભ્રાણઃ કુલિશમયમભ્રેભગમનઃ ।
પ્રતસ્થેઽન્યૈરન્તર્દહનમરુદાદ્યૈર્વિહસિતો
ભવન્માયા નૈવ ત્રિભુવનપતે મોહયતિ કમ્ ॥ ૬૨-૯॥

સુરેન્દ્રઃ ક્રુદ્ધશ્ચેદ્દ્વિજકરુણયા શૈલકૃપયા-
પ્યનાતઙ્કોઽસ્માકં નિયત ઇતિ વિશ્વાસ્ય પશુપાન્ ।
અહો કિં નાયાતો ગિરિભિદિતિ સઞ્ચિન્ત્ય નિવસન્
મરુદ્ગેહાધીશ પ્રણુદ મુરવૈરિન્ મમ ગદાન્ ॥ ૬૨-૧૦॥

ઇતિ દ્વિષષ્ટિતમદશકં સમાપ્તમ્ ।

## ત્રિષષ્ટિતમદશકમ્ (૬૩)

### ગોવર્ધનોદ્ધારણમ્ ।
### 63 - Holding Up the Govardhana Mountain

દદૃશિરે કિલ તત્ક્ષણમક્ષતસ્તનિતજૃમ્ભિતકમ્પિતદિક્તટાઃ ।
સુષમયા ભવદઙ્ગતુલાં ગતા વ્રજપદોપરિ વારિધરાસ્ત્વયા ॥ ૬૩-૧॥

વિપુલકરકમિશ્રૈસ્તોયધારાનિપાતૈ-
ર્દિશિ દિશિ પશુપાનાં મણ્ડલે દણ્ડ્યમાને ।
કુપિતહરિકૃતાન્નઃ પાહિ પાહીતિ તેષાં
વચનમજિત શ્રુણ્વન્મા બિભીતેત્યભાણીઃ ॥ ૬૩-૨॥

કુલ ઇહ ખલુ ગોત્રો દૈવતં ગોત્રશત્રો-

र्विहतिमिह स रुन्ध्यात्को नुः वः संशायोऽस्मिन् ।
इति सहसितवादी देव गोवर्धनाद्रिं
त्वरितमुदमूलो मूलतो बालदोर्भ्याम् ॥ ६३-३॥

तदनु गिरिवरस्य प्रोद्धृतस्यास्य तावत्
सिकतिलमृदुदेशे दूरतो वारितापे ।
परिकरपरिमिश्रान्धेनुगोपानधस्ता-
दुपनिदधदधत्था हस्तपद्मेन शैलम् ॥ ६३-४॥

भवति विधृतशैले बालिकाभिर्वयस्यै-
रपि विहितविलासं केलिलापादिलोले ।
सविधमिलितधेनूरेकहस्तेन कण्डू-
यति सति पशुपालास्तोषमैषन्त सर्वे ॥ ६३-५॥

अतिमहान् गिरिरेष तु वामके करसरोरुहि तं धरते चिरम् ।
किमिदमद्भुतमद्रिबलन्विति त्वदवलोकिभिराकथि गोपकैः ॥ ६३-६॥

अहह धार्ष्ट्यममुष्य वटोर्गिरिं व्यथितबाहुरसाववरोपयेत् ।
इति हरिस्त्वयि बद्धविगर्हणो दिवससप्तकमुग्रमवर्षयत् ॥ ६३-७॥

अचलति त्वयि देव पदात्पदं गलितसर्वजले च घनोत्करे ।
अपहृते मरुता मरुतां पतिस्त्वदभिशङ्कितधीः समुपाद्रवत् ॥ ६३-८॥

शममुपेयुषि वर्षभरे तदा पशुपधेनुकुले च विनिर्गते ।
भुवि विभो समुपाहितभूधरः प्रमुदितैः पशुपैः परिरेभिषे ॥ ६३-९॥

धरणिमेव पुरा धृतवानसि क्षितिधरोद्धरणे तव कः श्रमः ।
इति नुतस्त्रिदशैः कमलापते गुरुपुरालय पालय मां गदात् ॥ ६३-१०॥

इति त्रिषष्टितमदशकं समाप्तम् ।

## ચતુઃષષ્ટિતમદશકમ્ (૬૪)

ગોવિન્દપટ્ટાભિષેકમ્ ।
64 - Crowning As Govinda

આલોક્ય શૈલોદ્ધરણાદિરૂપં પ્રભાવમુચ્ચૈસ્તવ ગોપલોકાઃ ।
વિશ્વેશ્વરં ત્વામભિમત્ય વિશ્વે નન્દં ભવજ્જાતકમન્વપૃચ્છન્ ॥ ૬૪-૧॥

ગર્ગોદિતો નિર્ગદિતો નિજાય વર્ગાય તાતેન તવ પ્રભાવઃ ।
પૂર્વાધિકસ્ત્વય્યનુરાગ એષામૈધિષ્ટ તાવદ્બહુમાનભારઃ ॥ ૬૪-૨॥

તતોઽવમાનોદિતતત્ત્વબોધઃ સુરાધિરાજઃ સહ દિવ્યગવ્યા ।
ઉપેત્ય તુષ્ટાવ સ નષ્ટગર્વઃ સ્પૃષ્ટ્વા પદાબ્જં મણિમૌલિના તે ॥ ૬૪-૩॥

સ્નેહસ્નુતૈસ્ત્વાં સુરભિઃ પયોભિર્ગોવિન્દનામાઙ્કિતમભ્યષિઞ્ચત્ ।
ઐરાવતોપાહૃતદિવ્યગઙ્ગાપાથોભિરિન્દ્રોઽપિ ચ જાતહર્ષઃ ॥ ૬૪-૪॥

જગત્ત્રયેશે ત્વયિ ગોકુલેશે તથાઽભિષિક્તે સતિ ગોપવાટઃ ।
નાકેઽપિ વૈકુણ્ઠપદેઽપ્યલભ્યાં શ્રિયં પ્રપેદે ભવતઃ પ્રભાવાત્ ॥ ૬૪-૫॥

કદાચિદન્તર્યમુનં પ્રભાતે સ્નાયન્ પિતા વારુણપૂરુષેણ ।
નીતસ્તમાનેતુમગાઃ પુરીં ત્વં તાં વારુણીં કારણમર્ત્યરૂપઃ ॥ ૬૪-૬॥

સસમ્ભ્રમં તેન જલાધિપેન પ્રપૂજિતસ્ત્વં પ્રતિગૃહ્ય તાતમ્ ।
ઉપાગતસ્તત્ક્ષણમાત્મગેહં પિતાઽવદત્તચ્ચરિતં નિજેભ્યઃ ॥ ૬૪-૭॥

હરિં વિનિશ્ચિત્ય ભવન્તમેતાન્ ભવત્પદાલોકનબદ્ધતૃષ્ણાન્ ।
નિરીક્ષ્ય વિષ્ણો પરમં પદં તદ્દુરાપમન્યૈસ્ત્વમદીદૃશસ્તાન્ ॥ ૬૪-૮॥

સ્ફુરત્પરાનન્દરસપ્રવાહપ્રપૂર્ણકૈવલ્યમહાપયોધૌ ।
ચિરં નિમગ્નાઃ ખલુ ગોપસઙ્ઘાસ્ત્વયૈવ ભૂમન્ પુનરુદ્ધૃતાસ્તે ॥ ૬૪-૯॥

કરબદરવદેવં દેવ કુત્રાવતારે
નિજપદમનવાપ્યં દર્શિતં ભક્તિભાજામ્ ।
તદિહ પશુપરૂપી ત્વં હિ સાક્ષાત્પરાત્મા
પવનપુરનિવાસિન્ પાહિ મામામયેભ્યઃ ॥ ૬૪-૧૦॥

ઇતિ ચતુઃષષ્ટિતમદશકં સમાપ્તમ્ ।

# પઞ્ચષષ્ટિતમદશકમ્ (૬૫)

ગોપિકાનાં ભગવત્સામીપ્યપ્રાપ્તિઃ ।
65 - Gopikas' Coming To Krishna

ગોપીજનાય કથિતં નિયમાવસાને
મારોત્સવં ત્વમથ સાધયિતું પ્રવૃત્તઃ ।
સાન્દ્રેણ ચાન્દ્રમહસા શિશિરીકૃતાશે
પ્રાપૂરયો મુરલિકાં યમુનાવનાન્તે ॥ ૬૫-૧॥

સમ્મૂર્છનાભિરુદિતસ્વરમણ્ડલાભિઃ
સમ્મૂર્છયન્તમખિલં ભુવનાન્તરાલમ્ ।
ત્વદ્વેણુનાદમુપકર્ણ્ય વિભો તરુણ્ય-
સ્તત્તાદૃશં કમપિ ચિત્તવિમોહમાપુઃ ॥ ૬૫-૨॥

તા ગેહકૃત્યનિરતાસ્તનયપ્રસક્તાઃ
કાન્તોપસેવનપરાશ્ચ સરોરુહાક્ષ્યઃ ।
સર્વં વિસૃજ્ય મુરલીરવમોહિતાસ્તે
કાન્તારદેશમયિ કાન્તતનો સમેતાઃ ॥ ૬૫-૩॥

કાશ્ચિન્નિજાઙ્ગપરિભૂષણમાદધાના
વેણુપ્રણાદમુપકર્ણ્ય કૃતાર્ધભૂષાઃ ।
ત્વામાગતા નનુ તથૈવ વિભૂષિતાભ્ય-
સ્તા એવ સંરુરુચિરે તવ લોચનાય ॥ ૬૫-૪॥

હારં નિતમ્બભુવિ કાચન ધારયન્તી
કાઞ્ચીં ચ કણ્ઠભુવિ દેવ સમાગતા ત્વામ્ ।
હારિત્વમાત્મજઘનસ્ય મુકુન્દ તુભ્યં
વ્યક્તં બભાષ ઇવ મુગ્ધમુખી વિશેષાત્ ॥ ૬૫-૫॥

કાચિત્કુચે પુનરસજ્જિતકઞ્ચુલીકા
વ્યામોહતઃ પરવધૂભિરલક્ષ્યમાણા ।
ત્વામાયયૌ નિરુપમપ્રણયાતિભાર-
રાજ્યાભિષેકવિધયે કલશીધરેવ ॥ ૬૫-૬॥

કાશ્ચિદ્ગૃહાત્કિલ નિરેતુમપારયન્ત્ય-
સ્ત્વામેવ દેવ હૃદયે સુદૃઢં વિભાવ્ય ।
દેહં વિધૂય પરચિત્સુખરૂપમેકં
ત્વામાવિશન્પરમિમા નનુ ધન્યધન્યાઃ ॥ ૬૫-૭॥

જારાત્મના ન પરમાત્મતયા સ્મરન્ત્યો
નાર્યો ગતાઃ પરમહંસગતિં ક્ષણેન ।
તત્ત્વાં પ્રકાશપરમાત્મતનું કથઞ્ચિ-
ચ્ચિત્તે વહન્નમૃતમશ્રમમશ્નુવીય ॥ ૬૫-૮॥

અભ્યાગતાભિરભિતો વ્રજસુન્દરીભિ-
ર્મુગ્ધસ્મિતાર્દ્રવદનઃ કરુણાવલોકી ।
નિસ્સીમકાન્તિજલધિસ્ત્વમવેક્ષ્યમાણો
વિશ્વૈકહૃદ્ય હર મે પરમેશ રોગાન્ ॥ ૬૫-૯॥

ઇતિ પઞ્ચષષ્ટિતમદશકં સમાપ્તમ્ ।

## ષટ્ષષ્ટિતમદશકમ્ (૬૬)

### ગોપીજનાહ્લાદનમ્ ।
### 66 - Delighting the Gopikas

ઉપયાતાનાં સુદૃશાં કુસુમાયુધબાણપાતવિવશાનામ્ ।
અભિવાઞ્છિતં વિધાતું કૃતમતિરપિ તા જગાથ વામમિવ ॥ ૬૬-૧॥

ગગનગતં મુનિનિવહં શ્રાવયિતું જગિથ કુલવધૂધર્મમ્ ।
ધર્મ્યં ખલુ તે વચનં કર્મ તુ નો નિર્મલસ્ય વિશ્વાસ્યમ્ ॥ ૬૬-૨॥

આકર્ણ્ય તે પ્રતીપાં વાણીમેણીદૃશઃ પરં દીનાઃ ।
મા મા કરુણાસિન્ધો પરિત્યજેત્યતિચિરં વિલેપુસ્તાઃ ॥ ૬૬-૩॥

તાસાં રુદિતૈર્લપિતૈઃ કરુણાકુલમાનસો મુરારે ત્વમ્ ।
તાભિઃ સમં પ્રવૃત્તો યમુનાપુલિનેષુ કામમભિરન્તુમ્ ॥ ૬૬-૪॥

ચન્દ્રકરસ્યન્દલસત્સુન્દરયમુનાતટાન્તવીથીષુ ।
ગોપીજનોત્તરીયૈરાપાદિતસંસ્તરો ન્યષીદસ્ત્વમ્ ॥ ૬૬-૫ ॥

સુમધુરનર્માલપનૈઃ કરસઙ્ગ્રહણૈશ્ચ ચુમ્બનોલ્લાસૈઃ ।
ગાઢાલિઙ્ગનસઙ્ગૈસ્ત્વમઙ્ગનાલોકમાકુલીચકૃષે ॥ ૬૬-૬ ॥

વાસોહરણદિને યદ્વાસોહરણં પ્રતિશ્રુતં તાસામ્ ।
તદપિ વિભો રસવિવશસ્વાન્તાનાં કાન્તસુભ્રુવામદધાઃ ॥ ૬૬-૭ ॥

કન્દલિતઘર્મલેશં કુન્દમૃદુસ્મેરવક્ત્રપાથોજમ્ ।
નન્દસુત ત્વાં ત્રિજગત્સુન્દરમુપગૂહ્ય નન્દિતા બાલાઃ ॥ ૬૬-૮ ॥

વિરહેષ્વઙ્ગારમયઃ શ‍ૃઙ્ગારમયશ્ચ સઙ્ગમેઽપિ ત્વમ્ ।
નિતરામઙ્ગારમયસ્તત્ર પુનઃ સઙ્ગમેઽપિ ચિત્રમિદમ્ ॥ ૬૬-૯ ॥

રાધાતુઙ્ગપયોધરસાધુપરીરમ્ભલોલુપાત્માનમ્ ।
આરાધયે ભવન્તં પવનપુરાધીશ શમય સકલગદાન્ ॥ ૬૬-૧૦ ॥

ઇતિ ષટ્ષષ્ટિતમદશકં સમાપ્તમ્ ।

## સપ્તષષ્ટિતમદશકમ્ (૬૭)

શ્રીકૃષ્ણતિરોધાનં તથા પુનઃ પ્રત્યક્ષીભૂય ગોપિકાઃ પ્રીણનમ્ ।
67 - Disappearance of the Lord and Reappearance, Etc

સ્ફુરત્પરાનન્દરસાત્મકેન ત્વયા સમાસાદિતભોગલીલાઃ ।
અસીમમાનન્દભરં પ્રપન્ના મહાન્તમાપુર્મદમમ્બુજાક્ષ્યઃ ॥ ૬૭-૧ ॥

નિલીયતેઽસૌ મયિ મય્યમાયં રમાપતિર્વિશ્વમનોભિરામઃ ।
ઇતિસ્મ સર્વાઃ કલિતાભિમાના નિરીક્ષ્ય ગોવિન્દ તિરોહિતોઽભૂઃ ॥ ૬૭-૨ ॥

રાધાભિધાં તાવદજાતગર્વામતિપ્રિયાં ગોપવધૂં મુરારે ।
ભવાનુપાદાય ગતો વિદૂરં તયા સહ સ્વૈરવિહારકારી ॥ ૬૭-૩ ॥

તિરોહિતેઽથ ત્વયિ જાતતાપાઃ સમં સમેતાઃ કમલાયતાક્ષ્યઃ ।
વને વને ત્વાં પરિમાર્ગયન્ત્યો વિષાદમાપુર્ભગવન્નપારમ્ ॥ ૬૭-૪ ॥

હા ચૂત હા ચમ્પક કર્ણિકાર હા મલ્લિકે માલતિ બાલવલ્લ્યઃ ।
કિં વીક્ષિતો નો હૃદયૈકચોર ઇત્યાદિ તાસ્ત્વત્પ્રવણા વિલેપુઃ ॥ ૬૭-૫॥

નિરીક્ષિતોઽયં સખિ પઙ્કજાક્ષઃ પુરો મમેત્યાકુલમાલપન્તી ।
ત્વાં ભાવનાચક્ષુષિ વીક્ષ્ય કાચિત્તાપં સખીનાં દ્વિગુણીચકાર ॥ ૬૭-૬॥

ત્વદાત્મિકાસ્તા યમુનાતટાન્તે તવાનુચક્રુઃ કિલ ચેષ્ટિતાનિ ।
વિચિત્ય ભૂયોઽપિ તથૈવ માનાત્ત્વયા વિયુક્તાં દદૃશુશ્ચ રાધામ્ ॥ ૬૭-૭॥

તતઃ સમં તા વિપિને સમન્તાત્તમોવતારાવધિ માર્ગયન્ત્યઃ ।
પુનર્વિમિશ્રા યમુનાતટાન્તે ભૃશં વિલેપુશ્ચ જગુર્ગુણાંસ્તે ॥ ૬૭-૮॥

તથાવ્યથાસઙ્કુલમાનસાનાં વ્રજાઙ્ગનાનાં કરુણૈકસિન્ધો ।
જગત્ત્રયીમોહનમોહનાત્મા ત્વં પ્રાદુરાસીરયિ મન્દહાસી ॥ ૬૭-૯॥

સન્દિગ્ધસન્દર્શનમાત્મકાન્તં ત્વાં વીક્ષ્ય તન્વ્યસ્સહસા તદાનીમ્ ।
કિં કિં ન ચક્રુઃ પ્રમદાતિભારાત્સ ત્વં ગદાત્પાલય મારુતેશ ॥ ૬૭-૧૦॥

ઇતિ સપ્તષષ્ટિતમદશકં સમાપ્તમ્ ।

## અષ્ટષષ્ટિતમદશકમ્ (૬૮)

ગપિકાનાં આહ્લાદપ્રકટનમ્ ।
68 - Gopikas In the Lord's Joyous Company

તવ વિલોકનાદ્ગોપિકાજનાઃ પ્રમદસઙ્કુલાઃ પઙ્કજેક્ષણ ।
અમૃતધારયા સમ્પ્લુતા ઇવ સ્તિમિતતાં દધુસ્ત્વત્પુરોગતાઃ ॥ ૬૮-૧॥

તદનુ કાચન ત્વત્કરામ્બુજં સપદિ ગૃહ્ણતી નિર્વિશઙ્કિતમ્ ।
ઘનપયોધરે સંવિધાય સા પુલકસંવૃતા તસ્થુષી ચિરમ્ ॥ ૬૮-૨॥

તવ વિભો પુરા કોમલં ભુજં નિજગલાન્તરે પર્યવેષ્ટયત્ ।
ગલસમુદ્ગતં પ્રાણમારુતં પ્રતિનિરુન્ધતીવાતિહર્ષુલા ॥ ૬૮-૩॥

અપગતત્રપા કાપિ કામિની તવ મુખામ્બુજાત્પૂગચર્વિતમ્ ।

પ્રતિગૃહ્ય તદ્વક્ત્રપઙ્કજે નિદધતી ગતા પૂર્ણકામતામ્ ॥ ૬૮-૪॥

વિકરુણો વને સંવિહાય મામપગતોઽસિ કા ત્વામિહ સ્પૃશેત્ ।
ઇતિ સરોષયા તાવદેકયા સજલલોચનં વીક્ષિતો ભવાન્ ॥ ૬૮-૫॥

ઇતિ મુદાકુલૈર્વલ્લવીજનૈઃ સમમુપાગતો યામુને તટે ।
મૃદુકુચામ્બરૈઃ કલ્પિતાસને ઘુસૃણભાસુરે પર્યશોભથાઃ ॥ ૬૮-૬॥

કતિવિધા કૃપા કેઽપિ સર્વતો ધૃતદયોદયાઃ કેચિદાશ્રિતે ।
કતિચિદીદૃશા માદૃશેષ્વપીત્યભિહિતો ભવાન્વલ્લવીજનૈઃ ॥ ૬૮-૭॥

અયિ કુમારિકા નૈવ શઙ્ક્યતાં કઠિનતા મયિ પ્રેમકાતરે ।
મયિ તુ ચેતસો વોઽનુવૃત્તયે કૃતમિદં મયેત્યૂચિવાન્ભવાન્ ॥ ૬૮-૮॥

અયિ નિશમ્યતાં જીવવલ્લભાઃ પ્રિયતમો જનો નેદૃશો મમ ।
તદિહ રમ્યતાં રમ્યયામિનીષ્વનુપરોધમિત્યાલપો વિભો ॥ ૬૮-૯॥

ઇતિ ગિરાધિકં મોદમેદુરૈર્વ્રજવધૂજનૈઃ સાકમારમન્ ।
કલિતકૌતુકો રાસખેલને ગુરુપુરીપતે પાહિ માં ગદાત્ ॥ ૬૮-૧૦॥

ઇતિ અષ્ટષષ્ટિતમદશકં સમાપ્તમ્ ।

## એકોનસપ્તતિતમદશકમ્ (૬૯)

### રાસક્રીડા ।
69 - Rasakreeda

કેશપાશધૃતપિઞ્છિકાવિતતિ સઞ્ચલન્મકરકુણ્ડલં
હારજાલવનમાલિકાલલિતમઙ્ગરાગઘનસૌરભમ્ ।
પીતચેલધૃતકાઞ્ચિકાઞ્ચિતમુદઞ્ચદંશુમણિનૂપુરં
રાસકેલિપરિભૂષિતં તવ હિ રૂપમીશ કલયામહે ॥ ૬૯-૧॥

તાવદેવ કૃતમણ્ડને કલિતકઞ્ચુલીકકુચમણ્ડલે
ગણ્ડલોલમણિકુણ્ડલે યુવતિમણ્ડલેઽથ પરિમણ્ડલે ।
અન્તરા સકલસુન્દરીયુગલમિન્દિરારમણ સઞ્ચરન્

મઞ્જુલાં તદનુ રાસકેલિમયિ કઞ્જનાભ સમુપાદધાઃ ॥ ૬૯-૨॥

વાસુદેવ તવ ભાસમાનમિહ રાસકેલિરસસૌરભં
દૂરતોઽપિ ખલુ નારદાગદિતમાકલય્ય કુતુકાકુલાઃ ।
વેષભૂષણવિલાસપેશલવિલાસિનીશતસમાવૃતા
નાકતો યુગપદાગતા વિયતિ વેગતોઽથ સુરમણ્ડલી ॥ ૬૯-૩॥

વેણુનાદકૃતતાનદાનકલગાનરાગગતિયોજના-
લોભનીયમૃદુપાદપાતકૃતતાલમેલનમનોહરમ્ ।
પાણિસઙ્ક્વણિતકઙ્કણં ચ મુહુરંસલમ્બિતકરામ્બુજં
શ્રોણિબિમ્બચલદમ્બરં ભજત રાસકેલિરસડમ્બરમ્ ॥ ૬૯-૪॥

શ્રદ્ધયા વિરચિતાનુગાનકૃતતારતારમધુરસ્વરે
નર્તનેઽથ લલિતાઙ્ગહારલુલિતાઙ્ગહારમણિભૂષણે ।
સમ્મદેન કૃતપુષ્પવર્ષમલમુન્મિષદ્દિવિષદાં કુલં
ચિન્મયે ત્વયિ નિલીયમાનમિવ સમ્મુમોહ સવધૂકુલમ્ ॥ ૬૯-૫॥

સ્વિન્નસન્નતનુવલ્લરી તદનુ કાપિ નામ પશુપાઙ્ગના
કાન્તમંસમવલમ્બતે સ્મ તવ તાન્તિભારમુકુલેક્ષણા ।
કાચિદાચલિતકુન્તલા નવપટીરસારનવસૌરભં
વઞ્ચનેન તવ સઞ્ચુચુમ્બ ભુજમઞ્ચિતોરુપુલકાઙ્કુરમ્ ॥ ૬૯-૬॥

કાપિ ગણ્ડભુવિ સન્નિધાય નિજગણ્ડમાકુલિતકુણ્ડલં
પુણ્યપૂરનિધિરન્વવાપ તવ પૂગચર્વિતરસામૃતમ્ ।
ઇન્દિરાવિહૃતિમન્દિરં ભુવનસુન્દરં હિ નટનાન્તરે
ત્વામવાપ્ય દધુરઙ્ગનાઃ કિમુ ન સમ્મદોન્મદદશાન્તરમ્ ॥ ૬૯-૭॥

ગાનમીશ વિરતં ક્રમેણ કિલ વાદ્યમેલનમુપારતં
બ્રહ્મસમ્મદરસાકુલાઃ સદસિ કેવલં નનૃતુરઙ્ગનાઃ ।
નાવિદન્નપિ ચ નીવિકાં કિમપિ કુન્તલીમપિ ચ કઞ્ચુલીં
જ્યોતિષામપિ કદમ્બકં દિવિ વિલમ્બિતં કિમપરં બ્રુવે ॥ ૬૯-૮॥

મોદસીમ્નિ ભુવનં વિલાપ્ય વિહૃતિં સમાપ્ય ચ તતો વિભો
કેલિસમ્મૃદિતનિર્મલાઙ્ગનવધર્મલેશસુભગાત્મનામ્ ।
મન્મથાસહનચેતસાં પશુપયોષિતાં સુકૃતચોદિત-
સ્તાવદાકલિતમૂર્તિરાદધિથ મારવીરપરમોત્સવાન્ ॥ ૬૯-૯॥

કેલિભેદપરિલોલિતાભિરતિલાલિતાભિરબલાલિભિઃ
સ્વૈરમીશ નનુ સૂરજાપયસિ ચારુ નામ વિહૃતિં વ્યધાઃ ।
કાનનેઽપિ ચ વિસારિશીતલકિશોરમારુતમનોહરે
સૂનસૌરભમયે વિલેસિથ વિલાસિનીશતવિમોહનમ્ ॥ ૬૯-૧૦॥

કામિનીરિતિ હિ યામિનીષુ ખલુ કામનીયકનિધે ભવાન્
પૂર્ણસમ્મદરસાર્ણવં કમપિ યોગિગમ્યમનુભાવયન્ ।
બ્રહ્મશઙ્કરમુખાનપીહ પશુપાઙ્ગનાસુ બહુમાનયન્
ભક્તલોકગમનીયરૂપ કમનીય કૃષ્ણ પરિપાહિ મામ્ ॥ ૬૯-૧૧॥

ઇતિ એકોનસપ્તતિતમદશકં સમાપ્તં

## સપ્તતિતમદશકમ્ (૭૦)

સુદર્શનશાપમોક્ષં તથા શઙ્ખચૂડ-અરિષ્ટવધમ્ ।
70 - Salvation of Sudarsana And Slaying of Shankhachuda And Arishta

ઇતિ ત્વયિ રસાકુલં રમિતવલ્લભે વલ્લવાઃ
કદાપિ પુનરમ્બિકાકમિતુરમ્બિકાકાનને ।
સમેત્ય ભવતા સમં નિશિ નિષેવ્ય દિવ્યોત્સવં
સુખં સુષુપુરગ્રસીદ્વ્રજપમુગ્રનાગસ્તદા ॥ ૭૦-૧॥

સમુન્મુખમથોલ્મુકૈરભિહતેઽપિ તસ્મિન્બલા-
દમુઞ્ચતિ ભવત્પદે ન્યપતિ પાહિ પાહીતિ તૈઃ ।
તદા ખલુ પદા ભવાન્સમુપગમ્ય પસ્પર્શ તં
બભૌ સ ચ નિજાં તનું સમુપસાદ્ય વૈદ્યાધરીમ્ ॥ ૭૦-૨॥

સુદર્શનધર પ્રભો નનુ સુદર્શનાખ્યોઽસ્મ્યહં
મુનીન્ક્વચિદપાહસં ત ઇહ માં વ્યધુર્વાહસમ્ ।
ભવત્પદસમર્પણાદમલતાં ગતોઽસ્મીત્યસૌ
સ્તુવન્નિજપદં યયૌ વ્રજપદં ચ ગોપા મુદા ॥ ૭૦-૩॥

કદાપિ ખલુ સીરિણા વિહરતિ ત્વયિ સ્ત્રીજનૈ-

ર્જહાર ધનદાનુગઃ સ કિલ શઙ્ખચૂડોઽબલાઃ ।
અતિદ્રુતમનુદ્રુતસ્તમથ મુક્તનારીજનં
રુરોજિથ શિરોમણિં હલભૃતે ચ તસ્યાદદાઃ ॥ ૭૦-૪॥

દિનેષુ ચ સુહૃજ્જનૈઃ સહ વનેષુ લીલાપરં
મનોભવમનોહરં રસિતવેણુનાદામૃતમ્ ।
ભવન્તમમરીદૃશામમૃતપારણાદાયિનં
વિચિન્ત્ય કિમુ નાલપન્ વિરહતાપિતા ગોપિકાઃ ॥ ૭૦-૫॥

ભોજરાજભૃતકસ્ત્વથ કશ્ચિત્કષ્ટદુષ્ટપથદૃષ્ટિરરિષ્ટઃ ।
નિષ્ઠુરાકૃતિરપષ્ઠુનિનાદસ્તિષ્ઠતે સ્મ ભવતે વૃષરૂપી ॥ ૭૦-૬॥

શાક્વરોઽથ જગતીધૃતિહારી મૂર્તિમેષ બૃહતીં પ્રદધાનઃ ।
પઙ્ક્તિમાશુ પરિઘૂર્ણ્ય પશૂનાં છન્દસાં નિધિમવાપ ભવન્તમ્ ॥ ૭૦-૭॥

તુઙ્ગશૃઙ્ગમુખમાશ્વભિયન્તં સઙ્ગૃહય્ય રભસાદભિયં તમ્ ।
ભદ્રરૂપમપિ દૈત્યમભદ્રં મર્દયન્નમદયઃ સુરલોકમ્ ॥ ૭૦-૮॥

ચિત્રમદ્ય ભગવન્ વૃષઘાતાત્સુસ્થિરાજનિ વૃષસ્થિતિરુર્વ્યામ્ ।
વર્ધતે ચ વૃષચેતસિ ભૂયાન્મોદ ઇત્યભિનુતોઽસિ સુરૈસ્ત્વમ્ ॥ ૭૦-૯॥

ઔક્ષકાણિ પરિધાવત દૂરં વીક્ષ્યતામયમિહોક્ષવિભેદી ।
ઇત્થમાત્તહસિતૈઃ સહ ગોપૈર્ગેહગસ્ત્વમવ વાતપુરેશ ॥ ૭૦-૧૦॥

ઇતિ સપ્તતિતમદશકં સમાપ્તં

## એકસપ્તતિતમદશકમ્ (૭૧)

### કેશી તથા વ્યોમાસુરવધમ્ ।
### 71 - Slaying of Kesi And Vyomasura

યત્નેષુ સર્વેષ્વપિ નાવકેશી કેશી સ ભોજેશિતુરિષ્ટબન્ધુઃ ।
ત્વં સિન્ધુજાવાપ્ય ઇતીવ મત્વા સમ્પ્રાપ્તવાન્સિન્ધુજવાજિરૂપઃ ॥ ૭૧-૧॥

ગન્ધર્વતામેષ ગતોઽપિ રૂક્ષૈર્નાદૈઃ સમુદ્વેજિતસર્વલોકઃ ।

ભવદ્વિલોકાવધિ ગોપવાટીં પ્રમર્દ્ય પાપઃ પુનરાપતત્ત્વામ્ ॥ ૭૧-૨ ॥

તાર્ક્ષ્યાર્પિતાઙ્ઘ્રેસ્તવ તાર્ક્ષ્ય એષ ચિક્ષેપ વક્ષોભુવિ નામ પાદમ્ ।
ભૃગોઃ પદાઘાતકથાં નિશમ્ય સ્વેનાપિ શક્યં તદિતીવ મોહાત્ ॥ ૭૧-૩ ॥

પ્રવઞ્ચયન્નસ્ય ખુરાઞ્ચલં દ્રાગમું ચ ચિક્ષેપિથ દૂરદૂરમ્ ।
સમ્મૂર્છિતોઽપિ હ્યતિમૂર્છિતેન ક્રોધોષ્મણા ખાદિતુમાદ્રુતસ્ત્વામ્ ॥ ૭૧-૪ ॥

ત્વં વાહદણ્ડે કૃતધીશ્ચ બાહાદણ્ડં ન્યધાસ્તસ્ય મુખે તદાનીમ્ ।
તદ્વૃદ્ધિરુદ્ધશ્વસનો ગતાસુઃ સપ્તીભવન્નપ્યયમૈક્યમાગાત્ ॥ ૭૧-૫ ॥

આલમ્ભમાત્રેણ પશોઃ સુરાણાં પ્રસાદકે નૂત્ન ઇવાશ્વમેધે ।
કૃતે ત્વયા હર્ષવશાત્સુરેન્દ્રાસ્ત્વાં તુષ્ટુવુઃ કેશવનામધેયમ્ ॥ ૭૧-૬ ॥

કંસાય તે શૌરિસુતત્વમુક્ત્વા તં તદ્વધોત્કં પ્રતિરુધ્ય વાચા ।
પ્રાપ્તેન કેશિક્ષપણાવસાને શ્રીનારદેન ત્વમભિષ્ટુતોઽભૂઃ ॥ ૭૧-૭ ॥

કદાપિ ગોપૈઃ સહ કાનનાન્તે નિલાયનક્રીડનલોલુપં ત્વામ્ ।
મયાત્મજઃ પ્રાપ દુરન્તમાયો વ્યોમાભિધો વ્યોમચરોપરોધી ॥ ૭૧-૮ ॥

સ ચોરપાલાયિતવલ્લવેષુ ચોરાયિતો ગોપશિશૂન્પશૂંશ્ચ ।
ગુહાસુ કૃત્વા પિદધે શિલાભિસ્ત્વયા ચ બુદ્ધ્વા પરિમર્દિતોઽભૂત્ ॥ ૭૧-૯ ॥

એવંવિધૈશ્ચાદ્ભુતકેલિભેદૈરાનન્દમૂર્છામતુલાં વ્રજસ્ય ।
પદે પદે નૂતનયન્નસીમાં પરાત્મરૂપિન્ પવનેશપાયાઃ ॥ ૭૧-૧૦ ॥

ઇતિ એકચત્વારિંશદશકં સમાપ્તમ્ ।

## દ્વિસપ્તતિતમદશકમ્ (૭૨)

### અક્રૂરગોકુલયાત્રા ।
72 - Akrura's Journey To Gokula

કંસોઽથ નારદગિરા વ્રજવાસિનં ત્વા-
માકર્ણ્ય દીર્ણહૃદયઃ સ હિ ગાન્દિનેયમ્ ।
આહૂય કાર્મુકમખચ્છલતો ભવન્ત-

માનેતુમેનમહિનોદહિનાથશાયિન્ ॥ ૭૨-૧॥

અક્રૂર એષ ભવદઙ્ઘ્રિપરશ્ચિરાય
ત્વદ્દર્શનાક્ષમમનાઃ ક્ષિતિપાલભીત્યા ।
તસ્યાજ્ઞયૈવ પુનરીક્ષિતુમુદ્યતસ્ત્વા-
માનન્દભારમતિભૂરિતરં બભાર ॥ ૭૨-૨॥

સોઽયં રથેન સુકૃતી ભવતો નિવાસં
ગચ્છન્મનોરથગણાંસ્ત્વયિ ધાર્યમાણાન્ ।
આસ્વાદયન્મુહુરપાયભયેન દૈવં
સમ્પ્રાર્થયન્પથિ ન કિઞ્ચિદપિ વ્યજાનાત્ ॥ ૭૨-૩॥

દ્રક્ષ્યામિ વેદશતગીતગતિં પુમાંસં
સ્પ્રક્ષ્યામિ કિંસ્વિદપિનામ પરિષ્વજેયમ્ ।
કિં વક્ષ્યતે સ ખલુ માં ક્વનુ વીક્ષિતઃ સ્યા-
દિત્થં નિનાય સ ભવન્મયમેવ માર્ગમ્ ॥ ૭૨-૪॥

ભૂયઃ ક્રમાદભિવિશન્ભવદઙ્ઘ્રિપૂતં
વૃન્દાવનં હરવિરિઞ્ચસુરાભિવન્દ્યમ્ ।
આનન્દમગ્ન ઇવ લગ્ન ઇવ પ્રમોહે
કિં કિં દશાન્તરમવાપ ન પઙ્કજાક્ષ ॥ ૭૨-૫॥

પશ્યન્નવન્દત ભવદ્વિહૃતિસ્થલાનિ
પાંસુષ્વવેષ્ટત ભવચ્ચરણાઙ્કિતેષુ ।
કિં બ્રૂમહે બહુજના હિ તદાપિ જાતા
એવં તુ ભક્તિતરલા વિરલાઃ પરાત્મન્ ॥ ૭૨-૬॥

સાયં સ ગોપભવનાનિ ભવચ્ચરિત્ર-
ગીતામૃતપ્રસૃતકર્ણરસાયનાનિ ।
પશ્યન્પ્રમોદસરિદેવ કિલોહ્યમાનો
ગચ્છન્ભવદ્ભવનસન્નિધિમન્વયાસીત્ ॥ ૭૨-૭॥

તાવદ્દદર્શ પશુદોહવિલોકલોલં
ભક્તોત્તમાગતિમિવ પ્રતિપાલયન્તમ્ ।
ભૂમન્ ભવન્તમયમગ્રજવન્તમન્ત-
ર્બ્રહ્માનુભૂતિરસસિન્ધુમિવોદ્વમન્તમ્ ॥ ૭૨-૮॥

સાયન્તનાપ્લવવિશેષવિવિક્તગાત્રૌ
દ્વૌ પીતનીલરુચિરામ્બરલોભનીયૌ ।
નાતિપ્રપઞ્ચધૃતભૂષણચારુવેષૌ
મન્દસ્મિતાર્દ્રવદનૌ સ યુવાં દદર્શ ॥ ૭૨-૯॥

દૂરાદ્રથાત્સમવરુહ્ય નમન્તમેન-
મુત્થાપ્ય ભક્તકુલમૌલિમથોપગૂહન્ ।
હર્ષાન્મિતાક્ષરગિરા કુશલાનુયોગી
પાણિં પ્રગૃહ્ય સબલોઽથ ગૃહં નિનેથ ॥ ૭૨-૧૦॥

નન્દેન સાકમમિતાદરમર્ચયિત્વા
તં યાદવં તદુદિતાં નિશમય્ય વાર્તામ્ ।
ગોપેષુ ભૂપતિનિદેશકથાં નિવેદ્ય
નાનાકથાભિરિહ તેન નિશામનૈષીઃ ॥ ૭૨-૧૧॥

ચન્દ્રાગૃહે કિમુત ચન્દ્રભગાગૃહે નુ
રાધાગૃહે નુ ભવને કિમુ મૈત્રવિન્દે ।
ધૂર્ત્તો વિલમ્બત ઇતિ પ્રમદાભિરુચ્ચૈ-
રાશઙ્કિતો નિશિ મરુત્પુરનાથ પાયાઃ ॥ ૭૨-૧૨॥

ઇતિ દ્વિસપ્તતિતમદશકં સમાપ્તમ્ ।

## ત્રિસપ્તતિતમદશકમ્ (૭૩)

### શ્રીકૃષ્ણસ્ય મથુરાયાત્રા ।
### 73 - The Lord Leaving For Mathura

નિશમય્ય તવાથ યાનવાર્તાં ભૃશમાર્તાઃ પશુપાલબાલિકાસ્તાઃ ।
કિમિદં કિમિદં કથન્વિતીમાઃ સમવેતાઃ પરિદેવિતાન્યકુર્વન્ ॥ ૭૩-૧॥

કરુણાનિધિરેષ નન્દસૂનુઃ કથમસ્માન્વિસૃજેદનન્યનાથાઃ ।
બત નઃ કિમુ દૈવમેવમાસીદિતિ તાસ્ત્વદ્ગતમાનસા વિલેપુઃ ॥ ૭૩-૨॥

ચરમપ્રહરે પ્રતિષ્ઠમાનઃ સહ પિત્રા નિજમિત્રમણ્ડલૈશ્ચ ।

પરિતાપભરં નિતમ્બિનીનાં શમયિષ્યન્ વ્યમુચસ્સખાયમેકમ્ ॥ ૭૩-૩॥

અચિરાદુપયામિ સન્નિધિં વો ભવિતા સાધુ મયૈવ સઙ્ગમશ્રીઃ ।
અમૃતામ્બુનિધૌ નિમજ્જયિષ્યે દ્રુતમિત્યાશ્વસિતા વધૂરકાર્ષીઃ ॥ ૭૩-૪॥

સવિષાદભરં સયાચ્ઞમુચ્ચૈરતિદૂરં વનિતાભિરીક્ષ્યમાણઃ ।
મૃદુ તદ્દિશિ પાતયન્નપાઙ્ગાન્ સબલોઽક્રૂરરથેન નિર્ગતોઽભૂઃ ॥ ૭૩-૫॥

અનસા બહુલેન વલ્લવાનાં મનસા ચાનુગતોઽથ વલ્લભાનામ્ ।
વનમાર્તમૃગં વિષણ્ણવૃક્ષં સમતીતો યમુનાતટીમયાસીઃ ॥ ૭૩-૬॥

નિયમાય નિમજ્જ્ય વારિણિ ત્વામભિવીક્ષ્યાથ રથેઽપિ ગાન્દિનેયઃ ।
વિવશોઽજનિ કિન્ન્વિદં વિભોસ્તે નનુ ચિત્રં ત્વવલોકનં સમન્તાત્ ॥ ૭૩-૭॥

પુનરેષ નિમજ્જ્ય પુણ્યશાલી પુરુષં ત્વાં પરમં ભુજઙ્ગભોગે ।
અરિકમ્બુગદામ્બુજૈઃ સ્ફુરન્તં સુરસિદ્ધૌઘપરીતમાલુલોકે ॥ ૭૩-૮॥

સ તદા પરમાત્મસૌખ્યસિન્ધૌ વિનિમગ્નઃ પ્રણુવન્પ્રકારભેદૈઃ ।
અવિલોક્ય પુનશ્ચ હર્ષસિન્ધોરનુવૃત્યા પુલકાવૃતો યયૌ ત્વામ્ ॥ ૭૩-૯॥

કિમુ શીતલિમા મહાન્ જલે યત્પુલકોઽસાવિતિ ચોદિતેન તેન ।
અતિહર્ષનિરુત્તરેણ સાર્ધં રથવાસી પવનેશ પાહિ માં ત્વમ્ ॥ ૭૩-૧૦॥

ઇતિ ત્રિસપ્તતિતમદશકં સમાપ્તમ્ ।

## ચતુઃસપ્તતિતમદશકમ્ (૭૪)

ભગવતઃ મથુરાપુરીપ્રવેશમ્ ।
74 - Entry of the Lord Into Mathura

સમ્પ્રાપ્તો મથુરાં દિનાર્ધવિગમે તત્રાન્તરસ્મિન્વસ-
ન્નારામે વિહિતાશનઃ સખિજનૈર્યાતઃ પુરીમીક્ષિતુમ્ ।
પ્રાપો રાજપથં ચિરશ્રુતિધૃતવ્યાલોકકૌતૂહલ-
સ્ત્રીપુંસોદ્યદગણ્યપુણ્યનિગલૈરાકૃષ્યમાણો નુ કિમ્ ॥ ૭૪-૧॥

ત્વત્પાદદ્યુતિવત્સરાગસુભગાસ્ત્વન્મૂર્તિવદ્યોષિતઃ

સમ્પ્રાપ્તા વિલસત્પયોધરરુચો લોલા ભવદ્દૃષ્ટિવત્ ।
હારિણ્યસ્ત્વદુરસ્સ્થલીવદયિ તે મન્દસ્મિતપ્રૌઢિવ-
ન્નૈર્મલ્યોલ્લસિતાઃ કચૌઘરુચિવદ્રાજત્કલાપાશ્રિતાઃ ॥ ૭૪-૨॥

તાસામાકલયન્નપાઙ્ગવલનૈર્મોદં પ્રહર્ષાદ્ભુત-
વ્યાલોલેષુ જનેષુ તત્ર રજકં કઞ્ચિત્પટીં પ્રાર્થયન્ ।
કસ્તે દાસ્યતિ રાજકીયવસનં યાહીતિ તેનોદિતઃ
સદ્યસ્તસ્ય કરેણ શીર્ષમહૃથાઃ સોઽપ્યાપ પુણ્યાં ગતિમ્ ॥ ૭૪-૩॥

ભૂયો વાયકમેકમાયતમતિં તોષેણ વેષોચિતં
દાશ્વાંસં સ્વપદં નિનેથ સુકૃતં કો વેદ જીવાત્મનામ્ ।
માલાભિઃ સ્તબકૈઃ સ્તવૈરપિ પુનર્માલાકૃતા માનિતો
ભક્તિં તેન વૃતાં દિદેશિથ પરાં લક્ષ્મીં ચ લક્ષ્મીપતે ॥ ૭૪-૪॥

કુબ્જામબ્જવિલોચનાં પથિ પુનર્દૃષ્ટ્વાઙ્ગરાગે તયા
દત્તે સાધુ કિલાઙ્ગરાગમદદાસ્તસ્યા મહાન્તં હૃદિ ।
ચિત્તસ્થામૃજુતામથ પ્રથયિતું ગાત્રેઽપિ તસ્યાઃ સ્ફુટં
ગૃહ્ણન્મઞ્જુકરેણ તામુદનયસ્તાવજ્જગત્સુન્દરીમ્ ॥ ૭૪-૫॥

તાવન્નિશ્ચિતવૈભવાસ્તવ વિભો નાત્યન્તપાપા જના
યત્કિઞ્ચિદ્દદતે સ્મ શક્ત્યનુગુણં તામ્બૂલમાલ્યાદિકમ્ ।
ગૃહ્ણાનઃ કુસુમાદિ કિઞ્ચન તદા માર્ગે નિબદ્ધાઞ્જલિ-
ર્નાતિષ્ઠં બત હા યતોઽદ્ય વિપુલામાર્તિં વ્રજામિ પ્રભો ॥ ૭૪-૬॥

એષ્યામીતિ વિમુક્તયાપિ ભગવન્નાલેપદાત્ર્યા તયા
દૂરાત્કાતરયા નિરીક્ષિતગતિસ્ત્વં પ્રાવિશો ગોપુરમ્ ।
આઘોષાનુમિતત્વદાગમમહાહર્ષોલ્લલદ્દેવકી-
વક્ષોજપ્રગલત્પયોરસમિષાત્ત્વત્કીર્તિરન્તર્ગતા ॥ ૭૪-૭॥

આવિષ્ટો નગરીં મહોત્સવવતીં કોદણ્ડશાલાં વ્રજન્
માધુર્યેણ નુ તેજસા નુ પુરુષૈર્દૂરેણ દત્તાન્તરઃ ।
સ્રગ્ભિર્ભૂષિતમર્ચિતં વરધનુર્મામેતિ વાદાત્પુરઃ
પ્રાગૃહ્ણાઃ સમરોપયઃ કિલ સમાક્રાક્ષીરભાઙ્ક્ષીરપિ ॥ ૭૪-૮॥

શ્વઃ કંસક્ષપણોત્સવસ્ય પુરતઃ પ્રારમ્ભતૂર્યોપમ-
શ્ચાપધ્વંસમહાધ્વનિસ્તવ વિભો દેવાનરોમાઞ્ચયત્ ।
કંસસ્યાપિ ચ વેપથુસ્તદુદિતઃ કોદણ્ડખણ્ડદ્વયી-

ચણ્ડાભ્યાહતરક્ષિપૂરુષરવૈરુત્કૂલિતોઽભૂત્ત્વયા ॥ ૭૪-૯॥

શિષ્ટૈર્દુષ્ટજનૈશ્ચ દૃષ્ટમહિમા પ્રીત્યા ચ ભીત્યા તતઃ
સમ્પશ્યન્પુરસમ્પદં પ્રવિચરન્સાયં ગતો વાટિકામ્ ।
શ્રીદામ્ના સહ રાધિકાવિરહજં ખેદં વદન્પ્રસ્વપ-
ન્નાનન્દન્નવતારકાર્યઘટનાદ્વાતેશ સંરક્ષ મામ્ ॥ ૭૪-૧૦॥

ઇતિ ચતુઃસપ્તતિતમદશકં સમાપ્તમ્ ।

## પઞ્ચસપ્તતિતમદશકમ્ (૭૫)

કંસવધમ્ ।
75 - Slaying of Kamsa

પ્રાતઃ સન્ત્રસ્તભોજક્ષિતિપતિવચસા પ્રસ્તુતે મલ્લતૂર્યે
સઙ્ઘે રાજ્ઞાં ચ મઞ્ચાનભિયયુષિ ગતે નન્દગોપેઽપિ હર્મ્યમ્ ।
કંસે સૌધાધિરૂઢે ત્વમપિ સહબલઃ સાનુગશ્ચારુવેષો
રઙ્ગદ્વારં ગતોઽભૂઃ કુપિતકુવલયાપીડનાગાવલીઢમ્ ॥ ૭૫-૧॥

પાપિષ્ઠાપેહિ માર્ગાદ્દ્રુતમિતિ વચસા નિષ્ઠુરક્રુદ્ધબુદ્ધે-
રમ્બષ્ઠસ્ય પ્રણોદાદધિકજવજુષા હસ્તિના ગૃહ્યમાણઃ ।
કેલીમુક્તોઽથ ગોપીકુચકલશચિરસ્પર્ધિનં કુમ્ભમસ્ય
વ્યાહત્યાલીયથાસ્ત્વં ચરણભુવિ પુનર્નિર્ગતો વલ્ગુહાસી ॥ ૭૫-૨॥

હસ્તપ્રાપ્યોઽપ્યગમ્યો ઝટિતિ મુનિજનસ્યેવ ધાવન્ગજેન્દ્રં
ક્રીડન્નાપત્ય ભૂમૌ પુનરભિપતતસ્તસ્ય દન્તં સજીવમ્ ।
મૂલાદુન્મૂલ્ય તન્મૂલગમહિતમહામૌક્તિકાન્યાત્મમિત્રે
પ્રાદાસ્ત્વં હારમેભિર્લલિતવિરચિતં રાધિકાયૈ દિશેતિ ॥ ૭૫-૩॥

ગૃહ્ણાનં દન્તમંસે યુતમથ હલિના રઙ્ગમઙ્ગાવિશન્તં
ત્વાં મઙ્ગલ્યાઙ્ગભઙ્ગીરભસહૃતમનોલોચના વીક્ષ્ય લોકાઃ ।
હંહો ધન્યો નુ નન્દો ન હિ ન હિ પશુપાલાઙ્ગના નો યશોદા
નો નો ધન્યેક્ષણાઃ સ્મસ્ત્રિજગતિ વયમેવેતિ સર્વે શશંસુઃ ॥ ૭૫-૪॥

પૂર્ણં બ્રહ્મૈવ સાક્ષાન્નિરવધિપરમાનન્દસાન્દ્રપ્રકાશં
ગોપેષુ ત્વં વ્યલાસીર્ન ખલુ બહુજનૈસ્તાવદાવેદિતોઽભૂઃ ।
દૃષ્ટ્વાથ ત્વાં તદેદમ્પ્રથમમુપગતે પુણ્યકાલે જનૌઘાઃ
પૂર્ણાનન્દા વિપાપાઃ સરસમભિજગુસ્ત્વત્કૃતાનિ સ્મૃતાનિ ॥ ૭૫-૫ ॥

ચાણૂરો મલ્લવીરસ્તદનુ નૃપગિરા મુષ્ટિકો મુષ્ટિશાલી
ત્વાં રામં ચાભિપેદે ઝટઝટિતિ મિથો મુષ્ટિપાતાતિરૂક્ષમ્ ।
ઉત્પાતાપાતનાકર્ષણવિવિધરણાન્યાસતાં તત્ર ચિત્રં
મૃત્યોઃ પ્રાગેવ મલ્લપ્રભુરગમદયં ભૂરિશો બન્ધમોક્ષાન્ ॥ ૭૫-૬ ॥

હા ધિક્કષ્ટં કુમારૌ સુલલિતવપુષૌ મલ્લવીરૌ કઠોરૌ
ન દ્રક્ષ્યામો વ્રજામસ્ત્વરિતમિતિ જને ભાષમાણે તદાનીમ્ ।
ચાણૂરં તં કરોદ્ભ્રામણવિગલદસું પોથયામાસિથોર્વ્યાં
પિષ્ટોઽભૂન્મુષ્ટિકોઽપિ દ્રુતમથ હલિના નષ્ટશિષ્ટૈર્દધાવે ॥ ૭૫-૭ ॥

કંસસ્સંવાર્ય તૂર્યં ખલમતિરવિદન્કાર્યમાર્યાન્ પિતૃંસ્તા-
નાહન્તું વ્યાપ્તમૂર્તેસ્તવ ચ સમશિષદ્દૂરમુત્સારણાય ।
રુષ્ટો દુષ્ટોક્તિભિસ્ત્વં ગરુડ ઇવ ગિરિં મઞ્ચમઞ્ચન્નુદઞ્ચત્
ખડ્ગવ્યાવલ્ગદુસ્સઙ્ગ્રહમપિ ચ હઠાત્પ્રાગ્રહીરૌગ્રસેનિમ્ ॥ ૭૫-૮ ॥

સદ્યો નિષ્પિષ્ટસન્ધિં ભુવિ નરપતિમાપાત્ય તસ્યોપરિષ્ટાત્
ત્વય્યાપાત્યે તદૈવ ત્વદુપરિ પતિતા નાકિનાં પુષ્પવૃષ્ટિઃ ।
કિં કિં બ્રૂમસ્તદાનીં સતતમપિ ભિયા ત્વદ્ગતાત્મા સ ભેજે
સાયુજ્યં ત્વદ્વધોત્થા પરમ પરમિયં વાસના કાલનેમેઃ ॥ ૭૫-૯ ॥

તદ્ભ્રાતૃનષ્ટ પિષ્ટ્વા દ્રુતમથ પિતરૌ સન્નમન્નુગ્રસેનં
કૃત્વા રાજાનમુચ્ચૈર્યદુકુલમખિલં મોદયન્કામદાનૈઃ ।
ભક્તાનામુત્તમં ચોદ્ધવમમરગુરોરાપ્તનીતિં સખાયં
લબ્ધ્વા તુષ્ટો નગર્યાં પવનપુરપતે રુન્ધિ મે સર્વરોગાન્ ॥ ૭૫-૧૦ ॥

ઇતિ પઞ્ચસપ્તતિતમદશકં સમાપ્તમ્ ।

# ષટ્સપ્તતિતમદશકમ્ (૭૬)

## ઉદ્ધવદૌત્યમ્ ।
76 - Uddhava Sent As A Messenger To the Gopikas

ગત્વા સાન્દીપનિમથ ચતુષ્ષષ્ટિમાત્રૈરહોભિઃ
સર્વજ્ઞસ્ત્વં સહ મુસલિના સર્વવિદ્યાં ગૃહીત્વા ।
પુત્રં નષ્ટં યમનિલયનાદાહૃતં દક્ષિણાર્થં
દત્ત્વા તસ્મૈ નિજપુરમગા નાદયન્પાઞ્ચજન્યમ્ ॥ ૭૬-૧॥

સ્મૃત્વા સ્મૃત્વા પશુપસુદૃશઃ પ્રેમભારપ્રણુન્નાઃ
કારુણ્યેન ત્વમપિ વિવશઃ પ્રહિણોરુદ્ધવં તમ્ ।
કિઞ્ચામુષ્મૈ પરમસુહૃદે ભક્તવર્યાય તાસાં
ભક્ત્યુદ્રેકં સકલભુવને દુર્લભં દર્શયિષ્યન્ ॥ ૭૬-૨॥

ત્વન્માહાત્મ્યપ્રથિમપિશુનં ગોકુલં પ્રાપ્ય સાયં
ત્વદ્વાર્તાભિર્બહુ સ રમયામાસ નન્દં યશોદામ્ ।
પ્રાતર્દૃષ્ટ્વા મણિમયરથં શઙ્કિતાઃ પઙ્કજાક્ષ્યઃ
શ્રુત્વા પ્રાપ્તં ભવદનુચરં ત્યક્તકાર્યાઃ સમીયુઃ ॥ ૭૬-૩॥

દૃષ્ટ્વા ચૈનં ત્વદુપમલસદ્વેષભૂષાભિરામં
સ્મૃત્વા સ્મૃત્વા તવ વિલસિતાન્યુચ્ચકૈસ્તાનિ તાનિ ।
રુદ્ધાલાપાઃ કથમપિ પુનર્ગદ્ગદાં વાચમૂચુઃ
સૌજન્યાદીન્નિજપરભિદામપ્યલં વિસ્મરન્ત્યઃ ॥ ૭૬-૪॥

શ્રીમન્ કિં ત્વં પિતૃજનકૃતે પ્રેષિતો નિર્દયેન
ક્વાસૌ કાન્તો નગરસુદૃશાં હા હરે નાથ પાયાઃ ।
આશ્લેષાણામમૃતવપુષો હન્ત તે ચુમ્બનાના-
મુન્માદાનાં કુહકવચસાં વિસ્મરેત્કાન્ત કા વા ॥ ૭૬-૫॥

રાસક્રીડાલુલિતલલિતં વિશ્લથત્કેશપાશં
મન્દોદ્ભિન્નશ્રમજલકણં લોભનીયં ત્વદઙ્ગમ્ ।
કારુણ્યાબ્ધે સકૃદપિ સમાલિઙ્ગિતું દર્શયેતિ
પ્રેમોન્માદાદ્ભુવનમદન ત્વત્પ્રિયાસ્ત્વાં વિલેપુઃ ॥ ૭૬-૬॥

એવં પ્રાયૈર્વિવશવચનૈરાકુલા ગોપિકાસ્તાઃ
ત્વત્સન્દેશૈઃ પ્રકૃતિમનયત્સોઽથ વિજ્ઞાનગર્ભૈઃ ।
ભૂયસ્તાભિર્મુદિતમતિભિસ્ત્વન્મયીભિર્વધૂભિ-
સ્તત્તદ્વાર્તાસરસમનયત્કાનિચિદ્વાસરાણિ ॥ ૭૬-૭॥

ત્વત્પ્રોદ્ગાનૈઃ સહિતમનિશં સર્વતો ગેહકૃત્યં
ત્વદ્વાર્તૈવ પ્રસરતિ મિથઃ સૈવ ચોત્સ્વાપલાપાઃ ।
ચેષ્ટાઃ પ્રાયસ્ત્વદનુકૃતયસ્ત્વન્મયં સર્વમેવં
દૃષ્ટ્વા તત્ર વ્યમુહદધિકં વિસ્મયાદુદ્ધવોઽયમ્ ॥ ૭૬-૮॥

રાધાયા મે પ્રિયતમમિદં મત્પ્રિયૈવં બ્રવીતિ
ત્વં કિં મૌનં કલયસિ સખે માનિની મત્પ્રિયેવ ।
ઇત્યાદ્યેવ પ્રવદતિ સખિ ત્વત્પ્રિયો નિર્જને મા-
મિત્થંવાદૈરરમયદયં ત્વત્પ્રિયામુત્પલાક્ષીમ્ ॥ ૭૬-૯॥

એષ્યામિ દ્રાગનુપગમનં કેવલં કાર્યભારાદ્-
વિશ્લેષેઽપિ સ્મરણદૃઢતાસમ્ભવાન્માસ્તુ ખેદઃ ।
બ્રહ્માનન્દે મિલતિ નચિરાત્સઙ્ગમો વા વિયોગ-
સ્તુલ્યો વઃ સ્યાદિતિ તવ ગિરા સોઽકરોન્નિર્વ્યથાસ્તાઃ ॥ ૭૬-૧૦॥

એવં ભક્તિઃ સકલભુવને નેક્ષિતા ન શ્રુતા વા
કિં શાસ્ત્રૌઘૈઃ કિમિહ તપસા ગોપિકાભ્યો નમોઽસ્તુ ।
ઇત્યાનન્દાકુલમુપગતં ગોકુલાદુદ્ધવં તં
દૃષ્ટ્વા હૃષ્ટો ગુરુપુરપતે પાહિ મામામયૌઘાત્ ॥ ૭૬-૧૧॥

ઇતિ ષટ્સપ્તતિતમદશકં સમાપ્તં

## સપ્તસપ્તતિતમદશકમ્ (૭૭)

જરાસન્ધાદિભિઃ સહ યુદ્ધમ્ ।
77 - Fight Against Jarasandha And Others

સૈરન્ધ્ર્યાસ્તદનુ ચિરં સ્મરાતુરાયા

યાતોઽભૂઃ સલલિતમુદ્ધવેન સાર્ધમ્ ।
આવાસં ત્વદુપગમોત્સવં સદૈવ
ધ્યાયન્ત્યાઃ પ્રતિદિનવાસસજ્જિકાયાઃ ॥ ૭૭-૧॥

ઉપગતે ત્વયિ પૂર્ણમનોરથાં
પ્રમદસમ્ભ્રમકમ્પ્રપયોધરામ્ ।
વિવિધમાનનમાદધતીં મુદા
રહસિ તાં રમયાઞ્ચકૃષે સુખમ્ ॥ ૭૭-૨॥

પૃષ્ટા વરં પુનરસાવવૃણોદ્વરાકી
ભૂયસ્ત્વયા સુરતમેવ નિશાન્તરેષુ ।
સાયુજ્યમસ્ત્વિતિ વદેદ્બુધ એવ કામં
સામીપ્યમસ્ત્વનિશમિત્યપિ નાબ્રવીત્કિમ્ ॥ ૭૭-૩॥

તતો ભવાન્દેવ નિશાસુ કાસુચિન્મૃગીદૃશં તાં નિભૃતં વિનોદયન્ ।
અદાદુપશ્લોક ઇતિ શ્રુતં સુતં સ નારદાત્સાત્ત્વતતન્ત્રવિદ્બભૌ ॥ ૭૭-૪॥

અક્રૂરમન્દિરમિતોઽથ બલોદ્ધવાભ્યા-
મભ્યર્ચિતો બહુ નુતો મુદિતેન તેન ।
એનં વિસૃજ્ય વિપિનાગતપાણ્ડવેય-
વૃત્તં વિવેદિથ તથા ધૃતરાષ્ટ્રચેષ્ટામ્ ॥ ૭૭-૫॥

વિઘાતાજ્જામાતુઃ પરમસુહૃદો ભોજનૃપતે-
ર્જરાસન્ધે રુન્ધત્યનવધિરુષાન્ધેઽથ મથુરામ્ ।
રથાદ્યૈર્દ્યોર્લબ્ધૈઃ કતિપયબલસ્ત્વં બલયુત-
સ્ત્રયોવિંશત્યક્ષૌહિણિ તદુપનીતં સમહૃથાઃ ॥ ૭૭-૬॥

બદ્ધં બલાદથ બલેન બલોત્તરં ત્વં
ભૂયો બલોદ્યમરસેન મુમોચિથૈનમ્ ।
નિશ્શેષદિગ્જયસમાહૃતવિશ્વસૈન્યાત્
કોઽન્યસ્તતો હિ બલપૌરુષવાંસ્તદાનીમ્ ॥ ૭૭-૭॥

ભગ્નસ્સ લગ્નહૃદયોઽપિ નૃપૈઃ પ્રણુન્નો
યુદ્ધં ત્વયા વ્યધિત ષોડશકૃત્વ એવમ્ ।
અક્ષૌહિણીઃ શિવ શિવાસ્ય જઘન્થ વિષ્ણો
સમ્ભૂય સૈકનવતિત્રિશતં તદાનીમ્ ॥ ૭૭-૮॥

અષ્ટાદશેઽસ્ય સમરે સમુપેયુષિ ત્વં
દૃષ્ટ્વા પુરોઽથ યવનં યવનત્રિકોટ્યા ।
ત્વષ્ટ્રા વિધાપ્ય પુરમાશુ પયોધિમધ્યે
તત્રાથ યોગબલતઃ સ્વજનાનનૈષીઃ ॥ ૭૭-૯॥

પદ્ભ્યાં ત્વં પદ્મમાલી ચકિત ઇવ પુરાન્નિર્ગતો ધાવમાનો
મ્લેચ્છેશેનાનુયાતો વધસુકૃતવિહીનેન શૈલે ન્યલૈષીઃ ।
સુપ્તેનાઙ્ઘ્ર્યાહતેન દ્રુતમથ મુચુકુન્દેન ભસ્મીકૃતેઽસ્મિન્
ભૂપાયાસ્મૈ ગુહાન્તે સુલલિતવપુષા તસ્થિષે ભક્તિભાજે ॥ ૭૭-૧૦॥

ઐક્ષ્વાકોઽહં વિરક્તોઽસ્મ્યખિલનૃપસુખે ત્વત્પ્રસાદૈકકાઙ્ક્ષી
હા દેવેતિ સ્તુવન્તં વરવિતતિષુ તં નિસ્પૃહં વીક્ષ્ય હૃષ્યન્ ।
મુક્તેસ્તુલ્યાં ચ ભક્તિં ધુતસકલમલં મોક્ષમપ્યાશુ દત્ત્વા
કાર્યં હિંસાવિશુદ્ધ્યૈ તપ ઇતિ ચ તદા પ્રાસ્થ લોકપ્રતીત્યૈ ॥ ૭૭-૧૧॥

તદનુ મથુરાં ગત્વા હત્વા ચમૂં યવનાહૃતાં
મગધપતિના માર્ગે સૈન્યૈઃ પુરેવ નિવારિતઃ ।
ચરમવિજયં દર્પાયાસ્મૈ પ્રદાય પલાયિતો
જલધિનગરીં યાતો વાતાલયેશ્વર પાહિ મામ્ ॥ ૭૭-૧૨॥

ઇતિ સપ્તસપ્તતિતમદશકં સમાપ્તં

## અષ્ટસપ્તતિતમદશકમ્ (૭૮)

દ્વારકાવાસઃ તથા રુક્મિણીસન્દેશપ્રાપ્તિઃ ।
78 - Rukmini Swayamvaram

ત્રિદશવર્ધકિવર્ધિતકૌશલં ત્રિદશદત્તસમસ્તવિભૂતિમત્ ।
જલધિમધ્યગતં ત્વમભૂષયો નવપુરં વપુરઞ્ચિતરોચિષા ॥ ૭૮-૧॥

દદુષિ રેવતભૂભૃતિ રેવતીં હલભૃતે તનયાં વિધિશાસનાત્ ।
મહિતમુત્સવઘોષમપૂપુષઃ સમુદિતૈર્મુદિતૈઃ સહ યાદવૈઃ ॥ ૭૮-૨॥

અથ વિદર્ભસુતાં ખલુ રુક્મિણીં પ્રણયિનીં ત્વયિ દેવ સહોદરઃ ।

સ્વયમદિત્સત ચેદિમહીભુજે સ્વતમસા તમસાધુમુપાશ્રયન્ ॥ ૭૮-૩॥

ચિરધૃતપ્રણયા ત્વયિ બાલિકા સપદિ કાઙ્ક્ષિતભઙ્ગસમાકુલા ।
તવ નિવેદયિતું દ્વિજમાદિશત્સ્વકદનં કદનઙ્ગવિનિર્મિતમ્ ॥ ૭૮-૪॥

દ્વિજસુતોઽપિ ચ તૂર્ણમુપાયયૌ તવ પુરં હિ દુરાશદુરાસદમ્ ।
મુદમવાપ ચ સાદરપૂજિતઃ સ ભવતા ભવતાપહૃતા સ્વયમ્ ॥ ૭૮-૫॥

સ ચ ભવન્તમવોચત કુણ્ડિને નૃપસુતા ખલુ રાજતિ રુક્મિણી ।
ત્વયિ સમુત્સુકયા નિજધીરતારહિતયા હિ તયા પ્રહિતોઽસ્મ્યહમ્ ॥ ૭૮-૬॥

તવ હૃતાસ્મિ પુરૈવ ગુણૈરહં હરતિ માં કિલ ચેદિનૃપોઽધુના ।
અયિ કૃપાલય પાલય મામિતિ પ્રજગદે જગદેકપતે તયા ॥ ૭૮-૭॥

અશરણાં યદિ માં ત્વમુપેક્ષસે સપદિ જીવિતમેવ જહામ્યહમ્ ।
ઇતિ ગિરા સુતનોરતનોદ્ભૃશં સુહૃદયં હૃદયં તવ કાતરમ્ ॥ ૭૮-૮॥

અકથયસ્ત્વમથૈનમયે સખે તદધિકા મમ મન્મથવેદના ।
નૃપસમક્ષમુપેત્ય હરામ્યહં તદયિ તાં દયિતામસિતેક્ષણામ્ ॥ ૭૮-૯॥

પ્રમુદિતેન ચ તેન સમં તદા રથગતો લઘુ કુણ્ડિનમેયિવાન્ ।
ગુરુમરુત્પુરનાયક મે ભવાન્વિતનુતાં તનુતામખિલાપદામ્ ॥ ૭૮-૧૦॥

ઇતિ અષ્ટસપ્તતિતમદશકં સમાપ્તમ્ ।

## એકોનાશીતિતમ દશકમ્ (૭૯)

રુક્મિણીહરણં-વિવાહમ્ ।
79 - Rukmini Haranam and Kalyanam

બલસમેતબલાનુગતો ભવાન્ પુરમગાહત ભીષ્મકમાનિતઃ ।
દ્વિજસુતં ત્વદુપાગમવાદિનં ધૃતરસા તરસા પ્રણનામ સા ॥ ૭૯-૧॥

ભુવનકાન્તમવેક્ષ્ય ભવદ્વપુર્નૃપસુતસ્ય નિશમ્ય ચ ચેષ્ટિતમ્ ।
વિપુલખેદજુષાં પુરવાસિનાં સરુદિતૈરુદિતૈરગમન્નિશા ॥ ૭૯-૨॥

તદનુ વન્દિતુમિન્દુમુખી શિવાં વિહિતમઙ્ગલભૂષણભાસુરા ।

નિરગમદ્ભવદર્પિતજીવિતા સ્વપુરતઃ પુરતઃ સુભટાવૃતા ॥ ૭૯-૩॥

કુલવધૂભિરુપેત્ય કુમારિકા ગિરિસુતાં પરિપૂજ્ય ચ સાદરમ્ ।
મુહુરયાચત તત્પદપઙ્કજે નિપતિતા પતિતાં તવ કેવલમ્ ॥ ૭૯-૪॥

સમવલોકકુતુહલસઙ્કુલે નૃપકુલે નિભૃતં ત્વયિ ચ સ્થિતે ।
નૃપસુતા નિરગાદ્ગિરિજાલયાત્સુરુચિરં રુચિરઞ્જિતદિઙ્મુખા ॥ ૭૯-૫॥

ભુવનમોહનરૂપરુચા તદા વિવશિતાખિલરાજકદમ્બયા ।
ત્વમપિ દેવ કટાક્ષવિમોક્ષણૈઃ પ્રમદયા મદયાઞ્ચકૃષે મનાક્ ॥ ૭૯-૬॥

ક્વ નુ ગમિષ્યસિ ચન્દ્રમુખીતિ તાં સરસમેત્ય કરેણ હરન્ ક્ષણાત્ ।
સમધિરોપ્ય રથં ત્વમપાહૃથા ભુવિ તતો વિતતો નિનદો દ્વિષામ્ ॥ ૭૯-૭॥

ક્વ નુ ગતઃ પશુપાલ ઇતિ ક્રુધા કૃતરણા યદુભિશ્ચ જિતા નૃપાઃ ।
ન તુ ભવાનુદચાલ્યત તૈરહો પિશુનકૈઃ શુનકૈરિવ કેસરી ॥ ૭૯-૮॥

તદનુ રુક્મિણમાગતમાહવે વધમુપેક્ષ્ય નિબધ્ય વિરૂપયન્ ।
હૃતમદં પરિમુચ્ય બલોક્તિભિઃ પુરમયા રમયા સહ કાન્તયા ॥ ૭૯-૯॥

નવસમાગમલજ્જિતમાનસાં પ્રણયકૌતુકજૃમ્ભિતમન્મથામ્ ।
અરમયઃ ખલુ નાથ યથાસુખં રહસિ તાં હસિતાંશુલસન્મુખીમ્ ॥ ૭૯-૧૦॥

વિવિધનર્મભિરેવમહર્નિશં પ્રમદમાકલયન્પુનરેકદા ।
ઋજુમતેઃ કિલ વક્રગિરા ભવાન્ વરતનોરતનોદતિલોલતામ્ ॥ ૭૯-૧૧॥

તદધિકૈરથ લાલનકૌશલૈઃ પ્રણયિનીમધિકં રમયન્નિમામ્ ।
અયિ મુકુન્દ ભવચ્ચરિતાનિ નઃ પ્રગદતાં ગદતાન્તિમપાકુરુ ॥ ૭૯-૧૨॥

ઇતિ એકોનાશીતિતમદશકં સમાપ્તં

## અશીતિતમદશકમ્ (૮૦)

### સ્યમન્તકોપાખ્યાનમ્ ।
80 - Story of the Syamantaka Jewel

સત્રાજિતસ્ત્વમથ લુબ્ધવદર્કલબ્ધં
દિવ્યં સ્યમન્તકમણિં ભગવન્નયાચીઃ ।
તત્કારણં બહુવિધં મમ ભાતિ નૂનં
તસ્યાત્મજાં ત્વયિ રતાં છલતો વિવોઢુમ્ ॥ ૮૦-૧॥

અદત્તં તં તુભ્યં મણિવરમનેનાલ્પમનસા
પ્રસેનસ્તદ્ભ્રાતા ગલભુવિ વહન્પ્રાપ મૃગયામ્ ।
અહન્નેનં સિંહો મણિમહસિ માંસભ્રમવશાત્
કપીન્દ્રસ્તં હત્વા મણિમપિ ચ બાલાય દદિવાન્ ॥ ૮૦-૨॥

શશંસુઃ સત્રાજિદ્ગિરમનુ જનાસ્ત્વાં મણિહરં
જનાનાં પીયૂષં ભવતિ ગુણિનાં દોષકણિકા ।
તતઃ સર્વજ્ઞોઽપિ સ્વજનસહિતો માર્ગણપરઃ
પ્રસેનં તં દૃષ્ટ્વા હરિમપિ ગતોઽભૂઃ કપિગુહામ્ ॥ ૮૦-૩॥

ભવન્તમવિતર્કયન્નતિવયાઃ સ્વયં જામ્બવાન્
મુકુન્દશરણં હિ માં ક ઇહ રોદ્ધુમિત્યાલપન્ ।
વિભો રઘુપતે હરે જય જયેત્યલં મુષ્ટિભિ-
શ્ચિરં તવ સમર્ચનં વ્યધિત ભક્તચૂડામણિઃ ॥ ૮૦-૪॥

બુદ્ધ્વાથ તેન દત્તાં નવરમણીં વરમણિં ચ પરિગૃહ્ણન્ ।
અનુગૃહ્ણન્નમુમાગાઃ સપદિ ચ સત્રાજિતે મણિં પ્રાદાઃ ॥ ૮૦-૫॥

તદનુ સ ખલુ વ્રીડાલોલો વિલોલવિલોચનાં
દુહિતરમહો ધીમાન્ભામાં ગિરૈવ પરાર્પિતામ્ ।
અદિતમણિના તુભ્યં લભ્યં સમેત્ય ભવાનપિ
પ્રમુદિતમનાસ્તસ્યૈવાદાન્મણિં ગહનાશયઃ ॥ ૮૦-૬॥

વ્રીલાકુલાં રમયતિ ત્વયિ સત્યભામાં
કૌન્તેયદાહકથયાથ કુરૂન્પ્રયાતે ।
હા ગાન્દિનેયકૃતવર્મગિરા નિપાત્ય
સત્રાજિતં શતધનુર્મણિમાજહાર ॥ ૮૦-૭॥

શોકાત્કુરૂનુપગતામવલોક્ય કાન્તાં
હત્વા દ્રુતં શતધનું સમહર્ષયસ્તામ્ ।
રત્ને સશઙ્ક ઇવ મૈથિલગેહમેત્ય

રામો ગદાં સમશિશિક્ષત ધાર્તરાષ્ટ્રમ્ ॥ ૮૦-૮॥

અક્રૂર એષ ભગવન્ ભવદિચ્છયૈવ
સત્રાજિતઃ કુચરિતસ્ય યુયોજ હિંસામ્ ।
અક્રૂરતો મણિમનાહૃતવાન્પુનસ્ત્વં
તસ્યૈવ ભૂતિમુપધાતુમિતિ બ્રુવન્તિ ॥ ૮૦-૯॥

ભક્તસ્ત્વયિ સ્થિરતરઃ સ હિ ગાન્દિનેય-
સ્તસ્યૈવ કાપથમતિઃ કથમીશ જાતા ।
વિજ્ઞાનવાન્પ્રશમવાનહમિત્યુદીર્ણં
ગર્વં ધ્રુવં શમયિતું ભવતા કૃતૈવ ॥ ૮૦-૧૦॥

યાતં ભયેન કૃતવર્મયુતં પુનસ્ત-
માહૂય તદ્વિનિહિતં ચ મણિં પ્રકાશ્ય ।
તત્રૈવ સુવ્રતધરે વિનિધાય તુષ્યન્
ભામાકુચાન્તરશયઃ પવનેશ પાયાઃ ॥ ૮૦-૧૧॥

ઇતિ અશીતિતમદશકં સમાપ્તમ્ ।

## એકાશીતિતમદશકમ્ (૮૧)

### નરકાસુરવધં તથા સુભદ્રાહરણમ્ ।
81 - Slaying of Narakasura And Abduction of Subhadra

સ્નિગ્ધાં મુગ્ધાં સતતમપિ તાં લાલયન્ સત્યભામાં
યાતો ભૂયઃ સહ ખલુ તયા યાજ્ઞસેનીવિવાહમ્ ।
પાર્થપ્રીત્યૈ પુનરપિ મનાગાસ્થિતો હસ્તિપુર્યાં
શક્રપ્રસ્થં પુરમપિ વિભો સંવિધાયાગતોઽભૂઃ ॥ ૮૧-૧॥

ભદ્રાં ભદ્રાં ભવદવરજાં કૌરવેણાર્થ્યમાનાં
ત્વદ્વાચા તામહૃત કુહનામસ્કરી શક્રસૂનુઃ ।
તત્ર ક્રુદ્ધં બલમનુનયન્ પ્રત્યગાસ્તેન સાર્ધં
શક્રપ્રસ્થં પ્રિયસખમુદે સત્યભામાસહાયઃ ॥ ૮૧-૨॥

તત્ર ક્રીડન્નપિ ચ યમુનાકૂલદૃષ્ટાં ગૃહીત્વા
તાં કાલિન્દીં નગરમગમઃ ખાણ્ડવપ્રીણિતાગ્નિઃ ।
ભ્રાતૃત્રસ્તાં પ્રણયવિવશાં દેવ પૈતૃષ્વસેયીં
રાજ્ઞાં મધ્યે સપદિ જહૃષે મિત્રવિન્દામવન્તીમ્ ॥ ૮૧-૩ ॥

સત્યાં ગત્વા પુનરુદવહો નગ્નજિન્નન્દનાં તાં
બધ્વા સપ્તાપિ ચ વૃષવરાન્સપ્તમૂર્તિર્નિમેષાત્ ।
ભદ્રાં નામ પ્રદદુરથ તે દેવ સન્તર્દનાદ્યા-
સ્તત્સોદર્યાં વરદ ભવતઃ સાપિ પૈતૃષ્વસેયી ॥ ૮૧-૪ ॥

પાર્થાદ્યૈરપ્યકૃતલવનં તોયમાત્રાભિલક્ષ્યં
લક્ષં છિત્વા શફરમવૃથા લક્ષણાં મદ્રકન્યામ્ ।
અષ્ટાવેવં તવ સમભવન્ વલ્લભાસ્તત્ર મધ્યે
શુશ્રોથ ત્વં સુરપતિગિરા ભૌમદુશ્ચેષ્ટિતાનિ ॥ ૮૧-૫ ॥

સ્મૃતાયાતં પક્ષિપ્રવરમધિરૂઢસ્ત્વમગમો
વહન્નઙ્કે ભામામુપવનમિવારાતિભવનમ્ ।
વિભિન્દન્ દુર્ગાણિ ત્રુટિતપૃતનાશોનિતરસૈઃ
પુરં તાવત્પ્રાગ્જ્યોતિષમકુરુથાશ્શોણિતપુરમ્ ॥ ૮૧-૬ ॥

મુરસ્ત્વાં પઞ્ચાસ્યો જલધિવનમધ્યાદુદપતત્
સ ચક્રે ચક્રેણ પ્રદલિતશિરા મઙ્ક્ષુ ભવતા ।
ચતુર્દન્તૈર્દન્તાવલપતિભિરિન્ધાનસમરં
રથાઙ્ગેનચ્છિત્વા નરકમકરોસ્તીર્ણનરકમ્ ॥ ૮૧-૭ ॥

સ્તુતો ભૂમ્યા રાજ્યં સપદિ ભગદત્તેઽસ્ય તનયે
ગજઞ્ચૈકં દત્ત્વા પ્રજિઘયિથ નાગાન્નિજપુરીમ્ ।
ખલેનાબદ્ધાનાં સ્વગતમનસાં ષોડશ પુનઃ
સહસ્રાણિ સ્ત્રીણામપિ ચ ધનરાશિં ચ વિપુલમ્ ॥ ૮૧-૮ ॥

ભૌમાપાહૃતકુણ્ડલં તદદિતેર્દાતું પ્રયાતો દિવં
શક્રાદ્યૈર્મહિતઃ સમં દયિતયા દ્યુસ્ત્રીષુ દત્તહ્રિયા ।
હૃત્વા કલ્પતરું રુષાભિપતિતં જિત્વેન્દ્રમભ્યાગમ-
સ્તત્તુ શ્રીમદદોષ ઈદૃશ ઇતિ વ્યાખ્યાતુમેવાકૃથાઃ ॥ ૮૧-૯ ॥

કલ્પદ્રું સત્યભામાભવનભુવિ સૃજન્દ્વ્યષ્ટસાહસ્રયોષાઃ
સ્વીકૃત્ય પ્રત્યગારં વિહિતબહુવપુર્લાલયન્કેલિભેદૈઃ ।

આશ્ચર્યાન્નારદાલોકિતવિવિધગતિસ્તત્ર તત્રાપિ ગેહે
ભૂયઃ સર્વાસુ કુર્વન્ દશ દશ તનયાન્ પાહિ વાતાલયેશ ॥ ૮૧-૧૦॥

ઇતિ એકાશીતિતમદશકં સમાપ્તમ્ ।

## દ્વ્યશીતિતમદશકમ્ (૮૨)

બાણાસુરયુદ્ધં તથા નૃગશાપમોક્ષમ્ ।
82 - Fight With Bana - Deliverence of Nriga

પ્રદ્યુમ્નો રૌક્મિણેયઃ સ ખલુ તવ કલા શમ્બરેણાહૃતસ્તં
હત્વા રત્યા સહાપ્તો નિજપુરમહરદ્રુક્મિકન્યાં ચ ધન્યામ્ ।
તત્પુત્રોઽથાનિરુદ્ધો ગુણનિધિરવહદ્રોચનાં રુક્મિપૌત્રીં
તત્રોદ્વાહે ગતસ્ત્વં ન્યવધિ મુસલિના રુક્મ્યપિ દ્યૂતવૈરાત્ ॥ ૮૨-૧॥

બાણસ્ય સા બલિસુતસ્ય સહસ્રબાહો-
ર્માહેશ્વરસ્ય મહિતા દુહિતા કિલોષા ।
ત્વત્પૌત્રમેનમનિરુદ્ધમદૃષ્ટપૂર્વં
સ્વપ્નેઽનુભૂય ભગવન્ વિરહાતુરાઽભૂત્ ॥ ૮૨-૨॥

યોગિન્યતીવ કુશલા ખલુ ચિત્રલેખા
તસ્યાઃ સખી વિલિખતી તરુણાનશેષાન્ ।
તત્રાનિરુદ્ધમુષયા વિદિતં નિશાયા-
માનેષ્ટ યોગબલતો ભવતો નિકેતાત્ ॥ ૮૨-૩॥

કન્યાપુરે દયિતયા સુખમારમન્તં
ચૈનં કથઞ્ચન બબન્ધુષિ શર્વબન્ધૌ ।
શ્રીનારદોક્તતદુદન્તદુરન્તરોષૈ-
સ્ત્વં તસ્ય શોણિતપુરં યદુભિર્ન્યરુન્ધાઃ ॥ ૮૨-૪॥

પુરીપાલઃ શૈલપ્રિયદુહિતૃનાથોઽસ્ય ભગવાન્
સમં ભૂતવ્રાતૈર્યદુબલમશઙ્કં નિરુરુધે ।
મહાપ્રાણો બાણો ઝટિતિ યુયુધાનેન યુયુધે

ગુહઃ પ્રદ્યુમ્નેન ત્વમપિ પુરહન્ત્રા જઘટિષે ॥ ૮૨-૫॥

નિરુદ્ધાશેષાસ્ત્રે મુમુહુષિ તવાસ્ત્રેણ ગિરિશે
દ્રુતા ભૂતા ભીતાઃ પ્રમથકુલવીરાઃ પ્રમથિતાઃ ।
પરાસ્કન્દત્સ્કન્દઃ કુસુમશરબાણૈશ્ચ સચિવઃ
સ કુમ્ભાણ્ડો ભાણ્ડં નવમિવ બલેનાશુ બિભિદે ॥ ૮૨-૬॥

ચાપાનાં પઞ્ચશત્યા પ્રસભમુપગતે છિન્નચાપેઽથ બાણે
વ્યર્થે યાતે સમેતો જ્વરપતિરશનૈરજ્વરિ ત્વજ્જ્વરેણ ।
જ્ઞાની સ્તુત્વાથ દત્ત્વા તવ ચરિતજુષાં વિજ્વરં સજ્વરોઽગાત્
પ્રાયોઽન્તર્જ્ઞાનવન્તોઽપિ ચ બહુતમસા રૌદ્રચેષ્ટા હિ રૌદ્રાઃ ॥ ૮૨-૭॥

બાણં નાનાયુધોગ્રં પુનરભિપતિતં દર્પદોષાદ્વિતન્વન્
નિર્લૂનાશેષદોષં સપદિ બુબુધુષા શઙ્કરેણોપગીતઃ ।
તદ્વાચા શિષ્ટબાહુદ્વિતયમુભયતો નિર્ભયં તત્પ્રિયં તં
મુક્ત્વા તદ્દત્તમાનો નિજપુરમગમઃ સાનિરુદ્ધઃ સહોષઃ ॥ ૮૨-૮॥

મુહુસ્તાવચ્છક્રં વરુણમજયો નન્દહરણે
યમં બાલાનીતૌ દવદહનપાનેઽનિલસખમ્ ।
વિધિં વત્સસ્તેયે ગિરિશમિહ બાણસ્ય સમરે
વિભો વિશ્વોત્કર્ષી તદયમવતારો જયતિ તે ॥ ૮૨-૯॥

દ્વિજરુષા કૃકલાસવપુર્ધરં નૃગનૃપં ત્રિદિવાલયમાપયન્ ।
નિજજને દ્વિજભક્તિમનુત્તમામુપદિશન્ પવનેશ્વર પાહિ મામ્ ॥ ૮૨-૧૦॥

ઇતિ દ્વ્યશીતિતમદશકં સમાપ્તં

## ત્ર્યશીતિતમદશકમ્ (૮૩)

### પૌણ્ડ્રકવધં - દ્વિનિદવધમ્ ।
### 83 - Slaying of Paundraka and Dvivida

રામેઽથગોકુલગતે પ્રમદાપ્રસક્તે
હૂતાનુપેતયમુનાદમને મદાન્ધે ।

સ્વૈરં સમારમતિ સેવકવાદમૂઢો
દૂતં ન્યયુઙ્ક્ત તવ પૌણ્ડ્રકવાસુદેવઃ ॥ ૮૩-૧॥

નારાયણોઽહમવતીર્ણ ઇહાસ્મિ ભૂમૌ
ધત્સે કિલ ત્વમપિ મામકલક્ષણાનિ ।
ઉત્સૃજ્ય તાનિ શરણં વ્રજ મામિતિ ત્વાં
દૂતો જગાદ સકલૈર્હસિતઃ સભાયામ્ ॥ ૮૩-૨॥

દૂતેઽથ યાતવતિ યાદવસૈનિકસ્ત્વં
યાતો દદર્શિથ વપુઃ કિલ પૌણ્ડ્રકીયમ્ ।
તાપેન વક્ષસિ કૃતાઙ્કમનલ્પમૂલ્ય-
શ્રીકૌસ્તુભં મકરકુણ્ડલપીતચેલમ્ ॥ ૮૩-૩॥

કાલાયસં નિજસુદર્શનમસ્યતોઽસ્ય
કાલાનલોત્કરકિરેણ સુદર્શનેન ।
શીર્ષં ચકર્તિથ મમર્દિથ ચાસ્ય સેનાં
તન્મિત્રકાશિપશિરોઽપિ ચકર્થ કાશ્યામ્ ॥ ૮૩-૪॥

જાડ્યેન બાલકગિરાઽપિ કિલાહમેવ
શ્રીવાસુદેવ ઇતિ રૂઢમતિશ્ચિરં સઃ ।
સાયુજ્યમેવ ભવદૈક્યધિયા ગતોઽભૂત્
કો નામ કસ્ય સુકૃતં કથમિત્યવેયાત્ ॥ ૮૩-૫॥

કાશીશ્વરસ્ય તનયોઽથ સુદક્ષિણાખ્યઃ
શર્વં પ્રપૂજ્ય ભવતે વિહિતાભિચારઃ ।
કૃત્યાનલં કમપિ બાણરણાતિભીતૈ-
ર્ભૂતૈઃ કથઞ્ચન વૃતૈઃ સમમભ્યમુઞ્ચત્ ॥ ૮૩-૬॥

તાલપ્રમાણચરણામખિલં દહન્તીં
કૃત્યાં વિલોક્ય ચકિતૈઃ કથિતોઽપિ પૌરૈઃ ।
દ્યૂતોત્સવે કમપિ નો ચલિતો વિભો ત્વં
પાર્શ્વસ્થમાશુ વિસસર્જિથ કાલચક્રમ્ ॥ ૮૩-૭॥

અભ્યાપતત્યમિતધામ્નિ ભવન્મહાસ્ત્રે
હા હેતિ વિદ્રુતવતી ખલુ ઘોરકૃત્યા ।
રોષાત્સુદક્ષિણમદક્ષિણચેષ્ટિતં તં
પુપ્લોષ ચક્રમપિ કાશિપુરામધાક્ષીત્ ॥ ૮૩-૮॥

સ ખલુ વિવિદો રક્ષોઘાતે કૃતોપકૃતિઃ પુરા
તવ તુ કલયા મૃત્યું પ્રાપ્તું તદા ખલતાં ગતઃ ।
નરકસચિવો દેશક્લેશં સૃજન્ નગરાન્તિકે
ઝટિતિ હલિના યુધ્યન્નદ્ધા પપાત તલાહતઃ ॥ ૮૩-૯॥

સામ્બં કૌરવ્યપુત્રીહરણનિયમિતં સાન્ત્વનાર્થી કુરૂણાં
યાતસ્તદ્વાક્યરોષોદ્ધૃતકરિનગરો મોચયામાસ રામઃ ।
તે ઘાત્યાઃ પાણ્ડવેયૈરિતિ યદુપૃતનાં નામુચસ્ત્વં તદાનીં
તં ત્વાં દુર્બોધલીલં પવનપુરપતે તાપશાન્ત્યૈ નિષેવે ॥ ૮૩-૧૦॥

ઇતિ ત્ર્યશીતિતમદશકં સમાપ્તમ્ ।

## ચતુરશીતિતમદશકમ્ (૮૪)

સમન્તપઞ્ચકતીર્થયાત્રા । - બન્ધુમિત્રાદિ સમાગમમ્ ।
84 - Pilgrimage To Samantapanchaka - Meeting with Relatives and Friends.

ક્વચિદથ તપનોપરાગકાલે પુરિ નિદધત્કૃતવર્મકામસૂનૂ ।
યદુકુલમહિલાવૃતઃ સુતીર્થં સમુપગતોઽસિ સમન્તપઞ્ચકાખ્યમ્ ॥ ૮૪-૧॥

બહુતરજનતાહિતાય તત્ર ત્વમપિ પુનર્વિનિમજ્જ્ય તીર્થતોયમ્ ।
દ્વિજગણપરિમુક્તવિત્તરાશિઃ સમમિલથાઃ કુરુપાણ્ડવાદિમિત્રૈઃ ॥ ૮૪-૨॥

તવ ખલુ દયિતાજનૈઃ સમેતા દ્રુપદસુતા ત્વયિ ગાઢભક્તિભારા ।
તદુદિતભવદાહૃતિપ્રકારૈરતિમુમુદે સમમન્યભામિનીભિઃ ॥ ૮૪-૩॥

તદનુ ચ ભગવન્ નિરીક્ષ્ય ગોપાનતિકુતુકાદુપગમ્ય માનયિત્વા ।
ચિરતરવિરહાતુરાઙ્ગરેખાઃ પશુપવધૂઃ સરસં ત્વમન્વયાસીઃ ॥ ૮૪-૪॥

સપદિ ચ ભવદીક્ષણોત્સવેન પ્રમુષિતમાનહૃદાં નિતમ્બિનીનામ્ ।
અતિરસપરિમુક્તકઞ્ચુલીકે પરિચયહૃદ્યતરે કુચે ન્યલૈષીઃ ॥ ૮૪-૫॥

રિપુજનકલહૈઃ પુનઃ પુનર્મે સમુપગતૈરિયતી વિલમ્બનાભૂત્ ।

ઇતિ કૃતપરિરમ્ભણે ત્વયિ દ્રાગતિવિવશા ખલુ રાધિકા નિલિલ્યે ॥ ૮૪-૬॥

અપગતવિરહવ્યથાસ્તદા તા રહસિ વિધાય દદાથ તત્ત્વબોધમ્ ।
પરમસુખચિદાત્મકોઽહમાત્મેત્યુદયતુ વઃ સ્ફુટમેવ ચેતસીતિ ॥ ૮૪-૭॥

સુખરસપરિમિશ્રિતો વિયોગઃ કિમપિ પુરાભવદુદ્ધવોપદેશૈઃ ।
સમભવદમુતઃ પરં તુ તાસાં પરમસુખૈક્યમયી ભવદ્વિચિન્તા ॥ ૮૪-૮॥

મુનિવરનિવહૈસ્તવાથ પિત્રા દુરિતશમાય શુભાનિ પૃચ્છ્યમાનૈઃ ।
ત્વયિ સતિ કિમિદં શુભાન્તરૈરિત્યુરુહસિતૈરપિ યાજિતસ્તદાસૌ ॥ ૮૪-૯॥

સુમહતિ યજને વિતાયમાને પ્રમુદિતમિત્રજને સહૈવ ગોપાઃ ।
યદુજનમહિતાસ્ત્રિમાસમાત્રં ભવદનુષઙ્ગરસં પુરેવ ભેજુઃ ॥ ૮૪-૧૦॥

વ્યપગમસમયે સમેત્ય રાધાં દૃઢમુપગૂહ્ય નિરીક્ષ્ય વીતખેદામ્ ।
પ્રમુદિતહૃદયઃ પુરં પ્રયાતઃ પવનપુરેશ્વર પાહિ માં ગદેભ્યઃ ॥ ૧૧॥

ઇતિ ચતુરશીતિતમદશકં સમાપ્તં

## પઞ્ચાશીતિતમદશકમ્ (૮૫)

### જરાસન્ધવધં - શિશુપાલવધમ્ ।
### 85 - Slaying of Jarasandha And Shishupala

તતો મગધભૂમૃતા ચિરનિરોધસઙ્ક્લેશિતં
શતાષ્ટકયુતાયુતદ્વિતયમીશ ભૂમીભૃતામ્ ।
અનાથશરણાય તે કમપિ પૂરુષં પ્રાહિણો-
દયાચત સ માગધક્ષપણમેવ કિં ભૂયસા ॥ ૮૫-૧॥

યિયાસુરભિમાગધં તદનુ નારદોદીરિતા-
દ્યુધિષ્ઠિરમખોદ્યમાદુભયકાર્યપર્યાકુલઃ ।
વિરુદ્ધજયિનોઽધ્વરાદુભયસિદ્ધિરિત્યુદ્ધવે
શશંસુષિ નિજૈઃ સમં પુરમિયેથ યૌધિષ્ઠિરીમ્ ॥ ૮૫-૨॥

અશેષદયિતાયુતે ત્વયિ સમાગતે ધર્મજો

વિજિત્ય સહજૈર્મહીં ભવદપાઙ્ગસંવર્ધિતૈઃ ।
શ્રિયં નિરુપમાં વહન્નહહ ભક્તદાસાયિતં
ભવન્તમયિ માગધે પ્રહિતવાન્સભીમાર્જુનમ્ ॥ ૮૫-૩ ॥

ગિરિવ્રજપુરં ગતાસ્તદનુ દેવ યૂયં ત્રયો
યયાચ સમરોત્સવં દ્વિજમિષેણ તં માગધમ્ ।
અપૂર્ણસુકૃતં ત્વમું પવનજેન સઙ્ગ્રામયન્
નિરીક્ષ્ય સહ જિષ્ણુના ત્વમપિ રાજયુધ્વા સ્થિતઃ ॥ ૮૫-૪ ॥

અશાન્તસમરોદ્ધતં વિટપપાટનાસંજ્ઞયા
નિપાત્ય જરસસ્સુતં પવનજેન નિષ્પાટિતમ્ ।
વિમુચ્ય નૃપતીન્મુદા સમનુગૃહ્ય ભક્તિં પરાં
દિદેશિથ ગતસ્પૃહાનપિ ચ ધર્મગુપ્ત્યૈ ભુવઃ ॥ ૮૫-૫ ॥

પ્રચક્રુષિ યુધિષ્ઠિરે તદનુ રાજસૂયાધ્વરં
પ્રસન્નભૃતકીભવત્સકલરાજકવ્યાકુલમ્ ।
ત્વમપ્યયિ જગત્પતે દ્વિજપદાવનેજાદિકં
ચકર્થ કિમુ કથ્યતે નૃપવરસ્ય ભાગ્યોન્નતિઃ ॥ ૮૫-૬ ॥

તતસ્સવનકર્મણિ પ્રવરમગ્ર્યપૂજાવિધિં
વિચાર્ય સહદેવવાગનુગતસ્સ ધર્માત્મજઃ ।
વ્યધત્ત ભવતે મુદા સદસિ વિશ્વભૂતાત્મને
તદા સસુરમાનુષં ભુવનમેવ તૃપ્તિં દધૌ ॥ ૮૫-૭ ॥

તતસ્સપદિ ચેદિપો મુનિનૃપેષુ તિષ્ઠત્સ્વહો
સભાજયતિ કો જડઃ પશુપદુર્દુરૂટં વટુમ્ ।
ઇતિ ત્વયિ સ દુર્વચોવિતતિમુદ્વમન્નાસના-
દુદાપતદુદાયુધઃ સમપતન્નમું પાણ્ડવાઃ ॥ ૮૫-૮ ॥

નિવાર્ય નિજપક્ષગાનભિમુખસ્ય વિદ્વેષિણ-
સ્ત્વમેવ જહૃષે શિરો દનુજદારિણા સ્વારિણા ।
જનુસ્ત્રિતયલબ્ધયા સતતચિન્તયા શુદ્ધધી-
સ્ત્વયા સ પરમેકતામધૃત યોગિનાં દુર્લભામ્ ॥ ૮૫-૯ ॥

તતસ્સુમહિતો ત્વયા ક્રતુવરે નિરૂઢે જનો
યયૌ જયતિ ધર્મજો જયતિ કૃષ્ણ ઇત્યાલપન્ ।
ખલઃ સ તુ સુયોધનો ધુતમનાસ્સપત્નશ્રિયા

મયાર્પિતસભામુખે સ્થલજલભ્રમાદભ્રમીત્ ॥ ૮૫-૧૦॥

તદા હસિતમુત્થિતં દ્રુપદનન્દનાભીમયો-
રપાઙ્ગકલયા વિભો કિમપિ તાવદુજ્જૃમ્ભયન્ ।
ધરાભરનિરાકૃતૌ સપદિ નામ બીજં વપન્
જનાર્દન મરુત્પુરીનિલય પાહિ મામામયાત્ ॥ ૮૫-૧૧॥

ઇતિ પઞ્ચાશીતિતમદશકં સમાપ્તમ્ ।

## ષડશીતિતમદશકમ્ (૮૬)

સાલ્વવધમ્ - મહાભારતયુદ્ધમ્ ।
86 - Slaying of Salva - Battle of Mahabharata

સાલ્વો ભૈષ્મીવિવાહે યદુબલવિજિતશ્ચન્દ્રચૂડાદ્વિમાનં
વિન્દન્સૌભં સ માયી ત્વયિ વસતિ કુરુંસ્ત્વત્પુરીમભ્યભાઙ્ક્ષીત્ ।
પ્રદ્યુમ્નસ્તં નિરુન્ધન્નખિલયદુભટૈર્ન્યગ્રહીદુગ્રવીર્યં
તસ્યામાત્યં દ્યુમન્તં વ્યજનિ ચ સમરસ્સપ્તવિંશત્યહાન્તઃ ॥ ૮૬-૧॥

તાવત્ત્વં રામશાલી ત્વરિતમુપગતઃ ખણ્ડિતપ્રાયસૈન્યં
સૌભેશં તં ન્યરુન્ધાઃ સ ચ કિલ ગદયા શાર્ઙ્ગમભ્રંશયત્તે ।
માયાતાતં વ્યહિંસીદપિ તવ પુરતસ્તત્ત્વયાપિ ક્ષણાર્ધં
નાજ્ઞાયીત્યાહુરેકે તદિદમવમતં વ્યાસ એવ ન્યષેધીત્ ॥ ૮૬-૨॥

ક્ષિપ્ત્વા સૌભં ગદાચૂર્ણિતમુદકનિધૌ મઙ્ક્ષુ સાલ્વેઽપિ ચક્રે-
ણોત્કૃત્તે દન્તવક્ત્રઃ પ્રસભમભિપતન્નભ્યમુઞ્ચદ્ગદાં તે ।
કૌમોદક્યા હતોઽસાવપિ સુકૃતનિધિશ્ચૈદ્યવત્પ્રાપદૈક્યં
સર્વેષામેષ પૂર્વં ત્વયિ ધૃતમનસાં મોક્ષણાર્થોઽવતારઃ ॥ ૮૬-૩॥

ત્વય્યાયાતેઽથ જાતે કિલ કુરુસદસિ દ્યૂતકે સંયતાયાઃ
ક્રન્દન્ત્યા યાજ્ઞસેન્યાઃ સકરુણમકૃથાશ્ચેલમાલામનન્તામ્ ।
અન્નાન્તપ્રાપ્તશર્વાંશજમુનિચકિતદ્રૌપદી ચિન્તિતોઽથ
પ્રાપ્તશ્શાકાન્નમશ્નન્ મુનિગણમકૃથાસ્તૃપ્તિમન્તં વનાન્તે ॥ ૮૬-૪॥

યુદ્ધોદ્યોગેઽથ મન્ત્રે મિલતિ સતિ વૃતઃ ફલ્ગુનેન ત્વમેકઃ
કૌરવ્યે દત્તસૈન્યઃ કરિપુરમગમો દૂત્યકૃત્પાણ્ડવાર્થમ્ ।
ભીષ્મદ્રોણાદિમાન્યે તવ ખલુ વચને ધિક્કૃતે કૌરવેણ
વ્યાવૃણ્વન્વિશ્વરૂપં મુનિસદસિ પુરીં ક્ષોભયિત્વાઽઽગતોઽભૂઃ ॥ ૮૬-૫ ॥

જિષ્ણોસ્ત્વં કૃષ્ણ સૂતઃ ખલુ સમરમુખે બન્ધુઘાતે દયાલું
ખિન્નં તં વીક્ષ્ય વીરં કિમિદમયિ સખે નિત્ય એકોઽયમાત્મા ।
કો વધ્યઃ કોઽત્ર હન્તા તદિહ વધભિયં પ્રોજ્ઝ્ય મય્યર્પિતાત્મા
ધર્મ્યં યુદ્ધં ચરેતિ પ્રકૃતિમનયથા દર્શયન્વિશ્વરૂપમ્ ॥ ૮૬-૬ ॥

ભક્તોત્તંસેઽથ ભીષ્મે તવ ધરણિભરક્ષેપકૃત્યૈકસક્તે
નિત્યં નિત્યં વિભિન્દત્યયુતસમધિકં પ્રાપ્તસાદે ચ પાર્થે ।
નિશ્શસ્ત્રત્વપ્રતિજ્ઞાં વિજહદરિવરં ધારયન્ક્રોધશાલી-
વાધાવન્પ્રાઞ્જલિં તં નતશિરસમથો વીક્ષ્ય મોદાદપાગાઃ ॥ ૮૬-૭ ॥

યુદ્ધે દ્રોણસ્ય હસ્તિસ્થિરરણભગદત્તેરિતં વૈષ્ણવાસ્ત્રં
વક્ષસ્યાધત્ત ચક્રસ્થગિતરવિમહાઃ પ્રાર્દયન્સિન્ધુરાજમ્ ।
નાગાસ્ત્રે કર્ણમુક્તે ક્ષિતિમવનમયન્કેવલં કૃત્તમૌલિં
તત્રે તત્રાપિ પાર્થં કિમિવ ન હિ ભવાન્ પાણ્ડવાનામકાર્ષીત્ ॥ ૮૬-૮ ॥

યુદ્ધાદૌ તીર્થગામી સ ખલુ હલધરો નૈમિશક્ષેત્રમૃચ્છ-
ન્નપ્રત્યુત્થાયિસૂતક્ષયકૃદથ સુતં તત્પદે કલ્પયિત્વા ।
યજ્ઞઘ્નં બલ્વલં પર્વણિ પરિદલયન્ સ્નાતતીર્થો રણાન્તે
સમ્પ્રાપ્તો ભીમદુર્યોધનરણમશમં વીક્ષ્ય યાતઃ પુરીં તે ॥ ૮૬-૯ ॥

સંસુપ્તદ્રૌપદેયક્ષપણહતધિયં દ્રૌણિમેત્ય ત્વદુક્ત્યા
તન્મુક્તં બ્રાહ્મમસ્ત્રં સમહૃત વિજયો મૌલિરત્નં ચ જહ્રે ।
ઉચ્છિત્ત્યૈ પાણ્ડવાનાં પુનરપિ ચ વિશત્યુત્તરાગર્ભમસ્ત્રે
રક્ષન્નઙ્ગુષ્ઠમાત્રઃ કિલ જઠરમગાશ્ચક્રપાણિર્વિભો ત્વમ્ ॥ ૮૬-૧૦ ॥

ધર્મૌઘં ધર્મસૂનોરભિદધદખિલં છન્દમૃત્યુઃ સ ભીષ્મ-
સ્ત્વાં પશ્યન્ભક્તિભૂમ્નૈવ હિ સપદિ યયૌ નિષ્કલબ્રહ્મભૂયમ્ ।
સંયાજ્યાથાશ્વમેધૈસ્ત્રિભિરતિમહિતૈર્ધર્મજં પૂર્ણકામં
સમ્પ્રાપ્તો દ્વારકાં ત્વં પવનપુરપતે પાહિ માં સર્વરોગાત્ ॥ ૮૬-૧૧ ॥

ઇતિ ષડશીતિતમદશકં સમાપ્તમ્ ।

## સપ્તાશીતિતમદશકમ્ (૮૭)

### કુચેલોપાખ્યાનમ્ ।
### 87 - Kuchela Episode

કુચેલનામા ભવતઃ સતીર્થ્યતાં ગતઃ સ સાન્દીપનિમન્દિરે દ્વિજઃ ।
ત્વદેકરાગેણ ધનાદિનિઃસ્પૃહો દિનાનિ નિન્યે પ્રશમી ગૃહાશ્રમી ॥ ૮૭-૧॥

સમાનશીલાઽપિ તદીયવલ્લભા તથૈવ નો ચિત્તજયં સમેયુષી ।
કદાચિદૂચે બત વૃત્તિલબ્ધયે રમાપતિઃ કિં ન સખા નિષેવ્યતે ॥ ૮૭-૨॥

ઇતીરિતોઽયં પ્રિયયા ક્ષુધાર્તયા જુગુપ્સમાનોઽપિ ધને મદાવહે ।
તદા ત્વદાલોકનકૌતુકાદ્યયૌ વહન્પટાન્તે પૃથુકાનુપાયનમ્ ॥ ૮૭-૩॥

ગતોઽયમાશ્ચર્યમયીં ભવત્પૂરીં ગૃહેષુ શૈબ્યાભવનં સમેયિવાન્ ।
પ્રવિશ્ય વૈકુણ્ઠમિવાપ નિર્વૃતિં તવાતિસમ્ભાવનયા તુ કિં પુનઃ ॥ ૮૭-૪॥

પ્રપૂજિતં તં પ્રિયયા ચ વીજિતં કરે ગૃહીત્વાઽકથયઃ પુરા કૃતમ્ ।
યદિન્ધનાર્થં ગુરુદારચોદિતૈરપર્તુવર્ષં તદમર્ષિ કાનને ॥ ૮૭-૫॥

ત્રપાજુષોઽસ્માત્પૃથુકં બલાદથ પ્રગૃહ્ય મુષ્ટૌ સકૃદાશિતે ત્વયા ।
કૃતં કૃતં નન્વિયતેતિ સમ્ભ્રમાદ્રમા કિલોપેત્ય કરં રુરોધ તે ॥ ૮૭-૬॥

ભક્તેષુ ભક્તેન સ માનિતસ્ત્વયા પુરીં વસન્નેકનિશાં મહાસુખમ્ ।
બતાપરેદ્યુર્દ્રવિણં વિના યયૌ વિચિત્રરૂપસ્તવ ખલ્વનુગ્રહઃ ॥ ૮૭-૭॥

યદિ હ્યયાચિષ્યમદાસ્યદચ્યુતો વદામિ ભાર્યાં કિમિતિ વ્રજન્નસૌ ।
ત્વદુક્તિલીલાસ્મિતમગ્નધીઃ પુનઃ ક્રમાદપશ્યન્મણિદીપ્રમાલયમ્ ॥ ૮૭-૮॥

કિં માર્ગવિભ્રંશ ઇતિ ભ્રમન્ક્ષણં ગૃહં પ્રવિષ્ટઃ સ દદર્શ વલ્લભામ્ ।
સખીપરીતાં મણિહેમભૂષિતાં બુબોધ ચ ત્વત્કરુણાં મહાદ્ભુતામ્ ॥ ૮૭-૯॥

સ રત્નશાલાસુ વસન્નપિ સ્વયં સમુન્નમદ્ભક્તિભરોઽમૃતં યયૌ ।
ત્વમેવમાપૂરિતભક્તવાઞ્છિતો મરુત્પુરાધીશ હરસ્વ મે ગદાન્ ॥ ૮૭-૧૦॥

ઇતિ ષડશીતિતમદશકં સમાપ્તં

## સપ્તાશીતિતમદશકમ્ (૮૮)

સન્તાનગોપાલમ્ ।
88 - Episode of Santana Gopalam

પ્રાગેવાચાર્યપુત્રાહૃતિનિશમનયા સ્વીયષટ્સૂનુવીક્ષાં
કાઙ્ક્ષન્ત્યા માતુરુક્ત્યા સુતલભુવિ બલિં પ્રાપ્ય તેનાર્ચિતસ્ત્વમ્ ।
ધાતુશ્શાપાદ્ધિરણ્યાન્વિતકશિપુભવાન્શૌરિજાન્ કંસભગ્ના-
નાનીયૈનાન્ પ્રદર્શ્ય સ્વપદમનયથાઃ પૂર્વપુત્રાન્મરીચેઃ ॥ ૮૮-૧॥

શ્રુતદેવ ઇતિ શ્રુતં દ્વિજેન્દ્રં બહુલાશ્વં નૃપતિં ચ ભક્તિપૂર્ણમ્ ।
યુગપત્ત્વમનુગ્રહીતુકામો મિથિલાં પ્રાપિથ તાપસૈઃ સમેતઃ ॥ ૮૮-૨॥

ગચ્છન્દ્વિમૂર્તિરુભયોર્યુગપન્નિકેત-
મેકેન ભૂરિવિભવૈર્વિહિતોપચારઃ ।
અન્યેન તદ્દિનભૃતૈશ્ચ ફલૌદનાદ્યૈ-
સ્તુલ્યં પ્રસેદિથ દદાથ ચ મુક્તિમાભ્યામ્ ॥ ૮૮-૩॥

ભૂયોઽથ દ્વારવત્યાં દ્વિજતનયમૃતિં તત્પ્રલાપાનપિ ત્વં
કો વા દૈવં નિરુન્ધ્યાદિતિ કિલ કથયન્વિશ્વવોઢાઽપ્યસોઢાઃ ।
જિષ્ણોર્ગર્વં વિનેતું ત્વયિ મનુજધિયા કુણ્ઠિતાં ચાસ્ય બુદ્ધિં
તત્ત્વારૂઢાં વિધાતું પરમતમપદપ્રેક્ષણેનેતિ મન્યે ॥ ૮૮-૪॥

નષ્ટા અષ્ટાસ્ય પુત્રાઃ પુનરપિ તવ તૂપેક્ષયા કષ્ટવાદઃ
સ્પષ્ટો જાતો જનાનામથ તદવસરે દ્વારકામાપ પાર્થઃ ।
મૈત્ર્યા તત્રોષિતોઽસૌ નવમસુતમૃતૌ વિપ્રવર્યપ્રરોદં
શ્રુત્વા ચક્રે પ્રતિજ્ઞામનુપહૃતસુતસ્સન્નિવેક્ષ્યે કૃશાનુમ્ ॥ ૮૮-૫॥

માની સ ત્વામપૃષ્ટ્વા દ્વિજનિલયગતો બાણજાલૈર્મહાસ્ત્રૈ
રુન્ધાનઃ સૂતિગેહં પુનરપિ સહસા દૃષ્ટનષ્ટે કુમારે ।
યામ્યામૈન્દ્રીં તથાન્યાસ્સુરવરનગરીર્વિદ્યયાઽઽસાદ્ય સદ્યો

મોઘોદ્યોગઃ પતિષ્યન્હુતભુજિ ભવતા સસ્મિતં વારિતોઽભૂત્ ॥ ૮૮-૬॥

સાર્ધં તેન પ્રતીચીં દિશમતિજવિના સ્યન્દનેનાભિયાતો
લોકાલોકં વ્યતીતસ્તિમિરભરમથો ચક્રધામ્ના નિરુન્ધન્ ।
ચક્રાંશુક્લિષ્ટદૃષ્ટિં સ્થિતમથ વિજયં પશ્ય પશ્યેતિ વારાં
પારે ત્વં પ્રાદદર્શઃ કિમપિ હિ તમસાં દૂરદૂરં પદં તે ॥ ૮૮-૭॥

તત્રાસીનં ભુજઙ્ગાધિપશયનતલે દિવ્યભૂષાયુધાદ્યૈ-
રાવીતં પીતચેલં પ્રતિનવજલદશ્યામલં શ્રીમદઙ્ગમ્ ।
મૂર્તીનામીશિતારં પરમિહ તિસૃણામેકમર્થં શ્રુતીનાં
ત્વામેવ ત્વં પરાત્મન્ પ્રિયસખસહિતો નેમિથ ક્ષેમરૂપમ્ ॥ ૮૮-૮॥

યુવાં મામેવદ્વાવધિકવિવૃતાન્તર્હિતતયા
વિભિન્નૌ સુન્દ્રષ્ટું સ્વયમહમહાર્ષં દ્વિજસુતાન્ ।
નયેતં દ્રાગેનાનિતિ ખલુ વિતીર્ણાન્પુનરમૂન્
દ્વિજાયાદાયાદાઃ પ્રણુતમહિમા પાણ્ડુજનુષા ॥ ૮૮-૯॥

એવં નાનાવિહારૈર્જગદભિરમયન્વૃષ્ણિવંશં પ્રપુષ્ણ-
ન્નીજાનો યજ્ઞભેદૈરતુલવિહૃતિભિઃ પ્રીણયન્નેણનેત્રાઃ ।
ભૂભારક્ષેપદમ્ભાત્પદકમલજુષાં મોક્ષણાયાવતીર્ણઃ
પૂર્ણં બ્રહ્મૈવ સાક્ષાદ્યદુષુ મનુજતારૂષિતસ્ત્વં વ્યલાસીઃ ॥ ૮૮-૧૦॥

પ્રાયેણ દ્વારવત્યામવૃતદયિ તદા નારદસ્ત્વદ્રસાર્દ્ર-
સ્તસ્માલ્લેભે કદાચિત્ખલુ સુકૃતનિધિસ્ત્વત્પિતા તત્ત્વબોધમ્ ।
ભક્તાનામગ્રયાયી સ ચ ખલુ મતિમાનુદ્ધવસ્ત્વત્ત એવ
પ્રાપ્તો વિજ્ઞાનસારં સ કિલ જનહિતાયાધુનાઽસ્તે બદર્યામ્ ॥ ૮૮-૧૧॥

સોઽયં કૃષ્ણાવતારો જયતિ તવ વિભો યત્ર સૌહાર્દભીતિ-
સ્નેહદ્વેષાનુરાગપ્રભૃતિભિરતુલૈરશ્રમૈર્યોગભેદૈઃ ।
આર્તિં તીર્વા સમસ્તામમૃતપદમગુસ્સર્વતઃ સર્વલોકાઃ
સ ત્વં વિશ્વાર્તિશાન્ત્યૈ પવનપુરપતે ભક્તિપૂર્ત્યૈ ચ ભૂયાઃ ॥ ૮૮-૧૨॥

ઇતિ અષ્ટાશીતિતમદશકં સમાપ્તમ્ ।

# એકોનનવતિતમદશકમ્ (૮૯)

વૃકાસુરવધં - ભૃગુપરીક્ષણમ્ ।
89 - Slaying of Vrikasura - Test by Bhrigu

રમાજાને જાને યદિહ તવ ભક્તેષુ વિભવો
ન સદ્યઃ સમ્પદ્યસ્તદિહ મદકૃત્ત્વાદશમિનામ્ ।
પ્રશાન્તિં કૃત્વૈવ પ્રદિશસિ તતઃ કામમખિલં
પ્રશાન્તેષુ ક્ષિપ્રં ન ખલુ ભવદીયે ચ્યુતિકથા ॥ ૮૯-૧॥

સદ્યઃપ્રસાદરુષિતાન્વિધિશઙ્કરાદીન્
કેચિદ્વિભો નિજગુણાનુગુણં ભજન્તઃ ।
ભ્રષ્ટા ભવન્તિ બત કષ્ટમદીર્ઘદૃષ્ટ્યા
સ્પષ્ટં વૃકાસર ઉદાહરણં કિલાસ્મિન્ ॥ ૮૯-૨॥

શકુનિજઃ સ તુ નારદમેકદા ત્વરિતતોષમપૃચ્છદધીશ્વરમ્ ।
સ ચ દિદેશ ગિરીશમુપાસિતું ન તુ ભવન્તમબન્ધુમસાધુષુ ॥ ૮૯-૩॥

તપસ્તપ્ત્વા ઘોરં સ ખલુ કુપિતઃ સપ્તમદિને
શિરશ્છિત્ત્વા સદ્યઃ પુરહરમુપસ્થાપ્ય પુરતઃ ।
અતિક્ષુદ્રં રૌદ્રં શિરસિ કરદાનેન નિધનં
જગન્નાથાદ્વવ્રે ભવતિ વિમુખાનાં ક્વ શુભધીઃ ॥ ૮૯-૪॥

મોક્તારં બન્ધમુક્તો હરિણપતિરિવ પ્રાદ્રવત્સોઽથ રુદ્રં
દૈત્યાદ્ભીત્યા સ્મ દેવો દિશિ દિશિ વલતે પૃષ્ઠતો દત્તદૃષ્ટિઃ ।
તૂષ્ણીકે સર્વલોકે તવ પદમધિરોક્ષ્યન્તમુદ્વીક્ષ્ય શર્વં
દૂરાદેવાગ્રતસ્ત્વં પટુવટુવપુષા તસ્થિષે દાનવાય ॥ ૮૯-૫॥

ભદ્રં તે શાકુનેય ભ્રમસિ કિમધુના ત્વં પિશાચસ્ય વાચા
સન્દેહશ્ચેન્મદુક્તૌ તવ કિમુ ન કરોષ્યઙ્ગુલીમઙ્ગ મૌલૌ ।
ઇત્થં ત્વદ્વાક્યમૂઢઃ શિરસિ કૃતકરઃ સોઽપતચ્છિન્નપાતં
ભ્રંશો હ્યેવં પરોપાસિતુરપિ ચ ગતિઃ શૂલિનોઽપિ ત્વમેવ ॥ ૮૯-૬॥

ભૃગું કિલ સરસ્વતીનિકટવાસિનસ્તાપસા-
સ્ત્રિમુર્તિષુ સમાદિશન્નધિકસત્ત્વતાં વેદિતુમ્ ।

અયં પુનરનાદરાદુદિતરુદ્ધરોષે વિધૌ
હરેઽપિ ચ જિહિંસિષૌ ગિરિજયા ધૃતે ત્વામગાત્ ॥ ૮૯-૭॥

સુપ્તં રમાઙ્કભુવિ પઙ્કજલોચનં ત્વાં
વિપ્રે વિનિઘ્નતિ પદેન મુદોત્થિતસ્ત્વમ્ ।
સર્વં ક્ષમસ્વ મુનિવર્ય ભવેત્સદા મે
ત્વત્પાદચિહ્નમિહ ભૂષણમિત્યવાદીઃ ॥ ૮૯-૮॥

નિશ્ચિત્ય તે ચ સુદૃઢં ત્વયિ બદ્ધભાવાઃ
સારસ્વતા મુનિવરા દધિરે વિમોક્ષમ્ ।
ત્વામેવમચ્યુત પુનશ્ચ્યુતિદોષહીનં
સત્ત્વોચ્ચયૈકતનુમેવ વયં ભજામઃ ॥ ૮૯-૯॥

જગત્સૃષ્ટ્યાદૌ ત્વાં નિગમનિવહૈર્વન્દિભિરિવ
સ્તુતં વિષ્ણો સચ્ચિત્પરમરસનિર્દ્વૈતવપુષમ્ ।
પરાત્માનં ભૂમન્ પશુપવનિતાભાગ્યનિવહં
પરીતપશ્રાન્ત્યૈ પવનપુરવાસિન્ પરિભજે ॥ ૮૯-૧૦॥

ઇતિ એકોનનવતિતમદશકં સમાપ્તં

## નવતિતમદશકમ્ (૯૦)

### વિષ્ણુમહત્ત્વસ્થાપનમ્ ।
### 90 - Establishment of Greatness of Vishnu

વૃકભૃગુમુનિમોહિન્યમ્બરીષાદિવૃત્તે-
ષ્વયિ તવ હિ મહત્ત્વં સર્વશર્વાદિજૈત્રમ્ ।
સ્થિતમિહ પરમાત્મન્ નિષ્કલાર્વાગભિન્નં
કિમપિ યદવભાતં તદ્ધિ રૂપં તવૈવ ॥ ૯૦-૧॥

મૂર્તિત્રયેશ્વરસદાશિવપઞ્ચકં યત્
પ્રાહુઃ પરાત્મવપુરેવ સદાશિવોઽસ્મિન્ ।
તત્રેશ્વરસ્તુ સ વિકુણ્ઠપદસ્ત્વમેવ

ત્રિત્વં પુનર્ભજસિ સત્યપદે ત્રિભાગે ॥ ૯૦-૨॥

તત્રાપિ સાત્ત્વિકતનું તવ વિષ્ણુમાહુ-
ર્ધાતા તુ સત્ત્વવિરલો રજસૈવ પૂર્ણઃ ।
સત્વોત્કટત્વમપિ ચાસ્તિ તમોવિકાર-
ચેષ્ટાદિકં ચ તવ શઙ્કરનામ્નિ મૂર્તૌ ॥ ૯૦-૩॥

તં ચ ત્રિમૂર્ત્યતિગતં પુરપૂરુષં ત્વાં
શર્વાત્મનાપિ ખલુ સર્વમયત્વહેતોઃ ।
શંસન્ત્યુપાસનાવિધૌ તદપિ સ્વતસ્તુ
ત્વદ્રૂપમિત્યતિદૃઢં બહુ નઃ પ્રમાણમ્ ॥ ૯૦-૪॥

શ્રીશઙ્કરોઽપિ ભગવાન્સકલેષુ તાવત્
ત્વામેવ માનયતિ યો ન હિ પક્ષપાતી ।
ત્વન્નિષ્ઠમેવ સ હિ નામસહસ્રકાદિ
વ્યાખ્યદ્ભવત્સ્તુતિપરશ્ચ ગતિં ગતોઽન્તે ॥ ૯૦-૫॥

મૂર્તિત્રયાતિગમુવાચ ચ મન્ત્રશાસ્ત્ર-
સ્યાદૌ કલાયસુષમં સકલેશ્વરં ત્વામ્ ।
ધ્યાનં ચ નિષ્કલમસૌ પ્રણવે ખલૂક્ત્વા
ત્વામેવ તત્ર સકલં નિજગાદ નાન્યમ્ ॥ ૯૦-૬॥

સમસ્તસારે ચ પુરાણસઙ્ગ્રહે વિસંશયં ત્વન્મહિમૈવ વર્ણ્યતે ।
ત્રિમૂર્તિયુક્સત્યપદત્રિભાગતઃ પરં પદં તે કથિતં ન શૂલિનઃ ॥ ૯૦-૭॥

યદ્બ્રાહ્મકલ્પ ઇહ ભાગવતદ્વિતીય-
સ્કન્ધોદિતં વપુરનાવૃતમીશ ધાત્રે ।
તસ્યૈવ નામ હરિશર્વમુખં જગાદ
શ્રીમાધવઃ શિવપરોઽપિ પુરાણસારે ॥ ૯૦-૮॥

યે સ્વપ્રકૃત્યનુગુણા ગિરિશં ભજન્તે
તેષાં ફલં હિ દૃઢયૈવ તદીયભક્ત્યા ।
વ્યાસો હિ તેન કૃતવાનધિકારિહેતોઃ
સ્કાન્દાદિકેષુ તવ હાનિવચોઽર્થવાદૈઃ ॥ ૯૦-૯॥

ભૂતાર્થકીર્તિરનુવાદવિરુદ્ધવાદૌ
ત્રેધાર્થવાદગતયઃ ખલુ રોચનાર્થાઃ ।

સ્કાન્દાદિકેષુ બહવોઽત્ર વિરુદ્ધવાદા-
સ્ત્વત્તામસત્વપરિભૂત્યુપશિક્ષણાદ્યાઃ ॥ ૯૦-૧૦॥

યત્કિઞ્ચિદપ્યવિદુષાપિ વિભો મયોક્તં
તન્મન્ત્રશાસ્ત્રવચનાદ્યભિદૃષ્ટમેવ ।
વ્યાસોક્તિસારમયભાગવતોપગીત
ક્લેશાન્વિધૂય કુરુ ભક્તિભરં પરાત્મન્ ॥ ૯૦-૧૧॥

ઇતિ નવતિતમદશકં સમાપ્તમ્ ।
ઇતિ દશમસ્કન્ધં સમાપ્તમ્ ।

એકાદશસ્કન્ધમ્ ।

## એકનવતિતમદશકમ્ (૯૧)

### ભક્તિમહત્ત્વમ્ ।
### 91 - Greatness of Devotion

શ્રીકૃષ્ણ ત્વત્પદોપાસનમભયતમં બદ્ધમિથ્યાર્થદૃષ્ટે-
ર્મર્ત્યસ્યાર્તસ્ય મન્યે વ્યપસરતિ ભયં યેન સર્વાત્મનૈવ ।
યત્તાવત્ત્વત્પ્રણીતાનિહ ભજનવિધીનાસ્થિતો મોહમાર્ગે
ધાવન્નપ્યાવૃતાક્ષઃ સ્ખલતિ ન કુહચિદ્દેવદેવાખિલાત્મન્ ॥ ૯૧-૧॥

ભૂમન્ કાયેન વાચા મુહુરપિ મનસા ત્વદ્બલપ્રેરિતાત્મા
યદ્યત્કુર્વે સમસ્તં તદિહ પરતરે ત્વય્યસાવર્પયામિ ।
જાત્યાપીહ શ્વપાકસ્ત્વયિ નિહિતમનઃ કર્મવાગિન્દ્રિયાર્થ-
પ્રાણો વિશ્વં પુનીતે ન તુ વિમુખમનાસ્ત્વત્પદાદ્વિપ્રવર્યઃ ॥ ૯૧-૨॥

ભીતિર્નામ દ્વિતીયાદ્ભવતિ નનુ મનઃકલ્પિતં ચ દ્વિતીયં
તેનૈક્યાભ્યાસશીલો હૃદયમિહ યથાશક્તિ બુદ્ધ્યા નિરુન્ધ્યામ્ ।
માયાવિદ્ધે તુ તસ્મિન્પુનરપિ ન તથા ભાતિ માયાધિનાથં
તં ત્વાં ભક્ત્યા મહત્યા સતતમનુભજન્નીશ ભીતિં વિજહ્યામ્ ॥ ૯૧-૩॥

ભક્તેરુત્પત્તિવૃદ્ધી તવ ચરણજુષં સઙ્ગમેનૈવ પુંસા-

માસાદ્યે પુણ્યભાજાં શ્રિય ઇવ જગતિ શ્રીમતાં સઙ્ગમેન ।
તત્સઙ્ગો દેવ ભૂયાન્મમ ખલુ સતતં તન્મુખાદુન્મિષદ્ભિ-
સ્ત્વન્માહાત્મ્યપ્રકારૈર્ભવતિ ચ સુદૃઢા ભક્તિરુદ્ધૂતપાપા ॥ ૯૧-૪॥

શ્રેયોમાર્ગેષુ ભક્તાવધિકબહુમતિર્જન્મકર્માણિ ભૂયો
ગાયન્ક્ષેમાણિ નામાન્યપિ તદુભયતઃ પ્રદ્રુતં પ્રદ્રુતાત્મા ।
ઉદ્યદ્ધાસઃ કદચિત્કુહાચિદપિ રુદન્ક્વાપિ ગર્જન્પ્રગાય-
ન્નુન્માદીવ પ્રનૃત્યન્નયિ કુરુ કરુણાં લોકબાહ્યશ્ચરેયમ્ ॥ ૯૧-૫॥

ભૂતાન્યેતાનિ ભૂતાત્મકમપિ સકલં પક્ષિમત્સ્યાન્મૃગાદીન્
મર્ત્યાન્મિત્રાણિ શત્રૂનપિ યમિતમતિસ્ત્વન્મયાન્યાનમાનિ ।
ત્વત્સેવાયાં હિ સિધ્યેન્મમ તવ કૃપયા ભક્તિદાર્ઢ્યં વિરાગ-
સ્ત્વત્તત્ત્વસ્યાવબોધોઽપિ ચ ભુવનપતે યત્નભેદં વિનૈવ ॥ ૯૧-૬॥

નો મુહ્યન્ક્ષુત્તૃડાદ્યૈર્ભવસરણિભવૈસ્ત્વન્નિલીનાશયત્વા-
ચ્ચિન્તાસાતત્યશાલી નિમિષલવમપિ ત્વત્પદાદપ્રકમ્પઃ ।
ઇષ્ટાનિષ્ટેષુ તુષ્ટિવ્યસનવિરહિતો માયિકત્વાવબોધા-
જ્જ્યોત્સ્નાભિસ્ત્વન્નખેન્દોરધિકશિશિરિતેનાત્મના સઞ્ચરેયમ્ ॥ ૯૧-૭॥

ભૂતેષ્વેષુ ત્વદૈક્યસ્મૃતિસમધિગતૌ નાધિકારોઽધુના ચેત્
ત્વત્પ્રેમ ત્વત્કમૈત્રી જડમતિષુ કૃપા દ્વિટ્સુ ભૂયાદુપેક્ષા ।
અર્ચાયાં વા સમર્ચાકુતુકમુરુતરશ્રદ્ધયા વર્ધતાં મે
ત્વત્સંસેવી તથાપિ દ્રુતમુપલભતે ભક્તલોકોત્તમત્વમ્ ॥ ૯૧-૮॥

આવૃત્ય ત્વત્સ્વરૂપં ક્ષિતિજલમરુદાદ્યાત્મના વિક્ષિપન્તી
જીવાન્ભૂયિષ્ઠકર્માવલિવિવશગતીન્ દુઃખજાલે ક્ષિપન્તી ।
ત્વન્માયા માભિભૂયાન્મયિ ભુવનપતે કલ્પતે તત્પ્રશાન્ત્યૈ
ત્વત્પાદે ભક્તિરેવેત્યવદદયિ વિભો સિદ્ધયોગી પ્રબુદ્ધઃ ॥ ૯૧-૯॥

દુઃખાન્યાલોક્ય જન્તુષ્વલમુદિતવિવેકોઽહમાચાર્યવર્યા-
લ્લબ્ધ્વા ત્વદ્રૂપતત્ત્વં ગુણચરિતકથાદ્યુદ્ભવદ્ભક્તિભૂમા ।
માયામેનાં તરિત્વા પરમસુખમયે ત્વત્પદે મોદિતાહે
તસ્યાયં પૂર્વરઙ્ગઃ પવનપુરપતે નાશયાશેષરોગાન્ ॥ ૯૧-૧૦॥

ઇતિ એકનવતિતમદશકં સમાપ્તમ્ ।

# દ્વિનવતિતમદશકમ્ (૯૨)

## કર્મમિશ્રભક્તિઃ ।
## 92 - Bhakti Combined With Karma

વૈદૈસ્સર્વાણિ કર્માણ્યફલપરતયા વર્ણિતાનીતિ બુદ્ધ્વા
તાનિ ત્વય્યર્પિતાન્યેવ હિ સમનુચરન્ યાનિ નૈષ્કર્મ્યમીશ ।
મા ભૂદ્વેદૈર્નિષિદ્ધે કુહચિદપિ મનઃકર્મવાચાં પ્રવૃત્તિ-
ર્દુર્વર્જઞ્ચેદવાપ્તં તદપિ ખલુ ભવત્યર્પયે ચિત્પ્રકાશે ॥ ૯૨-૧॥

યસ્ત્વન્યઃ કર્મયોગસ્તવ ભજનમયસ્તત્ર ચાભીષ્ટમૂર્તિં
હૃદ્યાં સત્ત્વૈકરૂપાં દૃષદિ હૃદિ મૃદિ ક્વાપિ વા ભાવયિત્વા ।
પુષ્પૈર્ગન્ધૈર્નિવેદ્યૈરપિ ચ વિરચિતૈઃ શક્તિતો ભક્તિપૂતૈ-
ર્નિત્યં વર્યાં સપર્યાં વિદધદયિ વિભો ત્વત્પ્રસાદં ભજેયમ્ ॥ ૯૨-૨॥

સ્ત્રીશૂદ્રાસ્ત્વત્કથાદિશ્રવણવિરહિતા આસતાં તે દયાર્હા-
સ્ત્વત્પાદાસન્નયાતાન્દ્વિજકુલજનુષો હન્ત શોચામ્યશાન્તાન્ ।
વૃત્ત્યર્થં તે યજન્તો બહુકથિતમપિ ત્વામનાકર્ણયન્તો
દૃપ્તા વિદ્યાભિજાત્યૈઃ કિમુ ન વિદધતે તાદૃશં મા કૃથા મામ્ ॥ ૯૨-૩॥

પપોઽયં કૃષ્ણરામેત્યભિલપતિ નિજં ગૂહિતું દુશ્ચારિત્રં
નિર્લજ્જસ્યાસ્ય વાચા બહુતરકથનીયાનિ મે વિઘ્નિતાનિ ।
ભ્રાતા મે વન્ધ્યશીલો ભજતિ કિલ સદા વિષ્ણુમિત્થં બુધાંસ્તે
નિન્દન્ત્યુચ્ચૈર્હસન્તિ ત્વયિ નિહિતરતીંસ્તાદૃશં મા કૃથા મામ્ ॥ ૯૨-૪॥

શ્વેતચ્છાયં કૃતે ત્વાં મુનિવરવપુષં પ્રીણયન્તે તપોભિ-
સ્ત્રેતાયાં સ્રુક્સ્રુવાદ્યઙ્કિતમરુણતનું યજ્ઞરૂપં યજન્તે ।
સેવન્તે તન્ત્રમાર્ગૈર્વિલસદરિગદં દ્વાપરે શ્યામલાઙ્ગં
નીલં સઙ્કીર્તનાદ્યૈરિહ કલિસમયે માનુષાસ્ત્વાં ભજન્તે ॥ ૯૨-૫॥

સોઽયં કાલેયકાલો જયતિ મુરરિપો યત્ર સઙ્કીર્તનાદ્યૈ-
ર્નિર્યત્નૈરેવ માર્ગૈરખિલદ નચિરાત્ત્વત્પ્રસાદં ભજન્તે ।
જાતાસ્ત્રેતાકૃતાદાવપિ હિ કિલ કલૌ સમ્ભવં કામયન્તે
દૈવાત્તત્રૈવ જાતાન્વિષયવિષરસૈર્મા વિભો વઞ્ચયાસ્માન્ ॥ ૯૨-૬॥

ભક્તાસ્તાવત્કલૌ સ્યુર્દ્રમિલભુવિ તતો ભૂરિશસ્તત્ર ચોચ્ચૈઃ
કાવેરીં તામ્રપર્ણીમનુ કિલ કૃતમાલાઞ્ચ પુણ્યાં પ્રતીચીમ્ ।
હા મામપ્યેતદન્તર્ભવમપિ ચ વિભો કિઞ્ચિદઞ્ચિદ્રસં ત્વ-
ય્યાશાપાશૈર્નિબધ્ય ભ્રમય ન ભગવન્ પૂરય ત્વન્નિષેવામ્ ॥ ૯૨-૭॥

દૃષ્ટ્વા ધર્મદ્રુહં તં કલિમપકરુણં પ્રાઙ્મહીક્ષિત્પરીક્ષિ-
દ્ધન્તું વ્યાકૃષ્ટખડ્ગોઽપિ ન વિનિહતવાન્ સારવેદી ગુણાંશાત્ ।
ત્વત્સેવાદ્યાશુ સિધ્યેદસદિહ ન તથા ત્વત્પરે ચૈષ ભીરુ-
ર્યત્તુ પ્રાગેવ રોગાદિભિરપહરતે તત્ર હા શિક્ષયૈનમ્ ॥ ૯૨-૮॥

ગઙ્ગા ગીતા ચ ગાયત્ર્યપિ ચ તુલસિકા ગોપિકાચન્દનં તત્
સાલગ્રામાભિપૂજા પરપુરુષ તથૈકાદશી નામવર્ણાઃ ।
એતાન્યષ્ટાપ્યયત્નાન્યયિ કલિસમયે ત્વત્પ્રસાદપ્રવૃદ્ધ્યા
ક્ષિપ્રં મુક્તિપ્રદાનીત્યભિદધુરૃષયસ્તેષુ માં સજ્જયેથાઃ ॥ ૯૨-૯॥

દેવર્ષીણાં પિતૃણામપિ ન પુનરૃણી કિઙ્ગરો વા સ ભૂમન્
યોઽસૌ સર્વાત્મના ત્વાં શરણમુપગતઃ સર્વકૃત્યાનિ હિત્વા ।
તસ્યોત્પન્નં વિકર્માપ્યખિલમપનુદસ્યેવ ચિત્તસ્થિતસ્ત્વં
તન્મે પાપોત્થતાપાન્પવનપુરપતે રુન્ધિ ભક્તિં પ્રણીયાઃ ॥ ૯૨-૧૦॥

ઇતિ દ્વિનવતિતમદશકં સમાપ્તં

## ત્રિનવતિતમદશકમ્ (૯૩)

### પઞ્ચવિંશતિ ગુરવઃ ।
### 93 - Lessons from 25 Gurus

બન્ધુસ્નેહં વિજહ્યાં તવ હિ કરુણયા ત્વય્યુપાવેશિતાત્મા
સર્વં ત્યક્ત્વા ચરેયં સકલમપિ જગદ્વીક્ષ્ય માયાવિલાસમ્ ।
નાનાત્વાદ્ભ્રાન્તિજન્યાત્સતિ ખલુ ગુણદોષાવબોધે વિધિર્વા
વ્યાસેધો વા કથં તૌ ત્વયિ નિહિતમતેર્વીતવૈષમ્યબુદ્ધેઃ ॥ ૯૩-૧॥

ક્ષુત્તૃષ્ણાલોપમાત્રે સતતકૃતધિયો જન્તવસ્સન્ત્યનન્તા-
સ્તેભ્યો વિજ્ઞાનવત્ત્વાત્પુરુષ ઇહ વરસ્તજ્જનિર્દુર્લભૈવ ।
તત્રાપ્યાત્માઽઽત્મનઃ સ્યાત્સુહૃદપિ ચ રિપુર્યસ્ત્વયિ ન્યસ્તચેતા-
સ્તાપોચ્છિત્તેરુપાયં સ્મરતિ સ હિ સુહૃત્સ્વાત્મવૈરી તતોઽન્યઃ ॥ ૯૩-૨ ॥

ત્વત્કારુણ્યે પ્રવૃત્તે ક ઇવ ન હિ ગુરુર્લોકવૃત્તેઽપિ ભૂમન્
સર્વાક્રાન્તાપિ ભૂમિર્ન હિ ચલતિ તતઃ સત્ક્ષમાં શિક્ષયેયમ્ ।
ગૃહ્ણીયામીશ તત્તદ્વિષયપરિચયેઽપ્યપ્રસક્તિં સમીરા-
દ્વ્યાપ્તત્વઞ્ચાત્મનો મે ગગનગુરુવશાદ્ભાતુ નિર્લેપતા ચ ॥ ૯૩-૩ ॥

સ્વચ્છઃ સ્યાં પાવનોઽહં મધુર ઉદકવદ્વહ્નિવન્મા સ્મ ગૃહ્ણાં
સર્વાન્નીનોઽપિ દોષં તરુષુ તમિવ માં સર્વભૂતેષ્વવેયામ્ ।
પુષ્ટિર્નષ્ટિઃ કલાનાં શશિન ઇવ તનોર્નાત્મનોઽસ્તીતિ વિદ્યાં
તોયાદિવ્યસ્તમાર્તાણ્ડવદપિ ચ તનુષ્વેકતાં ત્વત્પ્રસાદાત્ ॥ ૯૩-૪ ॥

સ્નેહાદ્વ્યાધાસ્તપુત્રપ્રણયમૃતકપોતાયિતો મા સ્મ ભૂવં
પ્રાપ્તં પ્રાશ્નન્સહેય ક્ષુધમપિ શયુવત્સિન્ધુવત્સ્યામગાધઃ ।
મા પપ્તં યોષિદાદૌ શિખિનિ શલભવદ્ભૃઙ્ગવત્સારભાગી
ભૂયાસં કિન્તુ તદ્વદ્ધનચયનવશાન્માહમીશ પ્રણેશમ્ ॥ ૯૩-૫ ॥

મા બધ્યાસં તરુણ્યા ગજ ઇવ વશયા નાર્જયેયં ધનૌઘં
હર્તાન્યસ્તં હિ માધ્વીહર ઇવ મૃગવન્મા મુહં ગ્રામ્યગીતૈઃ ।
નાત્યાસજ્જેય ભોજ્યે ઝષ ઇવ બડિશે પિઙ્ગલાવન્નિરાશઃ
સુપ્યાં ભર્તવ્યયોગાત્કુરર ઇવ વિભો સામિષોઽન્યૈર્ન હન્યૈ ॥ ૯૩-૬ ॥

વર્તેય ત્યક્તમાનઃ સુખમતિશિશુવન્નિસ્સહાયશ્ચરેયં
કન્યાયા એકશેષો વલય ઇવ વિભો વર્જિતાન્યોન્યઘોષઃ ।
ત્વચ્ચિત્તો નાવબુધ્યૈ પરમિષુકૃદિવ ક્ષ્માભૃદાયાનઘોષં
ગેહેષ્વન્યપ્રણીતેષ્વહિરિવ નિવસાન્યુન્દુરોર્મન્દિરેષુ ॥ ૯૩-૭ ॥

ત્વય્યેવ ત્વત્કૃતં ત્વં ક્ષપયસિ જગદિત્યૂર્ણનાભાત્પ્રતીયાં
ત્વચ્ચિન્તા ત્વત્સ્વરૂપં કુરુત ઇતિ દૃઢં શિક્ષેયે પેશકારાત્ ।
વિડ્ભસ્માત્મા ચ દેહિ ભવતિ ગુરુવરો યો વિવેકં વિરક્તિં
ધત્તે સઞ્ચિન્ત્યમાનો મમ તુ બહુરુજાપીડિતોઽયં વિશેષાત્ ॥ ૯૩-૮ ॥

હી હી મે દેહમોહં ત્યજ પવનપુરાધીશ યત્પ્રેમહેતો-
ર્ગેહે વિત્તે કલત્રાદિષુ ચ વિવશિતાસ્ત્વત્પદં વિસ્મરન્તિ ।

સોઽયં વહ્નેઃ શુનો વા પરમિહ પરતઃ સામ્પ્રતઞ્ચાક્ષિકર્ણ-
ત્વગ્જિહ્વાદ્યા વિકર્ષન્ત્યવશમત ઇતઃ કોઽપિ ન ત્વત્પદાબ્જે ॥ ૯૩-૯॥

દુર્વારો દેહમોહો યદિ પુનરધુના તર્હિ નિશ્શેષરોગાન્
હૃત્વા ભક્તિં દ્રઢિષ્ઠાં કુરુ તવ પદપઙ્કેરુહે પઙ્કજાક્ષ ।
નૂનં નાનાભવાન્તે સમધિગતમિમં મુક્તિદં વિપ્રદેહં
ક્ષુદ્રે હા હન્ત મા મા ક્ષિપ વિષયરસે પાહિ માં મારુતેશ ॥ ૯૩-૧૦॥

ઇતિ ત્રિનવતિતમદશકં સમાપ્તમ્ ।

## ચતુર્નવતિતમદશકમ્ (૯૪)

### તત્ત્વજ્ઞાનોત્પત્તિઃ ।
### 94 - Means of Enlightenment

શુદ્ધા નિષ્કામધર્મૈઃ પ્રવરગુરુગિરા તત્સ્વરૂપં પરં તે
શુદ્ધં દેહેન્દ્રિયાદિવ્યપગતમખિલવ્યાપ્તમાવેદયન્તે ।
નાનાત્વસ્થૌલ્યકાર્શ્યાદિ તુ ગુણજવપુસ્સઙ્ગતોઽધ્યાસિતં તે
વહ્નેર્દારુપ્રભેદેષ્વિવ મહદણુતાદીપ્તતાશાન્તતાદિ ॥ ૯૪-૧॥

આચાર્યાખ્યાધરસ્થારણિસમનુમિલચ્છિષ્યરૂપોત્તરાર-
ણ્યાવેધોદ્ભાસિતેન સ્ફુટતરપરિબોધાગ્નિના દહ્યમાને ।
કર્માલીવાસનાતત્કૃતતનુભુવનભ્રાન્તિકાન્તારપૂરે
દાહ્યાભાવેન વિદ્યાશિખિનિ ચ વિરતે ત્વન્મયી ખલ્વવસ્થા ॥ ૯૪-૨॥

એવં ત્વત્પ્રાપ્તિતોઽન્યો નહિ ખલુ નિખિલક્લેશહાનેરુપાયો
નૈકાન્તાત્યન્તિકાસ્તે કૃષિવદગદષાડ્ગુણ્યષટ્કર્મયોગાઃ ।
દુર્વૈકલ્યૈરકલ્યા અપિ નિગમપથાસ્તત્ફલાન્યપ્યવાપ્તા
મત્તાસ્ત્વાં વિસ્મરન્તઃ પ્રસજતિ પતને યાન્ત્યનન્તાન્વિષાદાન્ ॥ ૯૪-૩॥

ત્વલ્લોકાદન્યલોકઃ ક્વનુ ભયરહિતો યત્પરાર્ધદ્વયાન્તે
ત્વદ્ભીતસ્સત્યલોકેઽપિ ન સુખવસતિઃ પદ્મભૂઃ પદ્મનાભ ।
એવમ્ભાવે ત્વધર્માર્જિતબહુતમસાં કા કથા નારકાણાં

તન્મે ત્વં છિન્ધિ બન્ધં વરદ કૃપણબન્ધો કૃપાપૂરસિન્ધો ॥ ૯૪-૪॥

યાથાર્થ્યાત્ત્વન્મયસ્યૈવ હિ મમ ન વિભો વસ્તુતો બન્ધમોક્ષૌ
માયાવિદ્યાતનુભ્યાં તવ તુ વિરચિતૌ સ્વપ્નબોધોપમૌ તૌ ।
બદ્ધે જીવદ્વિમુક્તિં ગતવતિ ચ ભિદા તાવતી તાવદેકો
ભુઙ્ક્તે દેહદ્રુમસ્થો વિષયફલરસાન્નાપરો નિર્વ્યથાત્મા ॥ ૯૪-૫॥

જીવન્મુક્તત્વમેવંવિધમિતિ વચસા કિં ફલં દૂરદૂરે
તન્નામાશુદ્ધબુદ્ધેર્ન ચ લઘુ મનસઃ શોધનં ભક્તિતોઽન્યત્ ।
તન્મે વિષ્ણો કૃષીષ્ઠાસ્ત્વયિ કૃતસકલપ્રાર્પણં ભક્તિભારં
યેન સ્યાં મઙ્ક્ષુ કિઞ્ચિદ્ગુરુવચનમિલત્ત્વત્પ્રબોધસ્ત્વદાત્મા ॥ ૯૪-૬॥

શબ્દબ્રહ્મણ્યપીહ પ્રયતિતમનસસ્ત્વાં ન જાનન્તિ કેચિત્
કષ્ટં વન્ધ્યશ્રમાસ્તે ચિરતરમિહ ગાં બિભ્રતે નિષ્પ્રસૂતિમ્ ।
યસ્યાં વિશ્વાભિરામાસ્સસકલમલાહરા દિવ્યલીલાવતારાઃ
સચ્ચિત્સાન્દ્રં ચ રૂપં તવ ન નિગદિતં તાં ન વાચં ભ્રિયાસમ્ ॥ ૯૪-૭॥

યો યાવાન્યાદૃશો વા ત્વમિતિ કિમપિ નૈવાવગચ્છામિ ભૂમ-
ન્નેવઞ્ચાનન્યભાવસ્ત્વદનુભજનમેવાદ્રિયે ચૈદ્યવૈરિન્ ।
ત્વલ્લિઙ્ગાનાં ત્વદઙ્ઘ્રિપ્રિયજનસદસાં દર્શનસ્પર્શનાદિ-
ર્ભૂયાન્મે ત્વત્પ્રપૂજાનતિનુતિગુણકર્માનુકીર્ત્યાદરોઽપિ ॥ ૯૪-૮॥

યદ્યલ્લભ્યેત તત્તત્તવ સમુપહૃતં દેવ દાસોઽસ્મિ તેઽહં
ત્વદ્ગેહોન્માર્જનાદ્યં ભવતુ મમ મુહુઃ કર્મ નિર્માયમેવ ।
સૂર્યાગ્નિબ્રાહ્મણાત્માદિષુ લસિતચતુર્બાહુમારાધયે ત્વાં
ત્વત્પ્રેમાર્દ્રત્વરૂપો મમ સતતમભિષ્યન્દતાં ભક્તિયોગઃ ॥ ૯૪-૯॥

ઐક્યં તે દાનોહોમવ્રતનિયમતપસ્સાઙ્ખ્યયોગૈર્દુરાપં
ત્વત્સઙ્ગેનૈવ ગોપ્યઃ કિલ સુકૃતિતમાઃ પ્રાપુરાનન્દસાન્દ્રમ્ ।
ભક્તેષ્વન્યેષુ ભૂયસ્સ્વપિ બહુમનુષે ભક્તિમેવ ત્વમાસાં
તન્મે ત્વદ્ભક્તિમેવ દૃઢય હર ગદાન્કૃષ્ણ વાતાલયેશ ॥ ૯૪-૧૦॥

ઇતિ ચતુર્નવતિતમદશકં સમાપ્તમ્ ।

# પઞ્ચનવતિતમદશકમ્ (૯૫)

## ધ્યાનયોગઃ - મોક્ષપ્રાપ્તિમાર્ગઃ
## 95 - Yoga of Meditation - Means of Liberation

આદૌ હૈરણ્યગર્ભીં તનુમવિકલજીવાત્મિકામાસ્થિતસ્ત્વં
જીવત્વં પ્રાપ્ય માયાગુણગણખચિતો વર્તસે વિશ્વયોને ।
તત્રોદ્વૃદ્ધેન સત્ત્વેન તુ ગણયુગલં ભક્તિભાવં ગતેન-
છિત્વા સત્ત્વં ચ હિત્વા પુનરનુપહિતો વર્તિતાહે ત્વમેવ ॥ ૯૫-૧॥

સત્ત્વોન્મેષાત્કદાચિત્ખલુ વિષયરસે દોષબોધેઽપિ ભૂમન્
ભૂયોઽપ્યેષુ પ્રવૃત્તિઃ સતમસિ રજસિ પ્રોદ્ધતે દુર્નિવારા ।
ચિત્તં તાવદ્ગુણાશ્ચ ગ્રથિતમિહ મિથસ્તાનિ સર્વાણિ રોદ્ધું
તુર્યે ત્વય્યેકભક્તિઃ શરણમિતિ ભવાન્હંસરૂપી ન્યગાદીત્ ॥ ૯૫-૨॥

સન્તિ શ્રેયાંસિ ભૂયાંસ્યપિ રુચિભિદયા કર્મિણાં નિર્મિતાનિ
ક્ષુદ્રાનન્દાશ્ચ સાન્તા બહુવિધગતયઃ કૃષ્ણ તેભ્યો ભવેયુઃ ।
ત્વઞ્ચાચખ્યાથ સખ્યે નનુ મહિતતમાં શ્રેયસાં ભક્તિમેકાં
ત્વદ્ભક્ત્યાનન્દતુલ્યઃ ખલુ વિષયજુષાં સમ્મદઃ કેન વા સ્યાત્ ॥ ૯૫-૩॥

ત્વદ્ભક્ત્યા તુષ્ટબુદ્ધેઃ સુખમિહ ચરતો વિચ્યુતાશસ્ય ચાશાઃ
સર્વાસ્સ્યુઃ સૌખ્યમય્યઃ સલિલકુહરગસ્યેવ તોયૈકમય્યઃ ।
સોઽયં ખલ્વિન્દ્રલોકં કમલજભવનં યોગસિદ્ધીશ્ચ હૃદ્યા
નાકાઙ્ક્ષત્યેતદાસ્તાં સ્વયમનુપતિતે મોક્ષસૌખ્યેઽપ્યનીહઃ ॥ ૯૫-૪॥

ત્વદ્ભક્તો બાધ્યમાનોઽપિ ચ વિષયરસૈરિન્દ્રિયાશાન્તિહેતો-
ર્ભક્ત્યૈવાક્રમ્યમાણૈઃ પુનરપિ ખલુ તૈર્દુર્બલૈર્નાભિજય્યઃ ।
સપ્તાર્ચિર્દીપિતાર્ચિર્દહતિ કિલ યથા ભૂરિદારુપ્રપઞ્ચં
ત્વદ્ભક્ત્યૌઘે તથૈવ પ્રદહતિ દુરિતં દુર્મદઃ ક્વેન્દ્રિયાણામ્ ॥ ૯૫-૫॥

ચિત્તાર્દ્રીભાવમુચ્ચૈર્વપુષિ ચ પુલકં હર્ષબાષ્પઞ્ચ હિત્વા
ચિત્તં શુદ્ધ્યેત્કથં વા કિમુ બહુતપસા વિદ્યયા વીતભક્તેઃ ।
ત્વદ્ગાથાસ્વાદસિદ્ધાઞ્જનસતતમરીમૃજ્યમાનોઽયમાત્મા
ચક્ષુર્વત્તત્ત્વસૂક્ષ્મં ભજતિ ન તુ તથાભ્યસ્તયા તર્કકોટ્યા ॥ ૯૫-૬॥

ધ્યાનં તે શીલયેયં સમતનુસુખબદ્ધાસનો નાસિકાગ્ર-
ન્યસ્તાક્ષઃ પૂરકાદ્યૈર્જિતપવનપથશ્ચિત્તપદ્મન્ત્વવાઞ્ચમ્ ।
ઊર્ધ્વાગ્રં ભાવયિત્વા રવિવિધુશિખિનસ્સંવિચિન્ત્યોપરિષ્ટાત્
તત્રસ્થં ભાવયે ત્વાં સજલજલધરશ્યામલં કોમલાઙ્ગમ્ ॥ ૯૫-૭॥

આનીલશ્લક્ષ્ણકેશં જ્વલિતમકરસત્કુણ્ડલં મન્દહાસ-
સ્યન્દાર્દ્રં કૌસ્તુભશ્રીપરિગતવનમાલોરુહારાભિરામમ્ ।
શ્રીવત્સાઙ્કં સુબાહું મૃદુલસદુદરં કાઞ્ચનચ્છાયચેલં
ચારુસ્નિગ્ધોરુમમ્ભોરુહલલિતપદં ભાવયેઽહં ભવન્તમ્ ॥ ૯૫-૮॥

સર્વાઙ્ગેષ્વઙ્ગ રઙ્ગત્કુતુકમતિમુહુર્ધારયન્નીશ ચિત્તં
તત્રાપ્યેકત્ર યુઞ્જે વદનસરસિજે સુન્દરે મન્દહાસે ।
તત્રાલીનન્તુ ચેતઃ પરમસુખચિદદ્વૈતરૂપે વિતન્વ-
ન્નન્યન્નો ચિન્તયેયં મુહુરિતિ સમુપારૂઢયોગો ભવેયમ્ ॥ ૯૫-૯॥

ઇત્થં ત્વદ્ધ્યાનયોગે સતિ પુનરણિમાદ્યષ્ટસંસિદ્ધયસ્તા
દૂરશ્રુત્યાદયોઽપિ હ્યહમહમિકયા સમ્પતેયુર્મુરારે ।
ત્વત્સમ્પ્રાપ્તૌ વિલમ્બાવહમખિલમિદં નાદ્રિયે કામયેઽહં
ત્વામેવાનન્દપૂર્ણં પવનપુરપતે પાહિ માં સર્વતાપાત્ ॥ ૯૫-૧૦॥

ઇતિ પઞ્ચનવતિતમદશકં સમાપ્તમ્ ।

## ષણ્ણવતિતમદશકમ્ (૯૬)

ભગવદ્વિભૂતયઃ તથા જ્ઞાનકર્મભક્તિયોગાઃ ।
96 - Glories of the Lord and JnAna-Karma-Bhakti Yogas

ત્વં હિ બ્રહ્મૈવ સાક્ષાત્ પરમુરુમહિમન્નક્ષરાણામકાર-
સ્તારો મન્ત્રેષુ રાજ્ઞાં મનુરસિ મુનિષુ ત્વં ભૃગુર્નારદોઽપિ ।
પ્રહ્લાદો દાનવાનાં પશુષુ ચ સુરભિઃ પક્ષિણાં વૈનતેયો
નાગાનામસ્યનન્તઃ સુરસરિદપિ ચ સ્રોતસાં વિશ્વમૂર્તે ॥ ૯૬-૧॥

બ્રહ્મણ્યાનાં બલિસ્ત્વં ક્રતુષુ ચ જપયજ્ઞોઽસિ વીરેષુ પાર્થો

ભક્તાનામુદ્ધવસ્ત્વં બલમસિ બલિનાં ધામ તેજસ્વિનાં ત્વમ્ ।
નાસ્ત્યન્તસ્ત્વદ્વિભૂતેર્વિકસદતિશયં વસ્તુ સર્વં ત્વમેવ
ત્વં જીવસ્ત્વં પ્રધાનં યદિહ ભવદૃતે તન્ન કિઞ્ચિત્પ્રપઞ્ચે ॥ ૯૬-૨॥

ધર્મં વર્ણાશ્રમાણાં શ્રુતિપથવિહિતં ત્વત્પરત્વેન ભક્ત્યા
કુર્વન્તોઽન્તર્વિરાગે વિકસતિ શનકૈસ્સન્ત્યજન્તો લભન્તે ।
સત્તાસ્ફૂર્તિપ્રિયત્વાત્મકમખિલપદાર્થેષુ ભિન્નેષ્વભિન્નં
નિર્મૂલં વિશ્વમૂલં પરમમહમિતિ ત્વદ્વિબોધં વિશુદ્ધમ્ ॥ ૯૬-૩॥

જ્ઞાનં કર્માપિ ભક્તિસ્ત્રિતયમિહ ભવત્પ્રાપકં તત્ર તાવ-
ન્નિર્વિણ્ણાનામશેષે વિષય ઇહ ભવેત્ જ્ઞાનયોગેઽધિકારઃ ।
સક્તાનાં કર્મયોગસ્ત્વયિ હિ વિનિહિતો યે તુ નાત્યન્તસક્તા
નાપ્યત્યન્તં વિરક્તાસ્ત્વયિ ચ ધૃતરસા ભક્તિયોગો હ્યમીષામ્ ॥ ૯૬-૪॥

જ્ઞાનં ત્વદ્ભક્તતાં વા લઘુ સુકૃતવશાન્મર્ત્યલોકે લભન્તે
તસ્માત્તત્રૈવ જન્મ સ્પૃહયતિ ભગવન્ નાકગો નારકો વા ।
આવિષ્ટં માં તુ દૈવાદ્ભવજલનિધિપોતાયિતે મર્ત્યદેહે
ત્વં કૃત્વા કર્ણધારં ગુરુમનુગુણવાતાયિતસ્તારયેથાઃ ॥ ૯૬-૫॥

અવ્યક્તં માર્ગયન્તઃ શ્રુતિભિરપિ નયૈઃ કેવલજ્ઞાનલુબ્ધાઃ
ક્લિશ્યન્તેઽતીવ સિદ્ધિં બહુતરજનુષામન્ત એવાપ્નુવન્તિ ।
દૂરસ્થઃ કર્મયોગોઽપિ ચ પરમફલે નન્વયં ભક્તિયોગ-
સ્ત્વામૂલાદેવ હૃદ્યસ્ત્વરિતમયિ ભવત્પ્રાપકો વર્ધતાં મે ॥ ૯૬-૬॥

જ્ઞાનાયૈવાતિયત્નં મુનિરપવદતે બ્રહ્મતત્ત્વં તુ શ્રૃણ્વન્
ગાઢં ત્વત્પાદભક્તિં શરણમયતિ યસ્તસ્ય મુક્તિઃ કરાગ્રે ।
ત્વદ્ધ્યાનેઽપીહ તુલ્યા પુનરસુકરતા ચિત્તચાઞ્ચલ્યહેતો-
રભ્યાસાદાશુ શક્યં તદપિ વશયિતું ત્વત્કૃપાચારુતાભ્યામ્ ॥ ૯૬-૭॥

નિર્વિણ્ણઃ કર્મમાર્ગે ખલુ વિષમતમે ત્વત્કથાદૌ ચ ગાઢં
જાતશ્રદ્ધોઽપિ કામાનયિ ભુવનપતે નૈવ શક્નોમિ હાતુમ્ ।
તદ્ભૂયો નિશ્ચયેન ત્વયિ નિહિતમના દોષબુદ્ધ્યા ભજંસ્તાન્
પુષ્ણીયાં ભક્તિમેવ ત્વયિ હૃદયગતે મઙ્ક્ષુ નઙ્ક્ષ્યન્તિ સઙ્ગાઃ ॥ ૯૬-૮॥

કશ્ચિત્ક્લેશાર્જિતાર્થક્ષયવિમલમતિર્નુદ્યમાનો જનૌઘૈઃ
પ્રાગેવં પ્રાહ વિપ્રો ન ખલુ મમ જનઃ કાલકર્મગ્રહા વા ।
ચેતો મે દુઃખહેતુસ્તદિહ ગુણગણં ભાવયત્સર્વકારી-

ત્યુક્ત્વા શાન્તો ગતસ્ત્વાં મમ ચ કુરુ વિભો તાદૃશીં ચિત્તશાન્તિમ્ ॥ ૯૬-૯ ॥

ઐલઃ પ્રાગુર્વશીં પ્રત્યતિવિવશમનાઃ સેવમાનશ્ચિરં તાં
ગાઢં નિર્વિદ્ય ભૂયો યુવતિસુખમિદં ક્ષુદ્રમેવેતિ ગાયન્ ।
ત્વદ્ભક્તિં પ્રાપ્ય પૂર્ણઃ સુખતરમચરત્તદ્વદુદ્ધૂય સઙ્ગં
ભક્તોત્તંસં ક્રિયા માં પવનપુરપતે હન્ત મે રુન્ધિરોગાન્ ॥ ૯૬-૧૦ ॥

ઇતિ ષણ્ણવતિતમદશકં સમાપ્તં

## સપ્તનવતિતમદશકમ્ (૯૭)

ઉત્તમભક્તિપ્રાર્થના ।
97 - Prayer For Supreme Devotion

ત્રૈગુણ્યાદ્ભિન્નરૂપં ભવતિ હિ ભુવને હીનમધ્યોત્તમં યત્-
જ્ઞાનં શ્રદ્ધા ચ કર્તા વસતિરપિ સુખં કર્મ ચાહારભેદાઃ ।
ત્વત્ક્ષેત્રત્વન્નિષેવાદિ તુ યદિહ પુનસ્ત્વત્પરં તત્તુ સર્વં
પ્રાહુર્નૈર્ગુણ્યનિષ્ઠં તદનુભજનતો મઙ્ક્ષુ સિદ્ધો ભવેયમ્ ॥ ૯૭-૧ ॥

ત્વય્યેવ ન્યસ્તચિત્તઃ સુખમયિ વિચરન્સર્વચેષ્ટાસ્ત્વદર્થં
ત્વદ્ભક્તૈસ્સેવ્યમાનાનપિ ચરિતચરાનાશ્રયન્ પુણ્યદેશાન્ ।
દસ્યૌ વિપ્રે મૃગાદિષ્વપિ ચ સમમતિર્મુચ્યમાનાવમાન-
સ્પર્ધાસૂયાદિદોષઃ સતતમખિલભૂતેષુ સમ્પૂજયે ત્વામ્ ॥ ૯૭-૨ ॥

ત્વદ્ભાવો યાવદેષુ સ્ફુરતિ ન વિશદં તાવદેવં હ્યુપાસ્તિં
કુર્વન્નૈકાત્મ્યબોધે ઝટિતિ વિકસતિ ત્વન્મયોઽહં ચરેયમ્ ।
ત્વદ્ધર્મસ્યાસ્ય તાવત્કિમપિ ન ભગવન્ પ્રસ્તુતસ્ય પ્રણાશ-
સ્તસ્માત્સર્વાત્મનૈવ પ્રદિશ મમ વિભો ભક્તિમાર્ગં મનોજ્ઞમ્ ॥ ૯૭-૩ ॥

તઞ્ચૈનં ભક્તિયોગં દ્રઢયિતુમયિ મે સાધ્યમારોગ્યમાયુ-
ર્દિષ્ટ્યા તત્રાપિ સેવ્યં તવ ચરણમહો ભેષજાયેવ દુગ્ધમ્ ।
માર્કણ્ડેયો હિ પૂર્વં ગણકનિગદિતદ્વાદશાબ્દાયુરુચ્ચૈઃ
સેવિત્વા વત્સરં ત્વાં તવ ભટનિવહૈર્દ્રાવયામાસ મૃત્યુમ્ ॥ ૯૭-૪ ॥

માર્કણ્ડેયશ્ચિરાયુસ્સ ખલુ પુનરપિ ત્વત્પરઃ પુષ્પભદ્રા-
તીરે નિન્યે તપસ્યન્નતુલસુખરતિઃ ષટ્ તુ મન્વન્તરાણિ ।
દેવેન્દ્રસ્સપ્તમસ્તં સુરયુવતિમરુન્મન્મથૈર્મોહયિષ્યન્
યોગોષ્મપ્લુષ્યમાણૈર્ન તુ પુનરશકત્ત્વજ્જનં નિર્જયેત્કઃ ॥ ૯૭-૫॥

પ્રીત્યા નારાયણાખ્યસ્ત્વમથ નરસખઃ પ્રાપ્તવાનસ્ય પાર્શ્વં
તુષ્ટ્યા તોષ્ટૂયમાનઃ સ તુ વિવિધવરૈર્લોભિતો નાનુમેને ।
દ્રષ્ટું માયાં ત્વદીયાં કિલ પુનરવૃણોદ્ભક્તિતૃપ્તાન્તરાત્મા
માયાદુઃખાનભિજ્ઞસ્તદપિ મૃગયતે નૂનમાશ્ચર્યહેતોઃ ॥ ૯૭-૬॥

યાતે ત્વય્યાશુ વાતાકુલજલદગલત્તોયપૂર્ણાતિઘૂર્ણ-
ત્સપ્તાર્ણોરાશિમગ્ને જગતિ સ તુ જલે સમ્ભ્રમન્વર્ષકોટીઃ ।
દીનઃ પ્રૈક્ષિષ્ટ દૂરે વટદલશયનં કઞ્ચિદાશ્ચર્યબાલં
ત્વામેવ શ્યામલાઙ્ગં વદનસરસિજન્યસ્તપાદાઙ્ગુલીકમ્ ॥ ૯૭-૭॥

દૃષ્ટ્વા ત્વાં હૃષ્ટરોમા ત્વરિતમભિગતઃ સ્પ્રષ્ટુકામો મુનીન્દ્રઃ
શ્વાસેનાન્તર્નિવિષ્ટઃ પુનરિહ સકલં દૃષ્ટવાન્ વિષ્ટપૌઘમ્ ।
ભૂયોઽપિ શ્વાસવાતૈર્બહિરનુપતિતો વીક્ષિતસ્ત્વત્કટાક્ષૈ-
ર્મોદાદાશ્લેષ્ટુકામસ્ત્વયિ પિહિતતનૌ સ્વાશ્રમે પ્રાગ્વદાસીત્ ॥ ૯૭-૮॥

ગૌર્યા સાર્ધં તદગ્રે પુરભિદથ ગતસ્ત્વત્પ્રિયપ્રેક્ષણાર્થી
સિદ્ધાનેવાસ્ય દત્ત્વા સ્વયમયમજરામૃત્યુતાદીન્ ગતોઽભૂત્ ।
એવં ત્વત્સેવયૈવ સ્મરરિપુરપિ સ પ્રીયતે યેન તસ્મા-
ન્મૂર્તિત્રય્યાત્મકસ્ત્વં નનુ સકલનિયન્તેતિ સુવ્યક્તમાસીત્ ॥ ૯૭-૯॥

ત્ર્યંશેઽસ્મિન્સત્યલોકે વિધિહરિપુરભિન્મન્દિરાણ્યૂર્ધ્વમૂર્ધ્વં
તેભ્યોઽપ્યૂર્ધ્વં તુ માયાવિકૃતિવિરહિતો ભાતિ વૈકુણ્ઠલોકઃ ।
તત્ર ત્વં કારણામ્ભસ્યપિ પશુપકુલે શુદ્ધસત્ત્વૈકરૂપી
સચ્ચિદ્બ્રહ્માદ્વયાત્મા પવનપુરપતે પાહિ માં સર્વરોગાત્ ॥ ૯૭-૧૦॥

ઇતિ સપ્તનવતિતમદશકં સમાપ્તમ્ ।

ઇતિ એકાદશસ્કન્ધં સમાપ્તમ્ ।

દ્વાદશસ્કન્ધમ્ ।

# અષ્ટનવતિતમદશકમ્ (૯૮)

## નિષ્કલબ્રહ્મોપાસનમ્ ।
## 98 - Meditation On Nirguna Brahman

યસ્મિન્નેતદ્વિભાતં યત ઇદમભવદ્યેન ચેદં ય એત-
દ્યોઽસ્માદુત્તીર્ણરૂપઃ ખલુ સકલમિદં ભાસિતં યસ્ય ભાસા ।
યો વાચાં દૂરદૂરે પુનરપિ મનસાં યસ્ય દેવા મુનીન્દ્રા
નો વિદ્યુસ્તત્ત્વરૂપં કિમુ પુનરપરે કૃષ્ણ તસ્મૈ નમસ્તે ॥ ૯૮-૧॥

જન્માથો કર્મ નામ સ્ફુટમિહ ગુણદોષાદિકં વા ન યસ્મિન્
લોકાનામૂતેય યઃ સ્વયમનુભજતે તાનિ માયાનુસારી ।
બિભ્રચ્છક્તીરરૂપોઽપિ ચ બહુતરરૂપોઽવભાત્યદ્ભુતાત્મા
તસ્મૈ કૈવલ્યધામ્ને પરરસપરિપૂર્ણાય વિષ્ણો નમસ્તે ॥ ૯૮-૨॥

નો તિર્યઞ્ચન્ન મર્ત્યં ન ચ સુરમસુરં ન સ્ત્રિયં નો પુમાંસં
ન દ્રવ્યં કર્મ જાતિં ગુણમપિ સદસદ્વાપિ તે રૂપમાહુઃ ।
શિષ્ટં યત્સ્યાન્નિષેધે સતિ નિગમશતૈર્લક્ષણાવૃત્તિતસ્તત્
કૃચ્છ્રેણાવેદ્યમાનં પરમસુખમયં ભાતિ તસ્મૈ નમસ્તે ॥ ૯૮-૩॥

માયાયાં બિમ્બિતસ્ત્વં સૃજસિ મહદહઙ્કારતન્માત્રભેદૈ-
ર્ભૂતગ્રામેન્દ્રિયાદ્યૈરપિ સકલજગત્સ્વપ્નસઙ્કલ્પકલ્પમ્ ।
ભૂયઃ સંહૃત્ય સર્વં કમઠ ઇવ પદાન્યાત્મના કાલશક્ત્યા
ગમ્ભીરે જાયમાને તમસિ વિતિમિરો ભાસિ તસ્મૈ નમસ્તે ॥ ૯૮-૪॥

શબ્દબ્રહ્મેતિ કર્મેત્યણુરિતિ ભગવન્ કાલ ઇત્યાલપન્તિ
ત્વામેકં વિશ્વહેતું સકલમયતયા સર્વથા કલ્પ્યમાનમ્ ।
વેદાન્તૈર્યત્તુ ગીતં પુરુષપરચિદાત્માભિધં તત્તુ તત્ત્વં
પ્રેક્ષામાત્રેણ મૂલપ્રકૃતિવિકૃતિકૃત્કૃષ્ણ તસ્મૈ નમસ્તે ॥ ૯૮-૫॥

સત્ત્વેનાસત્તયા વા ન ચ ખલુ સદસત્ત્વેન નિર્વાચ્યરૂપા
ધત્તે યાસાવવિદ્યા ગુણફણિમતિવદ્વિશ્વદૃશ્યાવભાસમ્ ।
વિદ્યાત્વં સૈવ યાતા શ્રુતિવચનલવૈર્યત્કૃપાસ્યન્દલાભે
સંસારારણ્યસદ્યસ્ત્રુટનપરશુતામેતિ તસ્મૈ નમસ્તે ॥ ૯૮-૬॥

ભૂષાસુ સ્વર્ણવદ્વા જગતિ ઘટશરાવાદિકે મૃત્તિકાવત્
તત્ત્વે સઞ્ચિન્ત્યમાને સ્ફુરતિ તદધુનાપ્યદ્વિતીયં વપુસ્તે ।
સ્વપ્નદ્રષ્ટુઃ પ્રબોધે તિમિરલયવિધૌ જીર્ણરજ્જોશ્ચ યદ્વદ્-
વિદ્યાલાભે તથૈવ સ્ફુટમપિ વિકસેત્કૃષ્ણ તસ્મૈ નમસ્તે ॥ ૯૮-૭॥

યદ્ભીત્યોદેતિ સૂર્યો દહતિ ચ દહનો વાતિ વાયુસ્તથાન્યે
યદ્ભીતાઃ પદ્મજાદ્યાઃ પુનરુચિતબલીનાહરન્તેઽનુકાલમ્ ।
યેનૈવારોપિતાઃ પ્રાઙ્નિજપદમપિ તે ચ્યાવિતારશ્ચ પશ્ચાત્
તસ્મૈ વિશ્વં નિયન્ત્રે વયમપિ ભવતે કૃષ્ણ કુર્મઃ પ્રણામમ્ ॥ ૯૮-૮॥

ત્રૈલોક્યં ભાવયન્તં ત્રિગુણમયમિદં ત્ર્યક્ષરસ્યૈકવાચ્યં
ત્રીશાનામૈક્યરૂપં ત્રિભિરપિ નિગમૈર્ગીયમાનસ્વરૂપમ્ ।
તિસ્રોઽવસ્થા વિદન્તં ત્રિયુગજનિજુષં ત્રિક્રમાક્રાન્તવિશ્વં
ત્રૈકાલ્યે ભેદહીનં ત્રિભિરહમનિશં યોગભેદૈર્ભજે ત્વામ્ ॥ ૯૮-૯॥

સત્યં શુદ્ધં વિબુદ્ધં જયતિ તવ વપુર્નિત્યમુક્તં નિરીહં
નિર્દ્વન્દ્વં નિર્વિકારં નિખિલગુણગણવ્યઞ્જનાધારભૂતમ્ ।
નિર્મૂલં નિર્મલં તન્નિરવધિમહિમોલ્લાસિ નિર્લીનમન્ત-
ર્નિસ્સઙ્ગાનાં મુનીનાં નિરુપમપરમાનન્દસાન્દ્રપ્રકાશમ્ ॥ ૯૮-૧૦॥

દુર્વારં દ્વાદશારં ત્રિશતપરિમિલત્ષષ્ટિપર્વાભિવીતં
સમ્ભ્રામ્યત્ક્રૂરવેગં ક્ષણમનુ જગદાચ્છિદ્ય સન્ધાવમાનમ્ ।
ચક્રં તે કાલરૂપં વ્યથયતુ ન તુ માં ત્વત્પદૈકાવલમ્બં
વિષ્ણો કારુણ્યસિન્ધો પવનપુરપતે પાહિ સર્વામયૌઘાત્ ॥ ૯૮-૧૧॥

ઇતિ અષ્ટનવતિતમદશકં સમાપ્તં

## નવનવતિતમદશકમ્ (૯૯)

વેદમન્ત્રમૂલાત્મકા વિષ્ણુસ્તુતિઃ ।
99 - Praise of the Glory of the Lord

વિષ્ણોર્વીર્યાણિ કો વા કથયતુ ધરણેઃ કશ્ચ રેણૂન્મિમીતે

યસ્યૈવાઙ્ઘ્રિત્રયેણ ત્રિજગદભિમિતં મોદતે પૂર્ણસમ્પત્ ।
યોઽસૌ વિશ્વાનિ ધત્તે પ્રિયમિહ પરમં ધામ તસ્યાભિયાયાં
તદ્ભક્તા યત્ર માદ્યન્ત્યમૃતરસમરન્દસ્ય યત્ર પ્રવાહઃ ॥ ૯૯-૧॥

આદ્યાયાશેષકર્ત્રે પ્રતિનિમિષનવીનાય ભર્ત્રે વિભૂતે-
ર્ભક્તાત્મા વિષ્ણવે યઃ પ્રદિશતિ હવિરાદીનિ યજ્ઞાર્ચનાદૌ ।
કૃષ્ણાદ્યં જન્મ યો વા મહદિહ મહતો વર્ણયેત્સોઽયમેવ
પ્રીતઃ પૂર્ણો યશોભિસ્ત્વરિતમભિસરેત્પ્રાપ્યમન્તે પદં તે ॥ ૯૯-૨॥

હે સ્તોતારઃ કવીન્દ્રાસ્તમિહ ખલુ યથા ચેતયદ્ધ્વે તથૈવ
વ્યક્તં વેદસ્ય સારં પ્રણુવત જનનોપાત્તલીલાકથાભિઃ ।
જાનન્તશ્ચાસ્ય નામાન્યખિલસુખકરાણીતિ સઙ્કીર્તયધ્વં
હે વિષ્ણો કીર્તનાદ્યૈસ્તવ ખલુ મહતસ્તત્ત્વબોધં ભજેયમ્ ॥ ૯૯-૩॥

વિષ્ણોઃ કર્માણિ સમ્પશ્યત મનસિ સદા યૈઃ સ ધર્માનબધ્ના-
દ્યાનીન્દ્રસ્યૈષ ભૃત્યઃ પ્રિયસખ ઇવ ચ વ્યાતનોત્ક્ષેમકારી ।
વીક્ષન્તે યોગસિદ્ધાઃ પરપદમનિશં યસ્ય સમ્યક્પ્રકાશં
વિપ્રેન્દ્રા જાગરૂકાઃ કૃતબહુનુતયો યચ્ચ નિર્ભાસયન્તે ॥ ૯૯-૪॥

નો જાતો જાયમાનોઽપિ ચ સમધિગતસ્ત્વન્મહિમ્નોઽવસાનં
દેવ શ્રેયાંસિ વિદ્વાન્પ્રતિમુહુરપિ તે નામ શંસામિ વિષ્ણો ।
તં ત્વાં સંસ્તૌમિ નાનાવિધનુતિવચનૈરસ્ય લોકત્રયસ્યા-
પ્યૂર્ધ્વં વિભ્રાજમાને વિરચિતવસતિં તત્ર વૈકુણ્ઠલોકે ॥ ૯૯-૫॥

આપઃ સૃષ્ટ્યાદિજન્યાઃ પ્રથમમયિ વિભો ગર્ભદેશે દધુસ્ત્વાં
યત્ર ત્વય્યેવ જીવા જલશયન હરે સઙ્ગતા ઐક્યમાપન્ ।
તસ્યાજસ્ય પ્રભો તે વિનિહિતમભવત્પદ્મમેકં હિ નાભૌ
દિક્પત્રં યત્કિલાહુઃ કનકધરણિભૃત્ કર્ણિકં લોકરૂપમ્ ॥ ૯૯-૬॥

હે લોકા વિષ્ણુરેતદ્ભુવનમજનયત્તન્ન જાનીથ યૂયં
યુષ્માકં હ્યન્તરસ્થં કિમપિ તદપરં વિદ્યતે વિષ્ણુરૂપમ્ ।
નીહારપ્રખ્યમાયાપરિવૃતમનસો મોહિતા નામરૂપૈઃ
પ્રાણપ્રીત્યૈકતૃપ્તાશ્ચરથ મખપરા હન્ત નેચ્છા મુકુન્દે ॥ ૯૯-૭॥

મૂર્ધ્નામક્ષ્ણાં પદાનાં વહસિ ખલુ સહસ્રાણિ સમ્પૂર્ય વિશ્વં
તત્પ્રોત્ક્રમ્યાપિ તિષ્ઠન્પરિમિતવિવરે ભાસિ ચિત્તાન્તરેઽપિ ।
ભૂતં ભવ્યં ચ સર્વં પરપુરુષ ભવાન્ કિઞ્ચ દેહેન્દ્રિયાદિ-

ષ્વાવિષ્ટોઽપ્યુદ્ધતત્વાદમૃતસુખરસં ચાનુભુઙ્ક્ષે ત્વમેવ ॥ ૯૯-૮॥

યત્તુ ત્રૈલોક્યરૂપં દધદપિ ચ તતો નિર્ગતોઽનન્તશુદ્ધ-
જ્ઞાનાત્મા વર્તસે ત્વં તવ ખલુ મહિમા સોઽપિ તાવાન્કિમન્યત્ ।
સ્તોકસ્તે ભાગ એવાખિલભુવનતયા દૃશ્યતે ત્ર્યંશકલ્પં
ભૂયિષ્ઠં સાન્દ્રમોદાત્મકમુપરિ તતો ભાતિ તસ્મૈ નમસ્તે ॥ ૯૯-૯॥

અવ્યક્તં તે સ્વરૂપં દુરધિગમતમં તત્તુ શુદ્ધૈકસત્ત્વં
વ્યક્તઞ્ચાપ્યેતદેવ સ્ફુટમમૃતરસામ્ભોધિકલ્લોલતુલ્યમ્ ।
સર્વોત્કૃષ્ટામભીષ્ટાં તદિહ ગુણરસેનૈવ ચિત્તં હરન્તીં
મૂર્તિં તે સંશ્રયેઽહં પવનપુરપતે પાહિ માં કૃષ્ણ રોગાત્ ॥ ૯૯-૧૦॥

ઇતિ નવનવતિતમદશકં સમાપ્તમ્ ।

## શતતમદશકમ્ (૧૦૦)

ભગવતઃ કેશાદિપાદવર્ણનમ્ ।
100 - Description of the Vision of the Lord

અગ્રે પશ્યામિ તેજો નિબિડતરકલાયાવલીલોભનીયં
પીયૂષાપ્લાવિતોઽહં તદનુ તદુદરે દિવ્યકૈશોરવેષમ્ ।
તારુણ્યારમ્ભરમ્યં પરમસુખરસાસ્વાદરોમાઞ્ચિતાઙ્ગૈ-
રાવીતં નારદાદ્યૈર્વિલસદુપનિષત્સુન્દરીમણ્ડલૈશ્ચ ॥ ૧૦૦-૧॥

નીલાભં કુઞ્ચિતાગ્રં ઘનમમલતરં સંયતં ચારુભઙ્ગ્યા
રત્નોત્તંસાભિરામં વલયિતમુદયચ્ચન્દ્રકૈઃ પિઞ્છજાલૈઃ ।
મન્દારસ્રઙ્નિવીતં તવ પૃથુકબરીભારમાલોકયેઽહં
સ્નિગ્ધશ્વેતોર્ધ્વપુણ્ડ્રામપિ ચ સુલલિતાં ભાલબાલેન્દુવીથીમ્ ॥ ૧૦૦-૨॥

હૃદ્યં પૂર્ણાનુકમ્પાર્ણવમૃદુલહરીચઞ્ચલભ્રૂવિલાસૈ-
રાનીલસ્નિગ્ધપક્ષ્માવલિપરિલસિતં નેત્રયુગ્મં વિભો તે ।
સાન્દ્રચ્છાયં વિશાલારુણકમલદલાકારમામુગ્ધતારં
કારુણ્યાલોકલીલાશિશિરિતભુવનં ક્ષિપ્યતાં મય્યનાથે ॥ ૧૦૦-૩॥

ઉત્તુઙ્ગોલ્લાસિનાસં હરિમણિમુકુરપ્રોલ્લસદ્ગણ્ડપાલી-
વ્યાલોલત્કર્ણપાશાઞ્ચિતમકરમણીકુણ્ડલદ્વન્દ્વદીપ્રમ્ ।
ઉન્મીલદ્દન્તપઙ્ક્તિસ્ફુરદરુણતરચ્છાયબિમ્બાધરાન્તઃ-
પ્રીતિપ્રસ્યન્દિમન્દસ્મિતમધુરતરં વક્ત્રમુદ્ભાસતાં મે ॥ ૧૦૦-૪॥

બાહુદ્વન્દ્વેન રત્નોજ્જ્વલવલયભૃતા શોણપાણિપ્રવાલે-
નોપાત્તાં વેણુનાલીં પ્રસૃતનખમયૂખાઙ્ગુલીસઙ્ગશારામ્ ।
કૃત્વા વક્ત્રારવિન્દે સુમધુરવિકસદ્રાગમુદ્ભાવ્યમાનૈઃ
શબ્દબ્રહ્મામૃતૈસ્ત્વં શિશિરિતભુવનૈસ્સિઞ્ચ મે કર્ણવીથીમ્ ॥ ૧૦૦-૫॥

ઉત્સર્પત્કૌસ્તુભશ્રીતતિભિરરુણિતં કોમલં કણ્ઠદેશં
વક્ષઃ શ્રીવત્સરમ્યં તરલતરસમુદ્દીપ્રહારપ્રતાનમ્ ।
નાનાવર્ણપ્રસૂનાવલિકિસલયિનીં વન્યમાલાં વિલોલ-
લ્લોલમ્બાં લમ્બમાનામુરસિ તવ તથા ભાવયે રત્નમાલામ્ ॥ ૧૦૦-૬॥

અઙ્ગે પઞ્ચાઙ્ગરાગૈરતિશયવિકસત્સૌરભાકૃષ્ટલોકં
લીનાનેકત્રિલોકીવિતતિમપિ કૃશાં બિભ્રતં મધ્યવલ્લીમ્ ।
શક્રાશ્મન્યસ્તતપ્તોજ્વલકનકનિભં પીતચેલં દધાનં
ધ્યાયામો દીપ્તરશ્મિસ્ફુટમણિરશનાકિઙ્ગિણીમણ્ડિતં ત્વામ્ ॥ ૧૦૦-૭॥

ઊરૂ ચારૂ તવોરૂ ઘનમસૃણરુચૌ ચિત્તચોરૌ રમાયા
વિશ્વક્ષોભં વિશઙ્ક્ય ધ્રુવમનિશમુભૌ પીતચેલાવૃતાઙ્ગૌ ।
આનમ્રાણાં પુરસ્તાન્ન્યસનધૃતસમસ્તાર્થપાલીસમુદ્ગ-
ચ્છાયં જાનુદ્વયં ચ ક્રમપૃથુલમનોજ્ઞે ચ જઙ્ઘે નિષેવે ॥ ૧૦૦-૮॥

મઞ્જીરં મઞ્જુનાદૈરિવ પદભજનં શ્રેય ઇત્યાલપન્તં
પાદાગ્રં ભ્રાન્તિમજ્જત્પ્રણતજનમનોમન્દરોદ્ધારકૂર્મમ્ ।
ઉત્તુઙ્ગાતામ્રરાજન્નખરહિમકરજ્યોત્સ્નયા ચાઽશ્રિતાનાં
સન્તાપધ્વાન્તહન્ત્રીં તતિમનુકલયે મઙ્ગલામઙ્ગુલીનામ્ ॥ ૧૦૦-૯॥

યોગીન્દ્રાણાં ત્વદઙ્ગેષ્વધિકસુમધુરં મુક્તિભાજાં નિવાસો
ભક્તાનાં કામવર્ષદ્યુતરુકિસલયં નાથ તે પાદમૂલમ્ ।
નિત્યં ચિત્તસ્થિતં મે પવનપુરપતે કૃષ્ણ કારુણ્યસિન્ધો
હૃત્વા નિઃશેષતાપાન્પ્રદિશતુ પરમાનન્દસન્દોહલક્ષ્મીમ્ ॥ ૧૦૦-૧૦॥

અજ્ઞાત્વા તે મહત્ત્વં યદિહ નિગદિતં વિશ્વનાથ ક્ષમેથાઃ
સ્તોત્રં ચૈતત્સહસ્રોત્તરમધિકતરં ત્વત્પ્રસાદાય ભૂયાત્ ।

દ્વેધા નારાયણીયં શ્રુતિષુ ચ જનુષા સ્તુત્યતાવર્ણનેન
સ્ફીતં લીલાવતારૈરિદમિહ કુરુતામાયુરારોગ્યસૌખ્યમ્ ॥ ૧૦૦-૧૧॥

ઇતિ મેલ્પત્તૂર્ શ્રીનારાયણભટ્ટતિરિવર્યવિરચિતં
નારાયણીયં સ્તોત્રં સમાપ્તમ્ ॥

## અનુબન્ધમ્

શ્રીકૃષ્ણપાદામ્બુજં

મઙ્ગળં મઞ્જુલં કૃષ્ણપાદામ્બુજં મઙ્ગલ્યદાયકં કૃષ્ણપાદામ્બુજમ્ ।
સઙ્કટનાશનં કૃષ્ણપાદામ્બુજં સન્તોષદાયકં કૃષ્ણપાદામ્બુજમ્ ॥

દુષ્ટવિનાશનં કૃષ્ણપાદામ્બુજં શિષ્ટજનપ્રિયં કૃષ્ણપાદામ્બુજમ્ ।
મુક્તિપ્રદાયકં કૃષ્ણપાદામ્બુજં શક્તિપ્રદાયકં કૃષ્ણપાદામ્બુજમ્ ॥

સન્મયં ચિન્મયં કૃષ્ણપાદામ્બુજં કલ્મષનાશનં કૃષ્ણપાદામ્બુજમ્ ।
નિષ્કલં નિસ્તુલં કૃષ્ણપાદામ્બુજં નિત્યનિરામયં કૃષ્ણપાદામ્બુજમ્ ॥

આનન્દદાયકં કૃષ્ણપાદામ્બુજં આકુલનાશનં કૃષ્ણપાદામ્બુજમ્ ।
મોદપ્રદાયકં કૃષ્ણપાદામ્બુજં મોહવિનાશનં કૃષ્ણપાદામ્બુજમ્ ॥

શ્રીગુરુવાયુપુરેશપાદામ્બુજં શ્રીશ્રીદાયકં કૃષ્ણપાદામ્બુજમ્ ।
નિત્યં નમસ્કુરુ નિત્યં ભજ ભજ નિત્યં સ્મર સ્મર કૃષ્ણપાદામ્બુજમ્ ॥

## મઙ્ગલમ્

મઙ્ગળં મઙ્ગળાકાન્ત તવ વક્ષસ્થલે સ્થિતા ।
મઙ્ગળં પ્રાર્થ્યમાનસ્ય કરોતુ મમ મઙ્ગળમ્ ॥ ૧॥

ત્વમેવ મઙ્ગળાકાન્તઃ લોકમઙ્ગળકારકઃ ।
મઙ્ગળં તે પ્રવક્ષ્યામિ મમ મઙ્ગલહેતવે ॥ ૨॥

નારાયણાય હરયે સૃષ્ટિસ્થિત્યન્તકારિણે ।
ગુરુવાતપુરીશાય વિશ્વરૂપાય મઙ્ગળમ્ ॥ ૩॥

શઙ્ખચક્રગદાપદ્મમાલાકૌસ્તુભધારિણે ।

ગુરુવાતપુરીશાય વિષ્ણુરૂપાય મઙ્ગળમ્ ॥ ૪॥

પ્રળયાબ્ધિચરાયાસ્તુ નમો વેદવિકાસિને ।
ગુરુવાતપુરીશાય મત્સ્યરૂપાય મઙ્ગળમ્ ॥ ૫॥

લક્ષ્મીનાથાય શાન્તાય નમો મન્દરધારિણે ।
ગુરુવાતપુરીશાય કૂર્મરૂપાય મઙ્ગળમ્ ॥ ૬॥

ક્ષિત્યુદ્ધારવિહારાય હિરણ્યાક્ષાસુહારિણે ।
ગુરુવાતપુરીશાય ક્રોડરૂપાય મઙ્ગળમ્ ॥ ૭॥

પ્રહ્લાદરક્ષકાયાસ્તુ હિરણ્યકશિપુઘાતિને ।
ગુરુવાતપુરીશાય નારસિંહાય મઙ્ગળમ્ ॥ ૮॥

વામનાય નમસ્તુભ્યં બલિદર્પાપહારિણે ।
ગુરુવાતપુરીશાય યજ્ઞરૂપાય મઙ્ગળમ્ ॥ ૯॥

બલ્યર્પિતપદાબ્જાય ક્રાન્તત્રિભુવનાય ચ ।
ગુરુવાતપુરીશાય વિશ્વરૂપાય મઙ્ગળમ્ ॥ ૧૦॥

નમઃ પરશુહસ્તાય કેરળોદ્ધારકાય ચ ।
ગુરુવાતપુરીશાય ભાર્ગવાયાદ્ય મઙ્ગળમ્ ॥ ૧૧॥

નમઃ કોદણ્ડહસ્તાય દશગ્રીવાન્તકાય ચ ।
ગુરુવાતપુરીશાય રામચન્દ્રાય મઙ્ગળમ્ ॥ ૧૨॥

બાલગોપાલવેષાય પૂતનામોક્ષદાયિને ।
ગુરુવાતપુરીશાય ગોવિન્દાયાસ્તુ મઙ્ગળમ્ ॥ ૧૩॥

વરભટ્ટાત્રિવન્દ્યાય વાતરોગનિવારિણે ।
જ્ઞાનપ્રદાય દેવાય વાતેશાયાસ્તુ મઙ્ગળમ્ ॥ ૧૪॥

દયાસારાય સૌમ્યાય મમ મઙ્ગળકારિણે ।
સર્વરોગાપહારાય વાતેશાયાદ્ય મઙ્ગળમ્ ॥ ૧૫॥

મયા વન્દ્યાય નિત્યાય જગત્કારણમૂર્તયે ।
મમ તાપવિનાશાય જાગરૂકાય મઙ્ગળમ્ ॥ ૧૬॥

શુભમસ્તુ ॥

## પારાયણાવસાનશ્લોકાઃ

સ્વસ્તિ પ્રજાભ્યઃ પરિપાલયન્તાં ન્યાય્યેન માર્ગેણ મહીં મહીશાઃ ।
ગોબ્રાહ્મણેભ્યઃ શુભમસ્તુ નિત્યં લોકાસ્સમસ્તાસ્સુખિનો ભવન્તુ ॥

કાલે વર્ષતુ પર્જન્યઃ પૃથિવી સસ્યશાલિની ।
લોકોઽયં ક્ષોભરહિતઃ સજ્જનાસ્સન્તુ નિર્ભયાઃ ॥

અપુત્રાઃ પુત્રિણઃ સન્તુ પુત્રિણસ્સન્તુ પૌત્રિણઃ ।
અધનાઃ સધનાસ્સન્તુ જીવન્તુ શરદાં શતમ્ ॥

ત્વમેવ માતા ચ પિતા ત્વમેવ ત્વમેવ બન્ધુશ્ચ સખા ત્વમેવ ।
ત્વમેવ વિદ્યા દ્રવિણં ત્વમેવ ત્વમેવ સર્વં મમ દેવ દેવ ॥

કાયેન વાચા મનસેન્દ્રિયૈર્વા બુદ્ધ્યાઽઽત્મના વા પ્રકૃતેસ્સ્વભાવાત્ ।
કરોમિ યદ્યત્સકલં પરસ્મૈ શ્રીમન્નારાયણાયેતિ સમર્પયામિ ॥

હરે રામ હરે રામ રામ રામ હરે હરે ।
હરે કૃષ્ણ હરે કૃષ્ણ કૃષ્ણ કૃષ્ણ હરે હરે ॥

નારાયણ નારાયણ નારાયણ નારાયણ
નારાયણ નારાયણ નારાયણ નારાયણ
નારાયણ નારાયણ નારાયણ નારાયણ
નારાયણ નારાયણ નારાયણ નારાયણ

## નારાયણીય આરતિ

જય જગદીશ હરે કૃષ્ણ જય જગદીશ હરે
જય ગુરુમારુતમન્દિરનાથ ।
જય જગદીશ હરે કૃષ્ણ જય જગદીશ હરે ॥

કિઙ્કિણિપદકમલ કૃષ્ણ કઙ્કણકરયુગળ
કુઙ્કુમપઙ્કિલવક્ષસ્થલવર કુવલયદળનીલ કૃષ્ણ
જય જગદીશ હરે ॥

દધિનવનીતહર કૃષ્ણ તરુણીચિત્તહર
દયયા પાલય દામોદર હર તુળસીદામધર કૃષ્ણ
જય જગદીશ હરે ॥

ગોવર્ધનધરણ કૃષ્ણ ગોપીજનરમણ
કોમળપલ્લવસુન્દરચરણ કોકિલમધુવચન કૃષ્ણ
જય જગદીશ હરે ॥

નન્દકુમાર હરે કૃષ્ણ નારદગીતગુણ
નારાયણવર ભટ્ટતિરીકૃતસ્તુતિવરશુભફલદ કૃષ્ણ
જય જગદીશ હરે ॥

પૂન્તાનભક્તપ્રિય કૃષ્ણ વૃન્દાવન રસિક
પ્રેમિકભાવુકમણ્ડલપૂજિતપાદસરોજયુગ કૃષ્ણ
જય જગદીશ હરે

The Arati is composed by Shri Shri Krishna Premi Anna.

Reference system:
Preliminary version from
http://iu.ff.cuni.cz/pandanus/electronictexts/
Converted to Itrans for Devanagari display.

Proofread by
M.K. Krishnaswamy surfings at attbi.com,
M.G.Vasudevan mgv at lntecc.com, and
PSA Easwaran

*Narayaniyam*
pdf was typeset on December 27, 2023

Please send corrections to *sanskrit@cheerful.com*